2.5

# अथ

# श्रीमत्कैशवम्-

# निराकारमीमांसासूत्रभाष्यम् ।

## प्रथमोऽध्यायः

यः साकारतया विभात्यविदुषामाकारहीनोपि सन् जीवेशानजगद्विभागकलनाकालुष्यभाजां विभुः ॥ यस्मिन् साधु मनः समर्प्य सुजनः स्वानन्दसिन्धुः स्वयं भूत्वास्ते तमुपास्महेऽतिनिकटं वेदान्तवेद्यं हरिम् ॥ १ ॥ स्थाणोः पुमा-[illegible] यस्य विभ[illegible]यभातेर्भातेर्विनश्यति विभोस्तु नमोस्तु विश्वं ॥ विश्वम्भराय [illegible] सिद्धसवन्ध श्रो[illegible]द्याऽविद्याविपाकरहिताय हिताय तस्मै ॥ २ ॥ वेदेषु स्वमनोनिधाय [illegible]युक्तोक्त्य[illegible]भीरभावेषु योभूतोद्धारचिकीर्षया सहजया संगृह्य सारं ततः॥ सूत्रैः सारसमर्पकैः सुघटितं निर्वाणनिष्ठं परं प्रस्थानं प्रकटीचकार भगवान् श्रीनानकं तं नुमः ॥ ३ ॥ महानिराकारविचार[illegible]तरीतुरीततानाद्भुतदर्शनाम्बरम् ॥ सुवर्णसूत्रैः शुचिसद्विभूषणं गरीयसोयस्य स हन्तु दूषणम् ॥ ४ ॥ सूत्रैर्गौरवसंक्षितैस्तु गुरुणा भावः श्रुतेः सञ्चितोयोऽसौ कैशवसंज्ञितेन विशदं भाष्येण विख्यापितः ॥ येनागाधधिया मनीषिमुकुटालङ्कारभूतः सनोभूयाद् भूरियशोविभूषितदिशोमोदप्रदः केशवः ।५। श्रीकेशवानन्दयतीन्द्रचन्द्राद् भाष्यामृतं निःसृतमाप्तकामः ॥ आकण्ठमापीय मनश्चकोरः केषां न सन्तुष्यति मोदमानः ॥६॥ श्रौताशयोद्घाटनपाटवं गुरोः सौत्राशयोद्घाटनपाटवं यतेः। भाष्याशयोद्घाटनपाटवं स्वकं स्वरूपसूरिः प्रयते प्रकाशितुम् ॥७॥ कलुषं ह्यपि मे स्वसेविनं विमलीभूय वचः पविष्यति॥ गुरुकेशववाक्ययोगतो त्रिशिखावारिव गाङ्गसङ्गतः॥८॥ श्रीनिराकारमीमांसाभाष्यभावप्रकाशिकादीपिकाख्या मया व्याख्याऽऽरब्धा स्वरूपसूरिणा।९। 'तद्यथेह कर्मचितोलोकः क्षीयत एवमेवामुत्र पुण्यचितोलोकः क्षीयते' इत्यादि-

---

१ भवनंसत्ताऽनुभवोज्ञानं सच्चिद्रूपायेत्यर्थः ।

२ विद्याऽविद्ययोः फले मोक्षबन्धौ तद्रहितायेत्यर्थः ।

३ गुरुश्च केशवश्च तयोर्वाक्ययोगतइत्यर्थः गुरुपदं गुरुनानकं केशवपदं केशवाचार्यमाहेति बोध्यम्॥

षु श्रुतिषु स्वर्गादिसुखस्यानित्यत्त्वमाम्नायते मुण्डकेष्वपि‘प्लवाह्येते अदृढायज्ञरूपाः, इत्यादिना नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं चा विशन्ति’ इत्यन्तेन स्वर्गादिसुखस्य क्षयितामाम्नाय‘तपः श्रद्धे ये ह्युपवसन्त्यरण्ये ’इत्यृचा निवृत्तिनिष्ठस्य परमपुरुषार्थसिद्धिरुच्यते‘परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोनिर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं तस्मै स विद्वानुपसन्नाय सम्यक् प्रशांतचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतोब्रह्मविद्याम्’ इत्यादिना श्रद्धापूर्वकोपसत्तिशमादिगुणविशिष्टं प्रत्येवोपदेशआचार्य्येण कर्त्तव्यइति विधीयते न तु तद्राहितं प्रति अतएव शमदमादिसम्पन्नस्यैवात्मदर्शनं माध्यन्दिना दर्शयन्ति तस्मादेवंविच्छान्तोदान्तउपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत्सर्वमात्मनिपश्यतिइत्यादिना किञ्च कलिकालकरालविशालव्यालग्रस्तानां जनानां विशिष्टं भगवद्भजनमपि पापक्षयद्वाराकलिसमुत्तरणपूर्वकपरमपुरुषार्थसाधनं मन्त्रब्राह्मणस्मृतीतिहासपुराणादिषु ‘तमुस्तोतारः [illegible] ऋतस्य गर्भं जनुषा पिपर्त्त न अस्यजानतोनाम चिद्विविक्त [illegible] विष्णोसुमतिं भजाम ’ इत्यादिऋग्वेदमन्त्रेण भर्त्ता सन्भ्रियमाणोविभर्त्ति’ इत्यादियजुर्वेदमन्त्रेण ‘ब्रह्मसंस्थोऽमृतत्वमेति ’ इत्यादिसामवेदमन्त्रेण ‘ भक्तिरस्यभजन , मित्यादिअथर्ववेदमन्त्रेण ‘अथ हैनं ब्रह्मचारिणऊचुः किं जप्येनामृतत्वं ब्रूहीति सहोवाचयाज्ञवल्क्यः शतरुद्रीयेणेत्येतानि ह वा अमृतस्य नामधेयान्येतैर्ह वा अमृतोभवती ’ त्यादिजाबालब्राह्मणेन ‘ यः शतरुद्रीयमधीते सोऽग्निपूतोभवति सवायुपूतोभवति सुरापानात्पूतोभवति ब्रह्महत्यायाः पूतोभवति कृत्या-

---

१ इदं दीर्घतमोवाक्यं अयं मन्त्रोजगदुपादानस्य जगत्कर्तुर्वेदान्तवेद्यस्य स्वप्रकाशस्य मत्स्याद्यनेकावतारयुक्तस्य विष्णोः स्तोत्रस्य नाम्नां च मोक्षसाधनभक्तिसाधनत्वं दर्शयति मन्त्राक्षरार्थस्तु उकारः छन्दःपूरणार्थः हेजानन्तः स्वार्थकुशलाजनाः तंदेवमस्ति कश्चिदीश्वरइत्येवमावालगोपालं प्रसिद्धं पूर्व्यं पुरातनं सर्वाधिष्ठानं सर्वकर्तारं च ऋतस्य गर्भं ऋतस्योपनिषदः तज्जन्यज्ञानस्य वा जठरे वर्तमानं वेदान्तसिद्धान्तप्रत्यगभिन्नपरमात्मानं स्तोतारः स्तुध्वमिति विभक्तिपरिणामः न च वैदिकैरेवस्तोत्रैः स्तोतव्यमिति कश्चिदस्ति नियमः किन्तु यथाविदि यथाज्ञानं यथा जानीत तथास्तुध्वं श्रौतैरागमिकैः [illegible]राणैः प्राकृतैर्वा स्तोत्रैः स्तुध्वमितिभावः अथवा तंदेवं जनुषा पिपर्तन स्वच्छन्दरचितेन बहुविधज[illegible] पूरयत मत्स्याद्यवतारैरर्चितं वर्णयतेत्यर्थः अथैवमपि स्तोतुमसमर्थाअस्य भगवतः श्रीमन्नामानि [illegible]क्तन सदा कीर्तयत हेविष्णो व्यापक ते महः प्रकाशस्त्वत्स्वरूपप्रकाशिकां सुमतिं साक्षात्काररू[illegible] अत्रापि लकारव्यत्ययश्छन्दसः भजेमहीतिब्रह्मविद्यामाशासानाः कीर्तयेम इत्यर्थः ।

कृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेदनेन ज्ञानमाप्नोति संसारार्णवनाशन ' मित्यादिकैवल्यब्राह्मणेन अपि यश्चण्डालः शिवइति वाचं वदेत् तेन सह संवदेत्तेन सह संवसेत्तेन सह भुञ्जीते ' त्यादिकठब्राह्मणेन द्वापरान्ते नारदो ब्रह्माणं प्रति जगाम कथं नु भगवः कलिं संतरेय' मित्यादिनाचाथर्वोपनिषद्ब्राह्मणेन 'नामानि विश्वानि न सन्ति लोके यदाविरासीदनृतस्य सर्वं नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परमुदाहरते' त्यादिभाल्लवीब्राह्मणेन । श्रुतिस्मृतिपुराणेषु रामनाम समीरितं तन्नामकीर्त्तनं भूयस्तापत्रयविनाशनं । सर्वेषामेव पापानाम्प्रायश्चित्तमिदं स्मृतं । नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते । नामसंकीर्त्तनादेव तारकं ब्रह्म दृश्यते' इत्यादिच्यवनादिस्मरणेन 'नमस्ते सर्वलोकात्मन्नारायण परात्पर, मनोमलात्तपोऽशक्यं कर्म चाविद्यया हतं । दानमप्यर्थदोषेण नाम तस्मात्कलौ स्मरेदित्यादिमहाभारतेन अशुचिर्वापि शुद्धो वा यः सदा कीर्त्तयेद्धरिं । सोपि दोषक्षयान्मुक्तिं लभेच्चेदिपतिर्यथा । इत्यादिब्रह्मपुराणादिवचःशतेन सप्रपञ्चं प्रतिपादितं । ननु ' सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः' इत्यभियुक्तोक्त्या प्रयोजनं विना मन्दोपि न प्रवर्त्तते ' इति लौकिकन्यायेन च शास्त्रादौ प्रयोजनादि वक्तव्यमिति चेदत्रोच्यते इह खलु कर्मयोगोष्टाङ्गयोगो ज्ञानयोगो भक्तियोगश्चेति चत्वारः पुरुषार्थसाधनत्वेन प्रसिद्धा योगाः ' योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोन्योऽस्ति कर्हिचिदि' त्येकादशे भगवद्वचनात् अष्टाङ्गयोगोऽपि ज्ञानयोगान्तर्गतो द्रष्टव्यः ' तां योगमिति मन्यन्ते ' त्रिरुन्नतं स्थाप्य समं शरीरमि ' त्यादिश्रुत्या मनएकत्र संयुञ्ज्याज्जितश्वासो जितासनः वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रित' इत्यादिस्मृत्या च तस्यापि व्युत्पादनात् न च 'एतेन योगः प्रत्युक्तः, इति व्यासैः प्रत्याख्यातोऽयमिति भ्रमितव्यम् श्रुतिस्मृतिविरुद्धांशस्यैव तेन प्रत्याख्यातत्वादित्यन्यत्र विस्तरः तत्र गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनानि चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृभूतमनुष्यब्रह्मयज्ञानामेव अष्टकापार्वणश्राद्धं श्राव्ण्याग्रयणीचैत्र्याश्वयुजी चेति सप्तपाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि निरूढपशुबन्धः सौत्रामण्याग्रयणेष्टिश्चेति सप्तहविर्यज्ञस्य अग्निष्टोमोत्यग्निष्टोमः उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तोऽर्यामइति सप्तावस्य

स्था इत्यादिशास्त्रविहितोवर्णाश्रमधर्मरूपः कर्मयोगोन्तःकरणशुद्धिसाधनत्वेन तत्पर्यन्तमनुष्ठेयः ‘ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ’ इति भगवद्वचनात् ‘निर्विण्णचित्तं ब्राह्मणं ब्रह्मिष्ठं गुरुमासीतेतिश्रुतेश्च अन्तःकरणशुद्धिसाधनत्वं च ‘ धर्मेण पापमपनुदति ’ येन केन च यजेतापि वा दर्विहोमेनानुपहतमनाएव भवती ’त्यादिश्रुतिसिद्धं ‘ योगिनः कर्म कुर्वन्ति सङ्गंत्यक्त्वात्मशुद्धय ’ इतिस्मृतेश्च, एतेन ‘ मामप्राप्यैव कौन्तेये ’ त्यासुराणामनधिकारस्मरणात् , अतोबुधआभजेत्तं भक्त्येकयेशं गुरुदेवतात्मा गृहशुश्रूषणं मह्यं दासवद्यदमायया सर्वलाभोपहरण ’ मित्याद्येकादशवचनात्बुधैरेव श्रौतस्मार्तकर्माण्यपि तत्तद्रूपस्य भगवतएवसेवेयमिति बुद्ध्याऽवश्यकर्तव्यानि इतिबोधितम् ततश्चाद्रुतचित्तस्य निर्वेदपूर्वकं तत्वज्ञानं द्रुतचित्तस्य तु-भगवत्कथाश्रवणादिभागवतधर्मश्रद्धापूर्विकाभक्तिरित्यवधित्वेन द्वयमप्युपाचं ततोन्तःकरणशुद्ध्या कर्मसु निर्विण्णोयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिलक्षणमष्टाङ्गयोगमनुष्ठाय तैलधारावदविच्छिन्नभगवदेकाकारप्रत्ययपरंपरात्मकैकाग्रतायोग्यं मनः संपादयेत् ‘यदारम्भेषु निर्विण्णो विरक्तः संयतेन्द्रियः।अभ्यासेनात्मनोयोगी धारयेदचलं मनः॥धार्य्यमाणं मनोयर्हि भ्राम्यदाश्वनवस्थितम् अतन्द्रितोनुरोधेन मार्गेणात्मवशे नयेदि ’त्यादिभगवद्वचनात् तस्मिंश्च सति अमानित्वमदम्भित्वमित्यारभ्य ‘ एतद्ज्ञानमितिप्रोक्त ’ मित्यन्तेन ग्रन्थेन भगवद्गीतोपनिषदुपदिष्टोज्ञानयोगोहिप्रतिष्ठितोभवति ’ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः । मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया ॥यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया । ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मन ’ इत्यादि भगवद्वचनात् अत्र ‘ भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदती ’ त्यनेन-भक्तियोगएव ज्ञानयोगावधित्वेनोक्तः भक्तियोगं विना मनसः सम्यक्प्रसादाभावात् ‘ मनस्त्यजतिदौरात्म्य ’ मित्यत्रापि ‘ ममार्चोपासनाभिर्वेति ‘ मयिचानन्ययोगेनभक्तिरव्यभिचारिणीति ’ ज्ञानयोगान्तर्गतया साधनभक्त्येत्यर्थः ततश्च ‘प्रोक्तेन भक्तियोगेन भजतोमासकृन्मुनेः। कामाहृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ’ इत्यादिभगवद्वचनानुसारिण्या साधनभक्तिनिष्ठया निखिलमपि प्रेम्णं भगवत्येव प्रतिष्ठापयतः सकलविषयविमुखमनसोमहाभागस्य कस्यचिद्गुणगरिमग्रथनरूपग्रंथश्रवणजनितद्रुतिरूपायां मनोवृत्तौ सर्वसाधनफलभूतभगवदाकारायां भगवदाकाररूपरत्याख्योभिव्यक्तः स्थायिभावो-

निराकारब्रह्मात्मैक्यभजनानन्दसाक्षात्कारात्मकः प्रादुर्भवति सएव योगइति तं परमं निरतिशयं पुरुषार्थं वदन्ति ' निर्गुणानां च भक्तानां लक्षणं शृणु मानद। सार्वभौमं पारमेष्ठ्यं शक्रधिष्ण्यं तथैव च। रसाधिपत्यं योगर्द्धिं न वाञ्छन्ति हरेर्जनाः॥हरिणादीयमानं वा सालोक्यं यादवेश्वर।न गृह्णन्ति कदाचित्ते सत्संगानन्दनिर्वृताः॥सामीप्यन्ते न वाञ्छन्ति भगवद्विरहातुराः॥सन्निकृष्टे न तत्प्रेम यथा दूरतरे भवेत्॥सारूप्यं दीयमानं वा समानत्वाभिमानिनः॥नैरपेक्ष्यान्न गृह्णन्ति भक्तास्तत्सेवनोत्सुकाः एकत्वं चापि कैवल्यं न वाञ्छन्ति कदाचन। एवं चेत्तर्हि दासत्वं क्वस्वामित्वं परस्य च। निरपेक्षाश्च ये शांता निर्वैराः समदर्शिनः॥आकैवल्याल्लोकपदग्रहणं करणं विदुः। नैरपेक्ष्यं महानन्दनैरपेक्ष्या जना हरेः। 'इति' तस्मान्मद्भक्तियुक्तस्य योगिनोवै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयोभवेदिह। यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।योगेन दानेन धर्मेण श्रेयोभिरितरैरपि।सर्वं मद्भक्तियोगेन मद्भक्तोलभतेऽञ्जसा। स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति। न किंचित्साधवोधीरा भक्ता ह्येकान्तिनोमम।वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवं नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत्। न मय्येकान्तभक्तानां गुणदोषोद्भवागुणाः॥साधूनां समचित्तानां बुद्धेः परमुपेयुषा'मित्यादिवचनानि तदनुभावितारश्च दुःखासम्भिन्नसुखंपरमःपुरुषार्थः धर्मार्थकामाः पुरुषार्था इति प्रसिद्धिस्तु लाङ्गलं ममजीवनमितिन्यायेन तत्साधने फलत्ववचना दौपचारिकी अतोन सुखमेव पुरुषार्थइति पक्षहानिः सुखं दुःखाभावश्चद्वौपुरुषार्थाविति तार्किकास्तन्न लाघवेन सुखमात्रस्यैव पुरुषार्थत्वकल्पनात् इच्छाविषयत्वेन हि ज्ञानस्य सुखविषयत्वमवच्छेदकं न तु सुखदुःखाभावान्यतरविषयत्वं गौरवात् दुःखाभावस्य तु सुखपरिचायकत्वेनैवोपयोगः यत्तु न्यायनिबन्धकारैः शङ्कितं दुःखाभावस्य सुखार्थत्वेनैवोपयोगेऽभिहिते सुखस्यापि दुःखाभावार्थत्वेनोपयोगोवक्तुं शक्यते विनिगमनाविरहात्तस्मात्तदुभयं पुरुषार्थइति तदयुक्तम् व्याप्यव्यापकभावस्यैवविनिगमकत्वात् यदा सुखं तदा दुःखाभाव इति हि व्याप्तिः सर्वसम्मता निरुपाधिकसहचारदर्शनात् अतो दुःखाभावस्य सुखकालेऽवश्यंभावित्वात्सुखपरिचायकत्वमुपपद्यते तद्व्यापकत्वात् तस्य यदादुःखाभावः तदा सुखमिति तु न व्याप्तिः सुषुप्तिप्रलयादौव्यभिचारात् अतोदुःखाभावस्य सुखाव्याप्यत्वान्नतुपरिचायकत्वं सुखस्याव्यापकत्वं हि व्याप्यत्वसिद्धिहेतुत्वेनान्यथासिद्धं सुखं च न दुःखाभावव्यापकमतस्तदेवस्वतन्त्रः पुरुषार्थः दुःखाभावस्य

सुखार्थत्वेनोपयोगेन सर्वशून्यस्य दुःखाभावस्य मोक्षस्य पुरुषार्थत्वं परमं स्यादिति चेद् दीयतां जलाञ्जलिस्तस्मै परमानन्दस्वरूपत्वेन तस्य पुरुषार्थत्वं वेदान्तविदोवदन्ति अतो भगवद्भक्तियोगस्यापि दुःखासम्भिन्नसुखत्वेनैव परमपुरुषार्थत्वमिह ज्ञेयम् एतेन भक्तिर्नपुरुषार्थोधर्मार्थकाममोक्षेष्वनन्तर्भावादित्यपास्तम् धर्मार्थकामानां स्वतः पुरुषार्थत्वाभावात्तज्जन्यसुखस्यैव पुरुषार्थत्वंगौरवादननुगमाच्च धर्मजन्यत्वादिविशेषणं परित्यज्यसुखमात्रं पुरुषार्थ इति स्थिते समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वात्तस्य मोक्षसमीपवर्त्तितया धर्मान्तर्भूतत्वं वा योगजधर्मजन्यतया धर्मान्तर्भूतत्वं वा भक्तिसुखस्यापि भागवतधर्मजन्यतया धर्मान्तर्भावस्य श्रद्धाजडान्प्रतिवक्तुं शक्यत्वात् भक्तस्य संसारान्मोक्षस्यावश्यकत्वान्मोक्षान्तर्गतो भक्तियोगः तस्मात्पुरुषार्थचतुष्टयान्तर्गतत्वाद्वा स्वातन्त्र्येण वा भक्तियोगः पुरुषार्थः परमानन्दरूपत्वादिति निर्विवादम् के पुनर्भक्तियोगस्य पुमर्थत्ववादाः शृणु तान् "ब्रह्मसंस्थोऽमृतत्वमेति' श्रद्धाभक्तिध्यानयोगादवेहि'इत्यादिच्छान्दोग्यकैवल्यादिषु श्रूयते'पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया । नाहं वेदैरि' त्युपक्रम्य 'भक्त्या त्वनन्यया शक्य' इत्यादिस्मृतयः भक्त्याहमेकया ग्राह्यः ' भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् । प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बन' मित्यादिपुराणं च अग्रेपुष्कलं वदिष्यामः ननु भक्तियोगस्य साधनत्वमपिबोधयन्त्यन्येवादाः'वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् । अकामः सर्वकामोवा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परं । केचित्केवलया भक्त्या वासुदेवपरायणाः अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः 'गीतासु च 'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततोमां तत्त्वतोज्ञात्वा विशते तदनन्तरमि ' त्यादयः अत्रान्यसाधनत्वेनसाक्षादपुरुषार्थत्वं स्पष्टमेवोक्तम् अत्रोच्यते साधनफलभेदेन भक्तेर्द्वैविध्येनोपपादयिष्यमाणत्वेनोपपत्तेरदोषस्तथाहि यथा विज्ञप्तिर्विज्ञानमिति भावव्युत्पत्त्या "विज्ञानमानन्दं ब्रह्म,त्यत्रविज्ञानशब्दो ब्रह्मणि वर्त्तते विज्ञायतेनेनेति करणव्युत्पत्त्या ' विज्ञानं यज्ञं तनुते, इत्यादावन्तःकरणे वर्त्तते तद्वत् भजनमन्तःकरणस्य भगवदाकारतारूपं भक्तिरितिभावव्युत्पत्त्याभक्तिशब्देनफलमभिधीयते तस्य च निरतिशयपुमर्थत्वात्पूर्वोक्तवादानां प्रामाण्यमव्याहतं तथा भज्यते सेव्यते भगवदाकारमन्तःकरणं क्रियतेऽनयेति करणव्युत्पत्त्या भक्तिशब्देन श्रवणकीर्त्तनादिसाधनमभिधीयते तस्याश्च स्वयं पु-

मर्थत्वाभावात् साधनत्ववादानामपि प्रामाण्यमविरुद्धम् एतच्च स्पष्टीकृतं प्रबुद्धेन "स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिं। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकान्तनु, मित्यत्र करणव्युत्पत्त्या प्रथमभक्तिशब्दो भागवतधर्मेषु प्रयुक्तः द्वितीयस्तु भावव्युत्पत्त्या फलेइति तस्मात्साधनफलभेदेन भक्तिद्वैविध्योपपत्तेः साधनत्ववचनानां च विषयविभागेन सर्वत्राविरोधः सिद्धः ननु तर्हि नामान्तरेण ब्रह्मविद्यैव भगवद्भक्तिरित्युक्तं तथाहि 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने' त्यादिश्रुत्या सुकृत साध्यत्वेन ब्रह्मविद्या प्रतिपादिता सर्वापेक्षाधिकरणे च तथैव निर्णीता इहापि पूर्वोदाहृतैर्वक्ष्यमाणैश्च वचनैः सर्वसुकृतसाध्यत्वेन लक्षणेन भगवद्भक्तेर्ब्रह्मविद्यारूपतया प्रतिपादनाच्चस्याश्च निरतिशयपुमर्थत्वस्य चतुर्लक्षण्यां ब्रह्ममीमांसायामप्रतिपत्तिविप्रतिपत्तिनिवारणेन व्यवस्थापितत्वाद्व्यर्थोयं निराकारब्रह्मभक्तिविचारारम्भइतिचेन्न स्वरूपसाधनफलाधिकारिवैलक्षण्यात् भक्तिब्रह्मविद्ययोः तथाहि द्रवीभावपूर्विका हि मनसो भगवदाकारता सविकल्पकवृत्तिरूपा भक्तिः द्रवीभावानपेक्षाऽद्वितीयात्ममात्रगोचरा निर्विकल्पकमनसोवृत्तिर्ब्रह्मविद्या भगवद्गुणगरिमग्रथनरूपग्रन्थश्रवणादि भक्तिसाधनम् भगवद्विषयप्रेमप्रकर्षो भक्तिफलम् सर्वानर्थमूलाज्ञाननिवृत्तिर्ब्रह्मविद्याफलम् प्राणिमात्रस्य भक्तावधिकारः ब्रह्मविद्यायां हि साधनचतुष्टयसम्पन्नपरमहंसपरिव्राजकस्य यज्ञदानादिसुकृतसाध्यत्वं तु समं भक्तिब्रह्मविद्ययोः एवं च भक्तिब्रह्मविद्ययोरपि स्वर्गब्रह्मविद्ययोरिवैकफलसाधनभावाभावश्च तुल्यसाधनसाध्यत्वं च भविष्यति सामग्र्यैक्ये कार्य्यैक्यं न तु कारणमात्रैक्येऽतिप्रसंगात् ननु ब्रह्मविद्यातिरिक्तत्वे भक्तेः स्वर्गादिवन्निरतिशयपुमर्थत्वं न स्यादितिचेन्न स्वर्गादेर्नियतसाधनदेशकालशरीरेन्द्रियादिभोग्यत्वेन सर्वत्रोपभोक्तुमशक्यत्वात् क्षयित्वपारतन्त्र्यलक्षणदुःखद्वयानुविद्धत्वेन निरतिशयत्वाभावेपि भक्तिसुखधारायाः सर्वदेशकालशरीरेन्द्रियादिसाधारण्येन ब्रह्मविद्याफलवदुपभोक्तुं शक्यत्वात् क्षयित्वपारतन्त्र्यलक्षणदुःखद्वयानुवेधाभावेन निरतिशयत्वोपपत्तेस्तदुक्तं 'त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि यत्र क्व वाऽभद्रमभूदमुष्य किं को वार्थआप्तो भजतां स्वधर्मतः।नवै जनोजातु कथं च नाव्रजेन्मुकुन्दसेव्यन्यवदङ्गसंसृतिम् स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छन्न रसग्रहोयतः सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यन्ति हिची-

**अथ निराकारमीमांसां व्याख्यास्यामः । अथेतिपदमा**

र्णनिष्कृता, इत्यादि विस्तरस्तु वक्ष्यतेऽस्माभिः अतएव च न परिणतिविरसेन स्वर्गादिना साम्यम् एतेन लौकिकविषयरसवैलक्षण्यमपि व्याख्यातम् तस्यापि शास्त्राविहितत्वेन पापक्षयाहेतुत्वेनायतौदुःखसंस्पर्शित्वात् भक्तेस्तु दृष्टादृष्टफलतया महान् विशेषो वक्ष्यते नन्वेवं सतिभक्तिसुखाद्वैराग्यासंभवेन मुमुक्षुत्वासंभवात्तदधिकारिकचतुर्लक्षणब्रह्ममीमांसारम्भोनस्यादिति चेत्सत्यम् भक्तिसुखाऽऽसक्तान् प्रति तस्याअनारम्भात् भजनीयस्वरूपानिर्णयार्थं भक्तानामपि तद्विचारस्यावश्यकत्वाच्च भक्तिसुखाद्वैराग्यं नस्यादितित्विष्टमेवापादितं 'आत्मारामाश्चमुनयोनिर्ग्रन्थाअप्युरुक्रमे। कुर्वन्त्यहैतुकीम् भक्तिमित्थं भूतगुणोहरिरित्यादिना जीवन्मुक्तानामपि भगवद्भक्तिप्रतिपादनात् तस्मादनुभव तावत्साधुचरणोपासनया भगवद्भजनसुखं ततः स्वयमेव समाधानं प्रपत्स्यसे इत्यलमतिदूरधावनेन तदेतत्सर्वं श्रौतस्मार्तार्थविषयजातमिहखलुपरमकरुणावरुणालयोभगवान् श्रीगुरु नानकनिराकारदेवः कलिकल्मषं समुत्तितीर्षून् वैराग्यादिसाधनसम्पन्नानाधिकारिणः समुपलभमानः सूत्रयामास 'अथातोनिराकारमीमांसा' इत्यादिना चतुरध्यायीमनावृत्तिःकैवल्यादित्यन्तां तामेतां निराकारपरब्रह्मनिरूपणप्रधानां निराकारमीमांसाभिधानां विदंतिविद्वांसोनिर्मत्सरास्तांभाष्येणभूषयिष्यामीति

प्रतिज्ञां शिष्यावधानायाविष्कुर्वन्निराकारमीमांसासूत्राणि व्याख्यातुकामो भगवान् भाष्यकारस्तत्रतावत्प्रथमसूत्रमवतारयति अथ निराकारमीमांसामित्यादिना ननुमङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च सिद्धार्थायथास्युरिति महाभाष्यात् समाप्तिकामोमङ्गलमाचरेदितिशिष्टाचारानुमितश्रुतेश्च ग्रन्थादाववश्यकर्त्तव्यत्वेनप्राप्तस्य मङ्गलस्यादर्शनेनाव्याख्येयमिदं शिष्टाग्रणीभिरितिचेन्नाथशब्दोच्चारणेनैव सूत्रेभाष्ये च मङ्गलस्य कृतत्वात् शून्यवादनिराकरणेन निराकारशब्दस्यब्रह्ममात्रार्थकतया भाष्यकारैर्वक्ष्यमाणतया वस्तुनिर्देशात्मकमङ्गलस्य सम्पादितत्वाच्च 'आशीर्नमस्क्रियावस्तुनिर्देशोवापि तन्मुखम्, इतिमङ्गलस्य त्रैविध्याङ्गीकारात् तथाच स्मर्यते 'अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात्। स्मर्तृणां वरदत्वाच्च ब्रह्मतन्मङ्गलंविदुः' ॥इति॥ अथ शब्दस्यमङ्गलानन्तरारम्भप्रश्नाधिकारादिष्वर्थेषुकोशप्रसिद्धेषुकस्यार्थस्याथशब्दवाच्यताऽत्रविवक्षितेतिजिज्ञासायां संग्रहवाक्यं व्या-

रम्भार्थम् । निराकारमीमांसा नाम दर्शनं व्याख्यातुमारब्धं वेदितव्यम् । किं तन्निराकारं यस्यैषा मीमांसा व्याख्यातुमारब्धा प्रथमतस्तन्निरूपणीयम् निःस्वरूपमन्यद्वा । उच्यते न निःस्वरूपं तन्निरसिष्यमाणत्वात् । निरसिष्यामो यतो निःस्वरूपं निराकारं ततः परिशिष्टमभ्युपगच्छामः यद्धि सर्वसाकारनिरास्पदन्तन्निराकारं

---

ख्यातुकामो भाष्यकृदाह अथेति पदमिति ॥ गवित्ययमाहेत्यादिवदथशब्द इति शब्दशिरस्कत्वात्स्वरूपमात्रवचनः अतएव पदशब्देन सामानाधिकरण्यमुपपद्यते आरम्भार्थमिति ॥ सूत्रेऽथशब्दस्याधिकारिसमर्पकतयाऽऽनन्तर्यार्थकत्वेपि भाष्ये तस्यारम्भार्थकतैव युक्ता विवक्षानुरोधादिति भावः । पदार्थमुक्त्वा वाक्यार्थमाह निराकारेत्यादि वेदितव्यमित्यन्तेन, वाक्यघटकयावत्पदार्थबोधस्य वाक्यार्थबोधे हेतुत्वादत्र चाथशब्दार्थाभिधानेपि तद्घटकनिराकारशब्दस्यार्थमनुक्त्वा वाक्यार्थाभिधानमनुपपन्नं न चाकाररहितस्य निराकारशब्दार्थता प्रसिद्धेति तदनुक्तिरिति वाच्यम् शून्यस्यापि तद्रहिततया मीमांसापत्तेरित्याशयेनाह किं तादिति पूर्ववादी स्ववाक्यं विवृणोति यस्यैषेति प्रथमत इति वाक्यार्थाभिधानात्प्रथममित्यर्थः सार्वविभक्तिकस्तसिः निःस्वरूपमिति । निराकारशब्दस्याकाररहितार्थकत्वं बहुव्रीहिसमासेन सिद्धम् तत्र विशेष्यस्यानुक्तत्वादप्रकृतत्वाच्चानुपस्थितेरध्याहारे च शून्यस्याप्यध्याहारे बाधकाभावाभीष्टासिद्धिरिति भावः अन्यत् आचार्यस्याभिमेतं अत्रोपक्रमे निराकारशब्दादविशेषेण शून्यप्रतीतावपि वक्ष्यमाणशून्यनिरासग्रंथपर्यालोचनया शून्यस्वरूपस्यैवासिद्धिस्तन्मीमांसाया निष्प्रयोजनत्वादिकं च वक्ष्यमाणमिति न शून्याध्याहारे बाधकाभाव इति भावेन सिद्धान्तवादी समाधत्ते उच्यते इत्यादिना तत् निराकारशब्दवाच्यम् निरसिष्यमाणत्वादिति निःस्वरूपाग्रहणे हेतुः । संगृहीतं विवृणोति निरसिष्याम इति स्वरूपतः प्रयोजनादितश्च शून्यं प्रत्याख्यास्याम इति हेतोरत्र परिशिष्टं निराकारमङ्गीकुर्म इत्यर्थः शून्यभिन्नं किं प्रकृतिपरमाण्वादिकं निराकारमिह विवक्षितमिति चेन्नेत्याह यद्धीत्यादि । आस्पदमधिष्ठानम् चिदाकारमिति ॥ प्रकृतिपरमाण्वादिनिरासस्यापि वक्ष्यमाणत्वादिति भावः परमित्यस्य विवरणं निर्विशेषमिति निराकारस्य परब्रह्मत्वोक्त्या साकारस्य त-

चिदाकारं परं ब्रह्म निर्विशेषमभ्युपगच्छामः । अथ साकारं न परं ब्रह्म साकारं किं निराकारं परं ब्रह्म न प्रपद्यसे न प्रपद्ये साकारत्वात् । परं ब्रह्म हि चिदाकारं निराकारं कथं प्रपद्ये साकारमचिदाकारं साकारं वाऽचिदाकारं निराकारं चिदाकारं परं ब्रह्म । कथन्तर्हि श्रुतिराचष्टे स्पष्टं "सर्वं खल्विदं ब्रह्म" इति यदि साकारं न निराकारं परं ब्रह्म प्रपद्यसे तदा कथं सर्वं ब्रह्मेति श्रौतं सामानाधिकरण्यं समर्थयसे अहं तु पश्यामि सर्वं ब्रह्मेति सामानाधिकरण्येन श्रौतेन साकारमपि निराकारं परं ब्रह्मेति खलुशब्दाच्च । श्रौतो हि खलुशब्दोऽयोगं व्यवच्छिनत्ति सर्वं यदब्रह्मेति मन्यध्वे नैवं मन्यध्वं मन्यध्वं तु सर्वं ब्रह्मेति नाणुमात्रमप्यब्रह्मास्तीति तात्पर्यपर्यवसानाच्छ्रुतेः प्रपद्यस्व साकारमपि निराकारम् । मैवम्भावानवबोधात्

---

दनात्मकस्य सद्भावप्रसङ्गाद् द्वैतापत्तिरतः साकारस्यापि परब्रह्मात्मकताऽभ्युपेतव्येति शङ्कते । अथेति । बहुशो भाष्येऽथशब्दः प्रश्नार्थो बोद्धव्यः । साकारस्य कल्पितत्वेनाधिष्ठानतादात्म्यमनुपपन्नमित्याशयेन समाधत्ते न प्रपद्ये इति साकारत्वादिति उपलक्षणमिदं निराकारत्वस्यापि । अतएव विवरण भाष्य उभयत्र विरुद्धविशेषणोपन्यासः विवरणभाष्यं स्पष्टम् साकारनिराकारयोस्तादात्म्यानङ्गीकारे श्रौतसामानाधिकरण्यविरोधमापादयति कथं तर्हीति स्पष्टमिति सामानाधिकरण्योक्तिः श्रुतितात्पर्यार्थं स्वमतेन वक्तुं स्ववाक्यं विवृणोति पूर्ववादी यदि साकारमित्यादिना सामानाधिकरण्यमिति मृद्घट इतिप्रभृतिवाक्यवत्सर्वं ब्रह्मेति सामानाधिकरण्येन तादात्म्यनिर्णय इति तद्विरोधस्ते मते भवेदिति भावः स्वमते श्रौतसामानाधिकरण्यस्यानुकूलत्वमाह अहं तु पश्यामीति परं ब्रह्मेति इति शब्दः सामानाधिकरण्यवादसमाप्त्यर्थः सामाधिकरण्यश्रुतिरिव खलुपदश्रुतिरपि सर्वसाकारस्य ब्रह्मतादात्म्यमभिदधाति अन्यथा खलुपदप्रयोगो निरर्थकः स्यादित्याह खलुशब्दाच्चेति । स्वसंग्रहवाक्यं पूर्ववादी विवृणोति श्रौतो हीत्यादि । अयोगव्यवच्छेदो हि एवकारार्थस्तदर्थक एवात्र खलुशब्द इति भावः सर्वखलुपदविशिष्टवाक्या-

न हि श्रुतेर्भावमवाबोधि भवान् नैषा श्रुतिः सर्वं साकारं निराकारं परं ब्रह्म ग्राहयामीत्यभिसन्धाय प्रवृत्ता अपि तु साकारं किंचिदपि नातिरिच्यते निराकारादिति कथमेवमवगम्यते एवमभिसन्धाय प्रवृत्ता श्रुतिरेवं चानभिसन्धाय प्रवृत्तेति कथमवगम्यते भवता। तादात्म्यानुपपत्तेरनतिरेकोपपत्तेश्च चिदचितोर्हि तादात्म्यं नोपपद्यते ततोऽवगम्यते नैवमभिसन्धाय प्रवृत्तेति अनतिरेकरचा-

---

र्थमाह नाणुमात्रमपीति'श्रुतेस्तात्पर्यपर्यवसानादित्यन्वयः। शाब्दबोधे हि तात्पर्यज्ञानं कारणमत्र च साकारनिराकारयोश्चिदचितोस्तादात्म्ये श्रुतेस्तात्पर्याभावान्न मृद्धट इत्यादिवाक्यस्येव तयोस्तादात्म्यं श्रुत्यर्थः किन्तु बाधार्थां सामानाधिकरण्यामिदं स्थाणुः पुरुष इत्यादिवाक्यस्येव तत्र च यथा स्थाणुमात्रमवशिष्यते पुरुषस्य कल्पितस्य बाधेन तथात्रापि सर्वसाकारबाधेन ब्रह्ममात्रमवशिष्यत इत्याशयेनाह नैवमिति अवाबोधिपदं कर्तृलुङन्तं दीपजनेत्यादिना चिण् भावशब्दस्तात्पर्यवाची निराकारादिति इत्यभिसन्धाय प्रवृत्तेति पूर्वस्मात्सम्बन्धः मुख्य-

---

भाषार्थः—हरिःओं। श्रीगुरुपरमात्मने नमः॥ निराकारमीमांसा का आरम्भ करे हैं ( शंका ) निराकार क्या वस्तु है शून्य को निराकार कहते हो वा कोई अन्य वस्तु का नाम निराकार है ( समाधान ) शून्य का आगे खण्डन करेंगे इसवास्ते इहां शून्य का नाम निराकार नहीं है किन्तु सर्व साकार प्रपंच के अधिष्ठान को निराकार कहे हैं सो निराकार परब्रह्म है ( शंका ) साकार क्या परब्रह्म नहीं है साकार को भी "सर्वं खल्विदं ब्रह्म" यह श्रुति निराकार ब्रह्मरूप कहे है इसवास्ते साकार का भी निराकार को स्वरूप ही माननां चाहिये। ( समाधान ) "सर्वं खल्विदं ब्रह्म" यह श्रुति सर्व साकार को निराकार ब्रह्मरूप नहीं बोधन करे है किन्तु साकार कोई पदार्थ बी निराकार से अतिरिक्त नहीं है अर्थात् निराकार से भिन्न सत्ता साकार की नहीं है किन्तु निराकार ही सत् है साकार सर्व असत् है मिथ्या है भ्रम से कल्पित है ( शंका ) सर्व साकार निराकार स्वरूप है इस अर्थ में श्रुति का तात्पर्य नहीं है और निराकार से अतिरिक्त साकार नहीं है इस अर्थ में श्रुति का तात्पर्य है यह कैसा निर्णय होसक्ता है ( समाधान ) निराकार

चिताश्चित उपपद्यते ततोऽवगम्यत एवमभिसन्धाय प्रवृत्तेति । उपपत्त्यनुपपत्ती हि वाक्यार्थाभिसन्ध्यनभिसन्ध्योर्हेतू भवतः यो वाक्यार्थ उपपद्यते तस्मिन्नभिसन्धिर्वाक्यस्य निश्चीयते यश्च वाक्यार्थो नोपपद्यते न तस्मिन्नभिसन्धिस्तस्य कल्प्यते अथानुपपन्नमपि खलुशब्दोपपन्नमभ्युपगम्यम् । यद्यपि चिदचितोस्तादात्म्यमनुपपन्नं भाति तथापि खलुशब्देनाभिहितमिति मन्यतामुपपन्नं कथमन्यथा शब्दे प्रत्ययदार्ढ्यं भवेद्भवेत्तु तर्कै तथा कटकादिवच्चेदमुपपन्नं प्रपद्यस्व यथा हि कटकादयः कलधौततादात्म्यं भजमाना अनुभूयन्ते तथेदं सर्वं साकारं चिद्भिन्नतया भातमपि चित्तादात्म्यं भजमानमनुभूयतां

---

सामानाधिकरण्ये न तात्पर्यं वाधायां सामानाधिकरण्ये च तात्पर्यमित्यत्र हेतुम्पृच्छति । कथमेवमिति । उपपत्तिरेव मदुक्ते तात्पर्ये बीजमनुपपत्तिश्च भवदुक्ते इत्याह सिद्धान्ती तादात्म्यानुपपत्तेरित्यादिना तादात्म्यविषये विचारो भाष्य एव भविष्यति ततो नाहं वच्मि अचितः षष्ठ्यन्तम् चितः पञ्चम्यन्तं उपपत्तेर्वाक्यार्थतात्पर्यबोधहेतुत्वं दर्शयति उपपत्त्यनुपपत्ती हीति अनुपपत्तिग्रहणमुपपत्तेरेव हेतुत्वदार्ढ्याय स्वव्यतिरेकेण कार्यव्यतिरेके स्वस्य हेतुत्वदार्ढ्यादिति बोध्यम् तस्मिन् वाक्यार्थे तस्य वाक्यस्य अभिसन्धिशब्दस्य तात्पर्यमर्थः ननु अर्थस्योपपत्तिर्हि प्रमाणेनावाधनिश्चयः सच न शाब्दबोधे हेतुर्वाक्यार्थस्यापूर्वत्वादिति शङ्कते अथानुपपन्नमपीति खलुशब्दोपपन्नमिति । खलुशब्दोलंकारे खलुशब्देन श्रौतेनोपपन्नमिति वा एवमग्रेपि खलुशब्देनाभिहितमित्यत्राप्येवमेव वर्णनीयम् पूर्ववादी संग्रहवाक्यं स्वयं विवृणोति यद्यपीत्यादिना उपपत्तेः सर्वत्र शाब्दप्रमायां हेतुत्वे शाब्दप्रमितेर्लोपापत्तिः सर्वत्र प्रमान्तरसिद्धस्यैवार्थस्य शब्देनानुवदनादित्याह कथमन्यथेति प्रत्यक्षस्थले परोक्षज्ञानानुदयात्तर्के इत्युक्तम् प्रमाणान्तरेणानुपपन्नस्यापि शब्दप्रमाणेनाभिधानमभिधाय तादात्म्योपपत्तिमपि दृष्टान्तेन दर्शयन् उक्तानुपपत्तिमुत्सादयति कटकादिवच्चेति । इदं चिदचितोस्तादात्म्यम् । दृष्टान्तं स्फोरयन्संग्रहं व्याचष्टे यथाहीति को ह्यस्ति

को ह्यस्ति विशेषःअयमस्ति विशेषः । परिणामापरिणामभेदो विशेषः युक्तं यत्कलधौततादात्म्यं कटकादयो भजमाना अनुभूयन्ते इति कलधौतपरिणामत्वात्तेषाम् ते हि कलधौतस्य परिणामविशेषास्तत्तादात्म्यं भजेरन् इति युक्तमेव न पुनर्युक्तं साकारं विकार्यं चिन्निर्विकारनिराकारचित्तादात्म्यं भजत इति कुतः अनतिरेकात् न ह्यत्रापि मृद्घटादिवत्परिणामचर्चा भवति तथासति निराकारा

---

विशेषः परिणामवादस्योभयत्र तुल्यत्वान्न कश्चिद्विशेष इत्यर्थः । निराकारस्य निर्विकारतासिद्धये प्रकृते परिणामवादमेव पूर्वमपवदन्नाहत्य समाधत्ते अयमस्तीति कटकादयः कलधौतपरिणामाः साकारस्य तु न निराकारपरिणामतेति विशेष इत्याह परिणामापरिणामेत्यादि व्याचष्टे युक्तमित्यादिना तत्तादात्म्यानुभवे हेतुमाह कलधौतेत्यादि तेषां कटकादीनाम् । विवृणोति ते हीति कटकादयो हीत्यर्थः प्रकृते चोभयोः स्वरूपादितो विरुद्धत्वान्न तादात्म्यप्रत्ययः प्रमेत्याह न पुनरित्यादि अत्र वाक्ये चिदचितोर्विरोधोपस्थापकानि पदानि स्पष्टान्येव । ज्ञात्वापि पदेभ्यो विरोधं स्पष्टप्रतिपत्त्यर्थमज्ञातेव हेतुं पृच्छति कुत इति॥ पूर्वोक्तसंग्रहवाक्यैकदेशमवशिष्टं विवृण्वन्नुत्तरमाहानतिरेकादिति । अनतिरेकमेव व्याख्यास्यन्ननभिमतं निषेधति नहीति । तथासति साकारस्य निराकारपरिणामत्वाभ्युपगमे सति भवतु चिदपि तथा किन्नश्छिन्नमधिकं प्रविष्टं न च तद्धानि-

---

साकार का तादात्म्य ( अभेद ) नहीं बनसके है निराकार चेतनस्वरूप है और साकार जड़स्वरूप है जड़ चेतन का अभेद असम्भव है, इसवास्ते जानते हैं इस अर्थ में श्रुति का तात्पर्य नहीं है । और जड़ पदार्थ की चेतन से अतिरिक्त सत्ता नहीं सिद्ध होवे है इसवास्ते जानते हैं इस अर्थ में तात्पर्य है । जो वाक्यार्थ युक्तिसिद्ध होवे उस में वाक्य का तात्पर्य होवे है और जो वाक्यार्थ युक्तिविरुद्ध होवे है उस अर्थ में वाक्य का तात्पर्य नहीं होवे है ( शंका ) अर्थ युक्तिसिद्ध न होवे तौ भी शब्दप्रमाण से मानना योग्य है । और जैसे भूषण सुवर्ण से अभिन्न है वैसे साकार भी निराकार से अभिन्न मानना योग्य है इस में क्या विशेष है ( समाधान ) यह विशेष है सुनो भूषण सुवर्ण का परिणाम होने से सुवर्णाभिन्न है और साकार संसार निराकार का परिणाम मानोगे तौ चेतन भी विकारी हो जावेगा तब साकार

चिदपि विकारभावमनुभवन्ती साकाराऽचिच्च भवेत् तथा च सा नाचित्कल्पनास्पदं भवेत्स्वस्यापि तदवशेषान्निरधिष्ठानभ्रमो वाऽनवस्था वा प्राप्नुयादिति चिति जर्हीहि परिणामचर्चामनर्थकरीम् भवति त्वत्रानतिरेकचर्चा नाचित्किंचिदपि चितोऽतिरिच्यते जगदिति ॥ तदतिरेकेण निरूपयितुमशक्यत्वात् चिदतिरिक्तसत्ताकत्वे हि सत्यचिन्निरूपयितुमपि शक्येत न तु तथास्ति चित्सत्तयैवाचितो भानात् । तदविनाभावाच्च । चिदविनाभूतैव खल्वचिद्भाति ततो नातिरिच्यते चितोचित् अथ चिदप्याचिताऽविनाभूता

---

रिति न्यायादिति चेत्तत्राह तथाचेति, सा चित्, स्वस्य, अचितः, स्वशब्दस्यात्मवाचकत्वात्स्वीत्वाभावः तथा च कोशः 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये' इत्यादिः, तदवशेषात्, विकारित्वावशेषात्, निराधिष्ठानेति, तथा च सर्वशून्यतापत्तिः स्यादिति भावः । ननु चितो विकारित्वेन कल्पितत्वेपि न निरधिष्ठानभ्रमस्तदधिष्ठानस्यान्यस्य कस्य चित्सम्भवादिति चेत्तत्राहानवस्था वेति चिदचिद्भिन्नस्यासम्भवान्न चिद्भ्रमाधिष्ठानता तस्य कथंचित्कल्पने च तत्राप्येवं भावादनवस्था भवेदिति भावः, मुख्यसामानाधिकरण्यम् प्रत्याख्याय बाधायां सामानाधिकरण्ये श्रुतेस्तात्पर्यन्निरूपयति भवतीति, अत्र चिदचिद्विषये, अनतिरेकचर्चामेव वर्णयति नाचित्किंचिदिति, अचिज्जगदित्यन्वयः किं चिदिति, सर्वशब्दस्वारस्येन लब्धमिदम् अनतिरेके हेतुमाह तदतिरेकेणेति, तथाचाचित्सर्वं जगच्चिदतिरेकेण न सेद्धुमर्हं तथा निरूपणानर्हत्वात् स्थाणुपुरुषवदिति प्रयोगः सूचितः । एतदेव व्यतिरेकमुखेन निरूपयति, चिदतिरिक्तसत्ताकत्वे हीति । कथं तर्ह्यचितो भानमिति चेन्नाधिष्ठानसत्तयैव कल्पितस्य भानसम्भवेऽतिरिक्तसत्ताया अप्रमाणिकत्वादित्याह चित्सत्तयैवेति । अचितश्चितोऽनतिरेके हेत्वन्तरं दर्शयति । तदविनाभावाच्चेति । विवृणोति चिदविनाभूतैवेति ॥ तद्भानाधीनभानादपि चितोऽनतिरिक्तमचिज्जगदिति भावः चिदचितोर्वा भाने व्यभिचाराव्यभिचारप्रदर्शनपरं भाष्यम्, अतएवाग्रिमशङ्काभागोपि संगच्छते, चिद्भानेपि देहेन्द्रियादेरचितोऽवश्यापेक्षणात्तस्यापि मिथ्यात्वं स्यादिति शङ्कते अथेति ॥ चितः स्वरूपभाने वृत्तिस्वरूपेऽचितोपेक्षणेपि

भातीति को विशेषः अयं विशेषो यच्चित्त्वं चित्त्वादेव चिदपि तथा भवितुमर्हति समाधिसुषुप्तयोश्च विना भावः समाधिसुषुप्तयोर्हि विनाप्यचित्सम्पर्कं स्वरूपज्योतिषैव चिद्भाति । श्रूयते च श्रूयते चावितथता चितस्ततो न चित्समानयोगक्षेमा भवितुमर्हत्यचिदिति दिक् । अथाचिदित्युच्यते सा पुनर्नातिरिच्यते चित इत्यभिधीयते रिक्तमेतत् याहि चित्सातिरिच्यतैवाचितश्चित्त्वात् । तथाऽचिदपि चितोऽचित्वादेवेति रिक्तमिदमुच्यतेऽनतिरेक-

---

स्फुरणरूपे तस्मिन्नाचिदपेक्ष्यते इत्याह अयमिति चित्त्वं स्वप्रकाशत्वमित्यर्थः । तथैव विवृणोति चित्त्वादेवेति अवितथा सत्या । कुत्रेन्द्रियापेक्षामन्तरेण स्वरूपतश्चिद्भातीत्यपेक्षायामाह समाधिसुषुप्तयोश्चेति स्वाशयं साक्षात्प्रकाशयन्संग्रहवाक्यं व्याचष्टे समाधिसुषुप्तयोर्हीति स्वप्ने मनसः सद्भावात्सुषुप्तिग्रहणम् सुप्तोत्थितस्य परामर्शेन सुषुप्तौ भानानुमानं बोध्यम् अवितथा भवितुमर्हतीति प्रतिज्ञातेर्थे श्रौतं हेतुमाह श्रूयते चेति । चिदवितथेति सम्बन्धः पूर्वस्मात् ' अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्राऽसंसर्गस्तस्य भवतीति ' श्रुतेरविनाशी चिदात्मा ततो नाचिदनित्या तेनाभिन्नो भवितुमर्हतीति तात्पर्यं संग्रहवाक्यस्य व्याचष्टे श्रूयते चावितथतेति चशब्दश्चित्सत्यतासाधकं प्रमाणान्तरं समुच्चिनोति चशब्दसूचितं दिक्शब्देनापि सूचयति इति दिगिति आत्मनो विनाशित्वे साक्षिप्रमाणयोरनिरूपणस्याग्रेऽभिधास्यमानत्वादविनाशित्वेन सत्यत्वमर्थतः सिद्धमित्यादिर्दिगर्थः शङ्कते अथाचिदित्युच्यते इति अचिच्चिदिति विरुद्धार्थकशब्दाभिधानादेव चिदचितोऽतिरेकः सिद्ध्यतीति विरुद्धमभिहितमनतिरेकस्तयोरिति शङ्काग्रन्थार्थः अचिच्चितोऽतिरिच्यते तद्विरुद्धस्वभावत्वाद्यद्धि यद्विरुद्धस्वभावं तत्ततोऽतिरिच्यत एवेति सामान्यमुख्यव्याप्तिश्चिदेवेति दृष्टान्तभूमिस्तत्स्फोटनाय सिद्धान्त्यभिमतं चितोचिद्भिन्नत्वमनुवदति या हीति ॥ चित्वात् ॥ सामान्यव्याप्तौ विरुद्धस्वभावत्वार्थकमिदम् दृष्टान्तं प्रसाध्य दार्ष्टान्तिकमाह तथाऽचिदपीति चिदचितोः परस्परं भेदो विरुद्धस्वभावत्वात्तेजस्तिमिरवदित्यनुमाने च तात्पर्यं बोध्यम् । उक्तमेव स्मारयन्समाधत्ते न रिक्तमित्यादिना । हेतुं पृच्छति कुत इति

श्चितोऽचितइति, न रिक्तमुक्तत्वात् । न रिक्तमुक्तं निराकारदर्शिना कुत उक्तत्वात् । उक्तमेतदचिन्न चितोतिरेकेण निरूपयितुं शक्यत इति या तदन्यतामश्नुवीत निषेधमात्रत्वाच्च । चितो हि निषेधोऽचिदित्युच्यते सतो निषेधोऽसदिव । नहि चिन्निषेधमन्तरेणाचित्कश्चित्पदार्थः योऽन्यश्चितो भवेत् सतोऽन्योऽसन्निव । तदभानप्रयुक्तत्वाच्च । चिदभानप्रयुक्तैवाचित्स्वात्मानं लभते घटाभानप्रयुक्त इव घटनिषेधात्मा घटाभावः सदभानप्रयुक्तो वा सन्निषेधात्मेवासन् तस्मान्न कटकादिवदचित्साकारा निराकारचित्तादात्म्येन भातुमर्हति विरुद्धत्वाच्च । नहि कि-

---

हेतुमाह उक्तत्वादिति । उक्तं स्मारयति उक्तमेतदित्यादिना । तदतिरिक्तसत्तायां प्रमाणाभावान्नाचिच्चितोऽतिरिच्यते विरुद्धस्वभावत्वन्त्वाविघ्नकमितिभावः धर्मिणः सद्भावे तस्मिन्कुतश्चिद्भेदोपि सिद्ध्यति तस्यैवासिद्धौ तु कथं स सिद्ध्येभिरनुयोगिकभेदानभ्युपगमादित्याह निषेधमात्रत्वाच्चेति । मात्रग्रहणेनातिरिक्तसत्त्वापवादः सूच्यते संग्रहं सदृष्टान्तं विवृणोति चितो हीति । यथाहि भवतापि सतो निषेधोऽसत्पदार्थो नाभ्युगम्यते कश्चित् वस्तुनिषेधस्यावस्तुत्वादेवं चितो निषेधोपि न कश्चित्पदार्थ इत्यर्थः असदिति सामान्ये नपुंसकम् ' उक्तमुपपादयति नहीत्यादिना ' असन्निति पदार्थसामानाधिकरण्येन पुंस्त्वम् । एवमप्यभावोऽतिरिच्यते एव प्रतियोगिन इत्यचितश्चितोऽतिरेकः सिद्ध एवेति शङ्कमानम्प्रत्याह तदभानप्रयुक्तत्वाच्चेति, नास्मन्मतेऽभावो नाम कश्चित्प्रतियोगीव पदार्थोस्ति योऽतिरिच्येत प्रतियोगिनः किन्तु प्रतियोग्यभानमेवाभावोऽभिधीयते तथा च चितोऽभानस्यैवाचित्त्वान्नातिरेकसिद्धिरिति भावः दृष्टान्तमत्रापि प्रदर्शयन्व्याचष्टे चिदभानप्रयुक्तैवेति, स्वात्मानं, प्रातिभासिकस्वरूपताम्, घटाभानेति । यथा हि सांख्यादीनां कैवल्यलक्षणादधिष्ठानान्नातिरिच्यते घटाभावादिस्तद्वदित्यर्थः, सर्वसाधारण्येनाह सदभानेत्यादि, चिदचितोरतादात्म्ये विरोधं हेतुमाचष्टे विरुद्धत्वाच्चेति, प्रमाणं कर्तृ । तददिमर्थयोरिति, सोयं देवदत्त इत्यादियथार्थवाक्याभिप्रायेणेदम्, एवकारो भिन्नक्रमः ऐक्यमित्यस्या-

ऽपि प्रमाणं सद्विरुद्धयोस्तेजस्तिमिरयोरिवैक्यमावेदये-दविरुद्धयोस्तु तदिदमर्थयोरिवैक्यमावेदयेदेव,कथमन्यथा प्रमाणतां भजेद् भजेत्त्वप्रमाणतामिदं रजतयोस्तादात्म्यावेदकवत् । अथ प्रमाणावेदिततादात्म्यादविरोधमेव

---

नन्तरं द्रष्टव्यः ऐक्यमेवावेदयन्न तु नानात्वं वक्ष्यमाणदोषादिति बोध्यम्,विरुद्धयोरैक्यावेदनेऽविरुद्धयोश्च नानात्वावेदने प्रमाणस्य स्वविघातकत्वं दोषमाह कथमन्यथेति । अन्यथा विरुद्धयोरैक्यावेदनेऽविरुद्धयोश्च नानात्वावेदने प्रमाणताम् अबाधितार्थबोधकताम्। भजेत्। आलम्बेत। प्रत्युत प्रमाणस्याप्रमाणतापत्तिरित्याह भजेत्त्विति । अप्रमाणतायां दृष्टान्तमाह इदं रजतयोरिति इदं रजतमिति भ्रमबोधाभिप्रायेणेदम् । ननु प्रकृते विषययोरविरोध एव कुतो न प्रमाणबोधितत्वादाश्रीयते ततो न दोषद्वयं प्रसज्यते इति शङ्कते अथेति, अविरोधमिति, चिदचितोरिति सम्बन्धः प्रकरणात् यदि प्रमाणाधीना विषयव्यवस्था भवेत्तदा प्रमाणावेदितत्वाद्विरुद्धयोरपि तादात्म्यं स्वीकुर्मो न त्वेवं प्रत्युत विषया-

---

जड़ हो जावेगा इसवास्ते परिणामिदृष्टान्तइहां नहीं बने है परिणामकथा चेतन में नहीं होसके है चेतन से अनतिरिक्त अचेतन है यह कथन इहां होसके है चेतन से अतिरिक्त अचेतन का स्वरूपनिरूपण नहीं होवे है चेतन से अतिरिक्त अचेतन की सत्ता किसी प्रमाण से सिद्ध नहीं होवेहै। इसवास्ते अचेतन का चेतन से अतिरिक्त स्वरूपनिरूपण नहीं होवे है और चेतन से विना अचेतन की प्रतीति कहीं नहीं होवे है।इसवास्ते भी अचेतन अतिरिक्त निरूपण नहीं होवे है। और अचेतन से विना भी समाधि सुषुप्ति में चेतन का भान होवे है इसवास्ते चेतन की स्वतंत्र सत्ता है,(शंका)चेतन को चेतनस्वरूप होने से अचेतन से अतिरिक्त मानना उचित है और अचेतन को अचेतनस्वरूप होने से चेतन से अतिरिक्त मानना उचित है। ( समाधान ) अचेतन को चेतन से अतिरिक्त निरूपण न होने से अतिरिक्तता सिद्ध नहीं होवे है चेतनका निषेधमात्र ही अचेतन है अचेतन स्वतंत्रसत्तावाला नहीं है और जैसे घट के अभाव से ही घटाभाव व्यवहार होवे है वैसे ही चेतन के अभाव से ही अचेतनव्यवहार होवे है अचेतन कोई स्वतंत्र पदार्थ नहीं है इसवास्ते भूषण सुवर्णादि के वत् चेतन निराकार का अचेतन साकार से अभेद सम्भव नहीं है किन्तु चेतन ही सत्य है अचेतन नाम मात्र है.और चेतन अचेतन को परस्पर विरुद्ध होने से भी अभेद को

कुतो नाभ्युपैषि अत्राभिधीयते तत्तादात्म्ये सति तत्प्रमाणं न तु तत्प्रमाणमिति तत्तादात्म्यं प्रमाणताया विषयनिरूप्यत्वात् । अपरथा रङ्गरजतयोरपि प्रमाणाधीनतादात्म्यमभ्युपगच्छतः कस्ते प्रतिमल्लः तत्र बाधकं चेदत्रापि निरीक्षस्व वेदचक्षुषा । स्फुटं भानाच्च शब्दप्रतीतितो विरोधस्य, चिदचितोर्हि विरोधः शब्दात्प्रतीतेश्च स्फुटं भासते । चिदचिच्छब्दौ घटाघटशब्दाविव परस्परविरुद्धार्थावभिधत्तस्ततस्तयोः शब्दमर्यादयापि स्फुटो भासते विरोधः एकशब्दस्य केवलत्वादपरस्य च नञा समस्तत्वात् तथा तत्प्रतीतीअपि घटाघटप्रतीती इव परस्परवि-

---

धीना प्रमाणव्यवस्थेति न चिदचितोस्तादात्म्यसिद्धिरित्यभिप्रायेणाह अत्राभिधीयत इति, तत्तादात्म्ये इति । तयोश्चिदचितोस्तादात्म्ये इति विग्रहः तत्प्रमाणं तादात्म्यावेदकं वेदवचः कुतो न प्रमाणाधीनं विषयस्याबाधितत्वमिति जिज्ञासायां हेतुमाह प्रमाणताया इति, विपक्षेऽनिष्टापात्तिं दण्डमाह अपरथेति, प्रमाणाधीनविषयव्यवस्थाऽभ्युपगमे, ननु तत्र नेदं रजतमिति बाधोदयादिदं रजतमिति ज्ञानस्य प्रमाणतैव नास्ति कुतस्तदधीनस्तयोस्तादात्म्यप्रसङ्गोऽत आह तत्रेत्यादिना, अत्रापि । अचित्तादात्म्येपि , वेदेति, नेह नानास्ती'त्यादिवेदेन चिति अचित्तादात्म्यस्य निषेधान्न तादात्म्यांशे तत्प्रमाणतेति भावः 'श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते । एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तित'इति स्मृतेराह चक्षुषेति । विरुद्धत्वमेव तयोः कथमिति शंकायामाह स्फुटंभानाच्चेति । शब्दप्रतीती हि विषयसद्भावसाधिके ये ते एव परस्परविलक्षणपदार्थसाधिके विरोधमपि तयोरर्थात्साधयतस्तेजस्तमःप्रतीती इव तस्मान्नानयोस्तादात्म्यं वेदप्रमाविषय इति भावः शब्दप्रतीतित इति पञ्चमीद्विवचनान्तात्तसिरित्याशयेन विवृणोति चिदचितोरिति, कथं भासत इत्यत आह चिदचिच्छब्दाविल्यादिना, घटाघटशब्दाविवेति, परमतेन दृष्टान्तः स्वमते घटशब्दस्य चिच्छब्दसमानयोगक्षेमत्वाभावात् । अभिधत्त इति, चिदचिच्छब्दयोः कर्तृत्वाद् द्विवचनम् शब्दमर्यादया शब्दस्य स्वार्थमात्रसामर्थ्यपर्यालोचनया । अपिशब्दः स्वरूपपर्यालोचनां संगृह्णाति प्रतीत्यंशं विवृणोति तथेत्यादि, तत्प्रतीती । चिदचि-

रुद्धाविवार्थौ ग्राहयतस्ततस्तयोर्विरोधोऽयत्नसिद्ध एव अत्र कश्चिदाचष्टे । योग्यताविरहाच्च । योग्यताविरहे खलु वेदोऽपि तयोस्तादात्म्यं नावेदयति प्रमाणसामान्यात् । न हि प्रमाणं सद्वेदो योग्यताविकलयोरैक्यमावेदयेदावेदयेच्चेन्न प्रमाणतामश्नुवीत कुतो मूर्धाभिषिक्तप्रमाणताम् न चायोग्यैक्यलोभाद्वेदाप्रामाण्यमप्युन्मत्तवदभ्युपैतुमर्हति भवान् तथाप्यैक्यालाभेन लोभनैष्फल्यात् यदि चात्र निर्बन्धस्तर्हि यूपादित्ययोर्यजमानप्रस्तरयोश्चा- "दित्यो यूपो यजमानः प्रस्तरः" इति श्रौतसामानाधिकरण्येनाभ्युपेयतां तादात्म्यमभ्युपेयतां च गुणवादाधि-

---

त्प्रतीती । यस्माच्छब्दप्रतीती एव चिदचितोर्विरोधं साधयतस्तस्मान्नानुमानादिप्रयोगे यत्नो विधेय इत्याह ततस्तयोरित्यादिनाऽयत्नसिद्ध एवेत्यन्तेन, अत्रैवाचार्यदेशीयस्य मतमाविष्करोति अत्र कश्चिदिति । योग्यताविरहाच्चेति । चकारो भाष्योक्तपूर्वहेत्वन्तरापेक्षः व्याचष्टे योग्यताविरहे खल्वित्यादिना वेदोपीत्यपिना प्रमाणान्तराणामुपग्रहः कुतो नावेदयतीत्यत आह प्रमाणसामान्यादिति । सर्वप्रमाणैः स्वप्रमाणतारक्षणायायोग्यैक्यं न बोध्यत इति भावः । एतेन योग्यतापदेन तज्ज्ञानं लक्ष्यते विषयेण विषयिणो लक्षणात् तथा च शाब्दबोधकारणत्वेन क्लृप्तयोग्यताज्ञानाभावान्न शाब्दबोधोदय इत्यर्थ इत्यपास्तं हेतुवाक्यासामञ्जस्यापत्तेर्योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मानाभावाच्चेति संक्षेपः । उपपादयति न हीत्यादिना । विपक्षे दण्डमाह आवेदयेच्चेन्न प्रमाणतामिति, अप्रमाणतां चाश्नुवीतेत्यपि बोध्यम् मूर्द्धेति यद्विरोधेऽन्यदप्रमाणं तत्वम् । ननु मास्त्वत्र वेदस्य प्रामाण्यमैक्यं तु तयोर्हातुं न शक्यत इति वदन्तं प्रत्युपहसति, न चायोग्येत्यादिना । यद्बलादयोग्ययोरैक्यं गृह्णासि तस्यैव त्यागे कुतस्तल्लाभइत्युपहासबीजमाविष्करोति तथापीति, वेदाप्रामाण्येपीत्यर्थः कृतमुपहासमविद्वांसं सामानाधिकरण्यश्रुत्या चिदचितोस्तादात्म्यमेव मन्वानं मत्याह यदि चेति । निर्बन्धः । आग्रहः । यूपादित्ययोर्यजमानप्रस्तरयोश्च तादात्म्यमभ्युपेयतामित्यन्वयः । भवतु तथा किन्नश्छिन्नमधिकप्रवेशेऽप्युपात्ताप्रहाणेरित्युन्मत्तवत्प्रलपन्तं मत्याह अभ्युपेयतां चेति । तथा च निरूपयिष्यमाणगुणवादाधिकरणविरोधः

करणमुन्मत्तप्रलपितमिति विरमोन्मत्तप्रलापात् । अयमपि प्राज्ञोविरुद्धत्त्वमेवायोग्यताभिधानेनाभिदधाति चिदचितोरिति सोपि तथ्यमभिदधाति । एकतापत्तेश्च । एकता चैवं सति तयोः प्राप्नुयात् तथा सति "विज्ञानं चाविज्ञानं चे"ति वैदिको विभागो विरुध्येत न च चैतन्योद्भवानुद्भवाभ्यां विभागोपपत्तिः । एकत्त्वे चैतन्यानुद्भवकारणानिरूपणप्रसङ्गात् । अचिदपवादाच्च । "नेह नानाऽस्ति किंचने"ति वेदेन चिदतिरिक्तस्यापवादाभिधानेन न चिदचितोस्तादात्म्यमभिसन्दधाति श्रुतिः यदि हि "सर्वं

---

तत्रेष्टापत्तिस्तून्मादापत्तेरशक्येत्याह इतिविरमेति । आचार्यदेशीयोक्तेरपिस्वानुकूलत्वमाह अयमपीति, चिदचितोस्तादात्म्येऽभ्युपगते एकस्यापरभावापत्तिरूपैकतापत्तिमाह एकतापत्तेश्चेति, एवं सति । तादात्म्ये सति, तयोः । चिदचितोः ॥ भवत्वेकतापि न हानिर्न इति ब्रुवन्तं मत्याह तथा सतीति एकत्वे सतीत्यर्थः वैदिकेत्युक्त्या विभागस्याप्रामाणिकता निरस्ता॥तथापि शङ्कते न चेति, समाधत्ते एकत्व इति । अनिरूपणात्, तद्भिन्नस्याभावात् स्वस्य चानुद्भावकत्वाभावादिति भावः हेत्वन्तरमेवाभिदधाति अचिदपवादाच्चेति, संग्रहं सदृष्टान्तं व्याचष्टे नेह नानेति, चिदतिरिक्तस्येति, इह पदेन चितोऽनुयोगित्वबोधनादर्थसिद्धमिदम्, उपपा-

---

वेद नहीं बोधन करसके है अन्धकार और प्रकाश का अभेद जैसे नहीं है वैसे चेतन अचेतन का भी अभेद नहीं जैसे घट और घटाभाव शब्दों का अर्थ परस्पर विरुद्ध होने से अभेद नहीं है वैसे चेतन अचेतन शब्दों के अर्थ को विरुद्ध होने से अभेद नहीं होसके है शब्दके वत् चेतन अचेतन की प्रतीति भी चेतन अचेतन को परस्पर विरुद्ध ग्रहण करावे है. और चेतन अचेतन के अभेद के बोधन में योग्यताका अभाव होने से भी जड़ चेतन का अभेद वेद नहीं बोधन करे है जो चेतन अचेतन का अभेद वेद बोधन करे तो चेतन अचेतन की एकता होजावेगी तब जड़ चेतनके विभाग को बोधन करनेवाली श्रुति विरुद्ध होजावेगी और दोनों की एकतापक्ष में चेतनता का तिरोधायक न होने से चेतनता के तिरोधान से अचेतन नहीं कहसके हैं.

ब्रह्मे"तिसामानाधिकरण्येन चिदचितोः सञ्चितोरिव तादात्म्यं श्रुतिरभिसन्दधीत तदा"नेह नानेति"न चिदतिरिक्तमपवदेच्चितमिव न ह्येकत्र तदेव तस्मिन्निषिध्यान्यत्र तदेव तत्तादात्म्यापन्नमावेदयद्वेदवाक्यं नाम भवति प्रमाणम्।तस्मादपवादादचितो नास्त्यतिरेकश्चित इति निर्णीयते। अन्योन्यधर्मसाङ्कर्यापत्तेश्च यदि चिदचितोस्तादात्म्यं श्रुतेरर्थं प्रपद्यसे प्रपद्येथास्तर्हि तयोरन्योन्यधर्मसाङ्कर्यमपि तत्तादात्म्ये तद्धर्मसाङ्कर्यस्यावश्यंभावात् कुतस्तर्हि चिदचितोस्तादात्म्यं तद्धर्मसाङ्कर्यं च भातीति चेद्विपर्यासात् विपर्यासः खल्वयं तयोस्तादात्म्यं परस्परधर्मसाङ्कर्यं च विषयीकुर्वाणो विमोहयति भवादृशान् तथाहि पुरुषाश्चतुर्विधा भवन्ति विज्ञा अज्ञा विपर्यस्ताः सन्दिग्धाश्चेति।

---

दयति यदि हीति, सञ्चितोरिवेति। वाच्यार्थापेक्षया द्विवचनं साधु ननु न तस्यां श्रुतावचितोपवादोऽभिधीयतेऽन्यत्रापवादात्तच्छ्रुतेरभयादिति चेन्नेत्याह न ह्येकत्रेति, गतिसामान्यन्यायेनोभयश्रुत्योरेकवाक्यतया पूर्वोक्तएव वाक्यार्थबोधोऽन्यथा द्वयोरपि श्रुत्योरप्रामाण्यं भवेदितिभावः, तदेवेति। सामान्ये नपुसकम्। अचिच्छब्दवाच्यमित्यर्थः तस्मिन्नधिष्ठाने चिदात्मनि, अचिदपवादश्चिदचितोस्तादात्म्यानभिसंधौ हेतुरुपन्यस्तः सचानतिरेके तयोः फलित इत्युपसंहरति तस्मादिति, तच्छब्दार्थं स्वयमेव विवृणोति अपवादादिति, परस्परधर्मव्यत्यासभयादपि तयोस्तादात्म्यं नास्तीत्याह अन्योन्येति। एकतापरत्वपेक्षया चकारः। साङ्कर्यमत्र सर्वत्र व्यत्यासः विवृणोति, यदीति, श्रुतेः, सामानाधिकरण्यश्रुतेः, प्रपद्यसे, मन्यसे इत्यर्थकमिदं पदम् एवमग्रेऽपि, कुत एवमत आह तत्तादात्म्य इति यथा स्वस्मिन्स्वतादात्म्ये स्वधर्मास्तथाऽन्यत्रापि स्वतादात्म्ये सति स्युः स्वधर्मा अपि सर्वे इति भावः चिदचितोस्तादात्म्यादेरभावे तत्प्रतीतिः कुत इति पृच्छति, कुत इति, चिदचितोस्तादात्म्यस्याभिहितेभ्यो हेतुभ्योऽनुपपत्त्या तद्धर्मव्यत्यासस्यापि तत एवाभावेन तत्प्रतीतिर्भ्रमरूपैवेत्यभिप्रायेणाह विपर्यासादिति विवर्णयति विपर्यास इत्यादिना, विमोहयति, अन्यस्यान्यात्मताद्विकमात्रेदयाभीति शेषः, विपर्यासं निरूपयिष्यंस्तत्सिद्धिनिमित्तम्पुरुषप्रकारमावि-

तत्र विज्ञा विशेषज्ञा विज्ञापयन्ति च विशेषमिदमित्थमेवेति प्रमाणेन तर्केण च ते हि विध्वस्ताज्ञानविर्यासससंशया विध्वंसयन्ति चान्येषामुपसन्नानामज्ञानादीन् इतरे तु त्रयोपि बाला इव परदर्शितप्रमाणमार्गास्तेषु चाज्ञानामज्ञत्वादेव न प्रामाण्यं संशयाविष्टानां तु स्वमपि निर्णयमलभमानानां निर्णायकत्वाभावेन प्रामाण्यं दूरतोऽपास्तमेव विपर्यासाविष्टास्तु स्वमतिकल्पनाऽऽलम्बा न प्रमाणाऽऽलम्बा दोषदूषितकरणाश्च भवन्तो न प्रमाणभावमालम्बन्ते तथा च विपर्यासमूलं चिदचितोस्तादात्म्यं धर्मयोर्व्यत्यासश्चेति न प्रमाणावलम्बनं भवितुम-

---

ष्करोति तथाहीत्यादिना। तत्र। चतुर्विधमध्ये, विशेषज्ञाः विवेचकाः प्रमाणेन तर्केण च विज्ञापयन्तीत्यन्वयः प्रमाणं प्रत्यक्षादितर्कोऽनुमानसहकारी इदं ज्ञानविषयः इत्थमिति। तथ्यमतथ्यं वा यथा भवेत्, तेषां प्रमाणतामाह ते हीति। विज्ञा हीत्यर्थः, तेषां प्रामाण्ये हेतुगर्भितविशेषणमाह विध्वस्ताज्ञानेत्यादि, उपसन्नानां, स्वानुवर्तिनाम्। अज्ञानादीन्, आदिना संशयविपर्ययौ ग्राह्यौ। अन्येषां तु न प्रमाणतेति सहेतुकमाह इतर इति, अज्ञविपर्यस्तसंदिग्धा इत्यर्थः, बालाइवेति, विवेकविकलतयेतिभावः, कथं तर्हि तेषां यथार्थप्रतिपत्तिरत आह परदर्शितेति, परेतिविज्ञोक्तिः, प्रमाणमार्गः प्रमाप्रकारः, तेषु। अज्ञादिषु त्रिषु, न प्रामाण्यम् न प्रमितार्थग्राहकत्वम्, संशयाविष्टेषु तु ज्ञानसत्वात्स्यात्प्रामाण्यमतआह संशयाविष्टानां त्विति, संशयस्य बाधितार्थविषयकत्वात्तेन ज्ञानेन न प्रामाण्यमेषामिति भावः, दूरतोपास्तमिति, न पाक्षिकमपि प्रामाण्यमित्यर्थः, विपर्यासाविष्टानां तर्हि प्रामाण्यं स्यादत आह विपर्यासाविष्टास्त्विति स्वमतीति स्वमतेस्तादृशी या वृत्तिस्तदाश्रया इत्यर्थः। कल्पनेत्युक्त्याऽर्थशून्यताभिहिता कल्पनापदेनार्थशून्यत्वप्रामाण्यनिमित्तमभिहितमिदानीं विपर्ययहेतुसमीक्षयापि तथेत्याह दोषदूषितेति, भवन्तः, सन्तः उपपादितप्रकरणस्य प्रकृतोपयोगमाह तथाचेति, विपर्यस्तानामप्रमाणत्वे च, विपर्यासमूलम् विपर्ययसिद्धम्। धर्मयोरिति अत्रापि चिदचितोरिति सम्बन्धनीयम्। प्रमाणावलम्बनमिति, प्रमाणस्य-

र्हेति न हि प्रमाणं विपर्यस्तमवलम्बते न वा तदवलम्बमानं प्रमाणं भवति । किम्मूलको विपर्यासः । विपर्यासः खलु किम्मूलको वेदितव्यः आविद्यकमावेदयस्व । अविद्यैवानिर्वचनीया विपरीतमस्मै प्रदर्शयति तामिममाविद्यकं तादात्म्यादिविपर्यासमपनिनीषुः श्रुतिराचष्ट सर्वं ब्रह्मेति अयमर्थः यत्सर्वं स्वस्वमतिकल्पितं मन्यध्वे

---

विषय इत्यर्थः, कुतो नैवमत आह न हीति । प्रमाणं कर्तृ विपर्यस्तं कर्म, तत् । विपर्यस्तम् । विपर्ययस्य मूलं पृच्छति, किम्मूलक इति, समाधत्ते आविद्यकमिति । अविद्यामूलकमित्यर्थः योपधाद्गुरुपोत्तमाद्वुञिति अविद्याशब्दात्कर्मणि वुञि आदिवृद्धिः, विद्याया या अभावोऽविद्या चेन्न सा मूलमभावस्य तथाभावानभ्युपगमादिति चेत्तत्राह अविद्यैवेति, विपरीतं व्यत्ययं निरूपितस्य विपर्ययस्य प्रकृतोपयोगमाह तमिममिति । तं निरूपितमिमं साक्षिप्रत्यक्षसिद्धम् । तादात्म्यादीत्यादिना तद्धर्मोपग्रहः । सर्वं खल्वितिश्रुतिवाक्यार्थमाहायमर्थ इति । वाक्यार्थ इत्यर्थः । सर्वस्य सत्यत्वाभावादाह स्वस्वम-

---

'नेह नानास्ति किंचन' इस श्रुति में निराकारमें सर्व साकार का निषेध कियाहै इस वास्ते भी अभेद नहीं है। जैसे सत् चित् का अभेदहै वैसे चेतन अचेतन के अभेद में तात्पर्य होता तो अचेतन का निषेध श्रुति न कहती-और जो कभी जड़ चेतनका तादात्म्य मानोगे तो परस्परके धर्मों का संकर होजावेगा जडके धर्म चेतनमें चेतन के धर्म जडमें प्राप्त होजावेंगे ( शंका ) जड चेतनका तादात्म्य और परस्परके धर्मों का संकर कैसे प्रतीत होवे है । ( समाधान ) भ्रम से तादात्म्यादि की प्रतीति होवे है विज्ञः १ अज्ञः २ भ्रान्ताः ३ संदिग्धाः ४ इसरीति से चारप्रकार के पुरुष होवे हैं उन में विशेषदर्शी गुरु विज्ञ हैं सो स्वतन्त्र हैं और दूसरे तीन प्रकारके परतन्त्र हैं उन में अज्ञों को तो अन्धवत् अप्रमाणता है संदिग्धों को संशययुक्त होने से निर्णय करने में सामर्थ्य नहीं है और भ्रान्तपुरुषको भी प्रमाणता नहीं वह अपनी बुद्धिसे पदार्थों की प्रतीति करे हैं और उनके इन्द्रियभी दोषयुक्त हैं इसवास्ते उन के ज्ञान को प्रमाणता नहीं है इसवास्ते जड़ चेतनका तादात्म्यादि उनके ज्ञान से सिद्ध नहीं होवे है. भ्रान्तिसिद्ध पदार्थ सत्य नहीं होवे है ।

तत्किंचिदपि मा मन्यध्वं किन्तु मन्यध्वं ब्रह्मैवेति यतः सर्वमिदं तज्जलानिति अयंभावः यथाब्धेस्तरंगा उत्पद्यन्ते तत्रैव तिष्ठन्ति तदनु च लीयन्ते प्रतीयन्ते ततस्ते ततो न भिद्यन्ते तथेदमपि सर्वं नामरूपकर्मात्मकं जगन्निराकारात्साकारं न भिद्यते तज्जत्वात्तत्स्थत्वात्तल्लयत्वाच्चेति। सर्वस्य साकारस्य वाचारम्भणमात्रत्वान्निराकारातिरेकेण हेमातिरेकेण कटकादेरिव । कथं तर्हि विशेषोभिहितो निराकारदर्शिना । अभ्युपगमवादेन वादिदृष्टं परिणामवादमप्रत्याख्याय तदभ्युपगमेनैव तूक्तो विशेषः पुरस्तात्। इदं पुनर्हार्दं प्रकाशितमाचार्येण। खलुशब्दोपि निराकारनिर्णायकः। सर्वं खल्विति खलुशब्दोपि निराकारावशेषं निर्णाययति सर्वं ब्रह्मैव नाब्रह्मास्ति

---

तीत्यादि । किंचिदपीति । सर्वशब्दस्वारस्यमिदम् । श्रुतौ सर्वमित्यस्य हेतुगर्भितं विशेषणं तज्जलानिति । तत्र तस्माज्जातं तज्जं तस्मिंल्लीयते तल्लं तस्मिन्ननिति चेष्टते तदनं तज्जं च तल्लं च तदनं चेति समाहारे तज्जलान् अकारस्य-लोपश्छान्दसस्तच्छब्दद्वयस्य चेति बोध्यं तदेतत्सर्वमभिप्रेत्य सदृष्टान्तं भावार्थमाह अयंभाव इति, तत्रैव । अब्धावेव । तदनु । स्थितिक्षणात्पश्चात् प्रतीयन्ते आबालगोपालमिति शेष ः । ततः । अब्धेरुत्पत्तिस्थितिलयबलात् । ते । तरङ्गाः । ततः । अब्धेः । श्रौतमेव विशेषणं हेतुत्वेन विवृणोति तज्जत्वादित्यादिना । स्पष्टं सर्वम् । कुतो न निराकाराद्भिद्यते साकारमिति वीक्षायामाह सर्वस्येति । वाचारम्भणेति वाचारम्भणं विकारो नामधेयमिति श्रुतेः । अत्रानुरूपं दृष्टान्तमाह हेमेति । दृष्टान्तं श्रुत्वा पूर्वग्रन्थविरोधं शङ्कते कथं तर्हीति, विशेषः । कटकादीनां हेमपरिणामतारूपः विरोधमपनुदति अभ्युपगमवादेनेति । अर्थं प्रकाशयति वादिदृष्टमिति । अयं तर्हि किमाशयको ग्रन्थ इत्यत आह इदं पुनरिति । आचार्येण । निराकारदर्शिनेति भावः । खलुशब्दस्य स्वपक्षानुकूलतां वर्णयति खलुशब्दोपीति विवृणोति सर्वं खल्विति निराकारावशेषमिति । सर्वस्येदंकारास्पदस्य निषेधेनानिदं रूपं निराकारतत्त्वमेवावशिष्यते वास्तव-

किं चनेति नेह नानास्ति किं चनेति वत् । तस्मान्न साकारं निराकारात्मतामश्नुते न हि वेदोऽप्यनुपपन्नमावेदयति किन्तु साकारनिषेधावधि परं ब्रह्मैव परं ब्रह्म निराकारं चिदाकारमित्याद्यभिधानमपि विपर्यस्ततत्तन्निषेध्यापेक्षं वस्तुतस्तु वाङ्मनसातीतं श्रुतिगीतं त्रिगुणातीतं यत्तदेव तत्त्वमिति श्रुतेः पराभिसन्धिरित्यलम् ।

---

मित्यर्थः, अत्राप्यनुरूपं श्रौतं दृष्टान्तमुपादत्ते नेह नानास्तीति । यथाहि नेह नानेतिश्रुतौ शब्दतो नानात्वावच्छिन्नं निषिध्यते तथात्र तात्पर्यतस्साकारमब्रह्मेदंकारास्पदं निषिध्य निराकारमवशिष्यत इति भावः, श्रुतेस्तात्पर्यमुपसंहरति तस्मादित्यादिना उक्तमेव हेतुं स्मारयति नहीत्यादिना। सामान्यतः श्रुतेस्तात्पर्यमभिधाय श्रुत्यन्तरैकवाक्यतया परंतात्पर्यमाविष्करोति परं ब्रह्मेत्यादिना । तत्तन्निषेध्येति । परमपरापेक्षं ब्रह्म परिच्छिन्नापेक्षं निराकारं साकारापेक्षं चिदाकारं जडाकारापेक्षमिति भावः । त्रिगुणातीतमिति 'अव्यक्तात्पुरुषः पर' इति श्रुतेः 'साक्षी चेताः केवलो निर्गुणश्चे' ति श्रुतेश्चेत्यर्थः । तत्त्वम् । तथ्यम् । निषेधपक्षे निषेध्यं जिज्ञासते ननु चेति ।

---

( शङ्का ) भ्रमका हेतु कौन है ( समाधान ) भ्रमका हेतु अविद्या है सो अविद्या अनिर्वचनीय है इस अविद्याकृत भ्रम के निवृत्त करनेवास्ते श्रुति सर्व को ब्रह्म कहे है हे शिष्यों ! तुम जो सर्ववस्तुओं को मानते हो सो मतमानों किंतु ब्रह्म ही है अन्य सर्व कोई नहीं है जैसे समुद्र से तरङ्ग भिन्न नहीं हैं वैसे ही सर्वजगत् ब्रह्म से भिन्न नहीं है। सर्वसाकार विकार संसार वाणी का विलासमात्र ही है। और भूषण भी सुवर्ण से भिन्न नहीं है। ( शंका ) पूर्व आपने भूषणों को सुवर्ण का परिणाम कैसे कहा है। ( समाधान ) वादियों को स्वीकृत परिणामवाद को स्वीकार करके पूर्व विशेष वर्णन किया है और इहां आचार्य ने अपना मुख्य सिद्धांत वर्णन किया है और 'सर्वखल्विदंब्रह्म' इस श्रुति में खलु शब्द का निश्चय अर्थ है उस का ब्रह्म के साथ सम्बन्ध है इसवास्ते ब्रह्म ही वास्तव है इस अर्थ के होने से सर्व जगत् की सत्ता का अभाव बोधन किया है इस वास्ते निराकार ही सत्य है साकार सत्य नहीं है निराकार परब्रह्म यह कथन भी कल्पित अन्य वस्तुओं की अपेक्षा से है वास्तव से तो मन वाणीसे अतीत स्वरूप निराकार है यह श्रुतिका तात्पर्यहै(शंका)जिस साकार का

ननु च भोः किमिदं साकारं यन्निषेध्यम् । यदनया श्रुत्या निषेध्यं साकारं तत्त्वाचार्यो नामंस्त सम्प्रति तन्निषेधार्थं साकारं मन्तव्यम् । निराकाराभिधानाच्च साकारम् । निराकारमीमांसेत्यभिधानाच्च साकारं मन्तव्यम् । न साकारसिद्धिमन्तरा निराकारसिद्धिरात्मानं लभते निराकारस्य साकारापवादत्वात् अन्यथा निराकारसिद्धिरेव न निर्वहेत् तथा च सिद्धं साकारं न निषेधार्हमसिद्धं चेन्न तन्निषेधेन निराकारं सेद्धुमर्हति । ततउभयतःश्पृङ्खलेति चेदत्राभिधीयते न किंचिन्नाम साकारम् नैव साकारं किञ्चिदपि वस्तु मन्यामहे मन्यामहे तु निराकारं वस्तु तथाचेन्न निराकारम् । यदि च किंचित्साकारं वस्तु स्या-

---

च शब्दोऽलंकारे । भोशब्द आचार्यमभिमुखीकरोति । इदं शब्दः पराग्विषयः । साकारस्वरूपं निरूपणीयमिति भावः पूर्ववादी स्वसंग्रहं विवृणोति यदनयेति । अनया । सर्वं खल्विति प्रकृतया । सम्प्रति । श्रुतेः साकारनिषेधरूपार्थवर्णनवेलायाम् । तन्निषेधार्थं । साकारापवादार्थम् मन्तव्यमिति । तथा च कुतस्तन्निषेधइति नोपपन्नोनिषेधवाक्यार्थइतिभावः । सूत्रवाक्यार्थनिरूपणार्थमपि साकारसद्भावं मानयति निराकाराभिधानाच्चेत्यादिना । मन्तव्यमितिपदमनुवर्त्य संग्रहवाक्यं विवृणोति निराकारमीमांसेत्यादिना निराकारमीमांसा हि निराकारं विषयीकरोति निराकारं च साकारापवादात्मत्वात्साकारसिद्ध्यधीन मित्येवं निराकारमीमांसैव साकारसाधिकेतिभावः । उक्तमाशयमाविष्करोति न साकारसिद्धिमन्तरेति । विपक्षेदण्डमाह । अन्यथेति साकारासिद्धावित्यर्थः । स्वाशयं पूर्ववादी प्रकाशयति तथाचेत्यादिना । तन्निषेधनेति । इत्थंभावे तृतीया । तन्निषेधात्मेत्यर्थः । उभयतः । उभयोः पक्षयोः ज्ञातमात्रस्यैव प्रतियोगिनोनिषेधेऽपेक्षा न तु प्रमितस्येति न साकारसिद्धिरित्याशयेन समाधत्ते अत्राभिधीयते इति । वस्तुपदमध्याहृत्य सावधारणं संग्रहवाक्यं विवृणोति । नैवेत्यादिना किंचिदपीति । अदृष्टापेक्षमिदम् । वस्तु । तथ्यम् । किन्तर्हिशून्यं तत्त्वमनुषे नैवमित्याह मन्यामहेत्विति । निरधिष्ठानभ्रमाभावादितिभावः । साकारस्य प्रमितत्वाभ्युपगमे दण्डमाह तथा चेन्नेति । संग्रहं व्याचष्टे यदिचेति किं-

न्नस्यात्तदानिराकारं न हि साकारे भवति भवति नाम निराकारम् । घटतदभाववत्स्यातान्न यथा घटतदभावौ स्वतन्त्रौ स्तस्तथासाकारनिराकारे स्यातामितिचेन्न निषेधाभिधानात् । अभिहितं हीदं साकारस्य निःशेषं निषेधनं नेहनानास्तीतिश्रुत्या ततो न घटतदभाववदिमे भवितुमर्हतः । निराकारमेव तु भवितुमर्हति न साकारम् निराकारसिद्धिरसाधिका बाधकत्वात् । यत्पुनराभिहितं निराकारसिद्धिरेव साकारस्य साधिकेति तन्न मन्यामहे तस्यास्तद्बाधकत्वात् । या हि निराकारसिद्धिः । सा खलु साकारसिद्धिं वाधित्वैवात्मानं लभते कथं सा स्वप्रतिद्वन्द्विनीं साकारसिद्धिं सम्पादयेत् साधकबाधकभावस्य भिन्ननिष्ठत्वात् न हि यद्यस्य साधकं तदेव तस्य बाधकं नाम भवति भवति वा यद्यस्य बाधकं तत्त-

---

चिदिति । किंचिदपीत्यर्थः । न स्यादिति । सर्वसाकारापवादात्मत्वान्निराकार स्येति भावः तत्र हेतुवाक्यमाह न हीति । भवति । सति । भवति । सत्तांलभते सद्वैतवादी वदति घटतदभाववदिति । सदृष्टान्तं विवृणोति यथेत्यादिना । स्वतन्त्राविति । अन्योन्यविपर्यासशून्यौ सदात्मानाविति । यावत् वेदे सद्वैतवादस्यापवादान्नैवमित्याह निषेधाभिधानादिति । हेतुवाक्यं विवृणोति । अभिहितमित्यादिना । ततः । निषेधात् । इमे । साकारनिराकारे । साकारनिषेधसिद्धं साधयति निराकारमेवत्विति। निराकारसिद्ध्यैव साकारं सिद्ध्यतीत्युक्तं प्रत्याचष्टे निराकारसिद्धिरिति । प्रत्याख्यानार्थमुक्तमनुवदन्संग्रहवाक्यं विवृणोति यत्पुनरभिहितमिति । तत् । भवदभिमतम् । प्रतिज्ञायां हेतुमाह तस्या इति । निराकारसिद्धेरित्यर्थः । तद्बाधकत्वात् । साकारसिद्धिबाधकत्वात् । विवृणोति या हीति । बाधित्वैवेति।तदपवादात्मकत्वात्तस्या इति भावःतद्बाधिकापि सा भवत्तूक्तरीत्यातत्साधिकेत्यतआह साधकबाधकभावस्येति । साधकत्वबाधकत्वयोर्वैयधिकरण्यं सविस्तरं निरूपयत । न हीति । यथा साधकं बाधकं न भवति तथा बाधकं साधकं न भवतीति भावार्थः । ननु माभून्निराकारसिद्धिपरतन्त्रा साकारसिद्धिः

स्य साधकमिति । साकारसिद्धेर्निराकारसिद्ध्यधीनत्वान्न साकारसिद्धेर्निराकारसिद्धिबाधकताप्रत्याशापि विधेया । निराकाराभिधानं साकारापवादेन । साकारापवादेन हि निराकारमीमांसेत्यभिहितमाचार्येण न साकारसद्भावाभिप्रायेण तथा सति साकारमीमांसा प्रतिज्ञातव्या भवेत् । तदनुवेधाच्च । साकारं हि निराकारानुविद्धमेव

---

सा तु स्वयमेव भवन्ती निराकारसिद्धिमपवदेदितिचेत्तत्राह साकारसिद्धेरिति । साकारं हि सर्वं जडतया प्रसिद्धं न स्वतः सेद्धुमर्हति तथा सति चित्त्वापत्तेरतः साकारसिद्धिर्न स्वतन्त्रा भवितुमर्हतीतिभावः । निराकारमीमांसेतिप्रतिज्ञयापि न साकारसिद्धिरित्याह निराकाराभिधानमिति । संग्रहं व्याचष्टे सकारापवादेनेत्यादि । विपक्षे प्रतिज्ञास्वरूपोच्छेदं बाधकमाह तथा सतीति । साकारसिद्ध्यभिप्राये सति । चितः सकाशादचितोनतिरेके हेत्वन्तरमाह तदनुवेधाच्चेति । सदृष्टान्तं संग्रहं विवृणोति साकारं हीति । फलितमभिदधाति न चेति । बाधितुमपिक्षमत इति । तथा चोभयत्रैव हेतुवाक्यस्य तात्पर्यं विवरणेन प्रकाशितमितिबोध्यम् । मुख्यमुद्देश्यमाह ततः पृथग्वेति । पृथक्पदमधि-

---

तुम निषेध करते हो उसका स्वरूप भी वर्णन करना उचित है पूर्व आपने साकार वस्तु नहीं मानी अब तो निषेध करने वास्ते प्रतियोगि का स्वरूप मानना होवेगा और निराकार इस कथन से भी साकार वस्तु माननी होवेगी निराकार को साकार का अपवाद स्वरूप होने से साकार की सिद्धि अवश्य होवेगी जो साकार सिद्ध नहीं है तौ किस का निषेध करके निराकार की सिद्धि करोगे जो साकार सिद्ध है तो भी निराकार की सिद्धि न होवेगी इस रीति से दोनो पासिओं में बेडी है ( समाधान ) साकार कोई वस्तु नहीं है जो कभी साकार वस्तु मानें तो निराकार की सिद्धि न होवेगी 'नेह नानाऽस्तिकिंचन' इस श्रुति ने साकार का सर्वथा निषेध बोधन किया है इसवास्ते घट और घटाभाववत् स्वतंत्र साकार निराकार की स्थिति नहीं मानते निराकार सिद्धि को साकार सिद्धि का बाधक होने से निराकार सिद्धि साकार का साधक नहीं है जो जिस का बाधक होवे है सो उस का साधक नही होवे है साधक बाधक भिन्न होवे हैं साकार सिद्धि को निराकार सिद्धि के अधीन होने से निराकार सिद्धि का साकार सिद्धि बाधक नहीं है साकार के निषेधाभिप्राय से निराकार मीमांसा की प्रतिज्ञा आचार्य ने करी है साकार सिद्धि में तात्पर्य नहीं है

प्रतीयते तरङ्गवृन्दमिव सलिलानुविद्धम् । न च यद्येनानुविद्धं प्रतीयते तत्तं बाधितुं क्षमते ततः पृथग्वा वस्तु भवितुमर्हति । ततो न साकारं वस्तु निराकारमेव वस्त्विति सिद्धम् । अथ किं नाम निराकारं यदनुविद्धं साकारम् विशेषतोनिरूपय निराकारं येनानुविद्धं साकारं प्रतीयते सर्वमिति भवताभिधीयते । अभिहितं स्मर निराकारं परंब्रह्मेति । तच्च सदाकारमपि विद्धि निर्बाधत्वात् । सर्वस्य साकारस्य बाध्यतायाः श्रुत्यैवाभिधानान्निराकारस्य बाधाधिष्ठानत्वाभिधानाच्च सदाकारमेव निराकारमवेहि नासदाकारमपि तथाहि यद्यत्साकारं प्रतीयते तत्तत्सर्वमस्तिभातीत्येव प्रतीयते तत्र सत्ताभानयोरधिष्ठानत्वेनानुवेधेपि न तथाभानमविद्याऽऽवृतमतीनामितिदिक् ।

---

ष्ठानसत्तया साकारसत्त्वमनुमोदते । मुख्यं फलितं प्रकाशयति । तत इति । वस्तुतथ्यम् । किन्तर्हि तथ्यमतआहनिराकारमेवेति । एवकारोवस्त्वनन्तरं बोध्यः । वस्त्वेवनावस्त्विवतिभावः । एतच्चाग्रे स्फुटीभविष्यति । निराकारवस्तुतासाधकहेतुवृन्दसमाप्तिं सूचयति इतिसिद्धमिति । सिद्धशब्देन मङ्गलमपिसूचितम् । ननु साकारेनिराकारानुवेधोन युक्तस्तमसि तेजोऽनुवेधवदितिशङ्कते अथेति । शङ्कावाक्यं विवृणोति विशेषतइति । तेजसः स्वरूपेणैव तमोविरोधित्वान्नानुवेधस्तस्य तमसि प्रकृते तु चितोविशेषतोविज्ञातस्यैवाचिद्विरोधिताचितोऽनुवेधमन्तराचाचितः साकारस्याप्रतीतेः स्वरूपतश्चितस्तत्साधकत्वात् नानुवेधबाधकं किंचिदस्तीतिभावेनाहसिद्धान्ती । अभिहितमेवेति । सर्वत्रसाकारेऽनुवेधं दर्शयितुं स्वरूपान्तरेणापि चितं दर्शयति तच्चेति । ननुसाकारा चिद्विनाशसमये सत्तासाधकाभावादसदाकारमपि तन्मन्तव्यमितिचेन्नेत्याह सर्वस्येत्यादिनासदाकारमपीत्यन्तेन श्रुत्यैव । नेहनानास्तीत्यादिकयैव । सच्चिदाकारानुवेधं साकारे दर्शयति । तथा हीत्यादिना । प्रतीयते । घटोऽस्तिभातिचेतिप्रतीयते तत्र । उक्तप्रतीतौ । अधिष्ठानत्वेनेतिअधिष्ठाननिराकारगतसत्ताभानयोः साकारेभानादितिभावः । ततः किंतत्राह न तथा भानमिति । प्रत्युतघटादीनां सत्त्वादिकं भासते इति भावः । तथा । अधिष्ठानतया । दिगिति । दिगर्थस्तु

अथ का मीमांसा महान्विचारोमीमांसा निराकारविचारोहि महान्महान्तश्च साकारविचाराः । कथं विज्ञातव्यमिदम् कथमिदं विज्ञातव्यं निराकारविचारोमहान् महान्तश्च साकारविचाराइति।इत्थं विजानीहि निराकारविचारोमहान् संसारमूलनिर्मूलनात् साकारविचाराश्च न महान्तः संसारमूलानुन्मूलनात् । संसारगतिमूलत्वाच्च साकारविचाराः प्रत्युतसाकारवासनाजननेन संसारगतिमूलानि भवन्ति ततोन लेशमात्रेणापि महत्त्वमेषामेष्टव्यम् प्रमाणाप्रमाणविशेषाच्च । निराकारविचारोहि परमार्थं निराकारं निरूपयन्प्रमाणं भवति । साकारविचाराश्चानर्थं साकारं निरूपयन्तोन प्रमाणभावं भजन्ति प्रमाणाप्रमाणप्रसूतत्वाच्च । निराकारविचारोहि निर्दोष-

---

प्रियप्रतीत्या आनन्दात्मताप्यधिष्ठानस्य बोध्येतिसूच्यते । ननु अथ निराकारपदार्थयोर्ज्ञानेपि मीमांसापदार्थस्याज्ञानात्कथं प्रतिज्ञावाक्यार्थबोध इति तात्पर्येणशङ्कते अथ का मीमांसेति । उत्तरमाह महानिति । मानधातोः पूजार्थकतया फलितार्थकथनमिदम् । महत्वनिमित्तं पृच्छति कथमिति । निमित्तमाविष्कुर्वन्समाधत्ते इत्थमित्यादिना संसारमूलेति । संसारस्य कर्तृत्वाद्यनर्थस्य मूलमज्ञानं तस्यनिर्मूलनाद्विनाशनादित्यर्थः । नैतादृशं महत्त्वं साकारविचारेषु इति बोधयति साकारविचाराश्चेति निराकारपरब्रह्मभिन्नपरमाणुप्रकृत्यादिविचारा इत्यर्थः । पारमार्थिकमहत्त्वाभावेपि व्यावहारिकमहत्वसत्त्वमेषु कुतोनेष्टव्यमितिचेत्तत्राहप्रत्युतेत्यादिना । संसारगतिमूलानीति । जन्ममरणादिकारणानीत्यर्थः । ततः संसारगतिमूलत्वादित्यर्थः । लेशमात्रेणापीति । इत्थंभूतलक्षणे तृतीया । लेशमात्रमपीत्यर्थः । एषामिति । साकारविचाराणामित्यर्थः ॥ हेत्वन्तरप्रयोगेणापि निराकारसाकारविचारयोर्महत्त्वामहत्त्वे मन्तव्ये इत्याह प्रमाणाप्रमाणविशेषाच्चेति । संग्रहवाक्यं विभज्य साध्याहारं विवृणोति निराकारविचारोहीति । परमार्थमिति । एतेनास्यविषयतो महत्वं व्याख्यातम् । अनर्थमिति अत्रापि विषयतएवामहत्त्वं प्रकाशितम् । प्रमाणतोपि तयोर्महत्त्वामहत्त्वे

वेदप्रमाणप्रसूतोमहान्। साकारविचाराश्च स्वाभ्यूहमात्रप्रसूताश्चमहान्तः। अथ प्रत्यक्षादिप्रमाणप्रसूताः साकारविचारामहानुभावैः समपादिताः किं नमहान्तःशृणु। प्रत्यक्षादिप्रमाणानामानिराकारविचारं प्रमाणतेति। यावद्धि निराकारं नविचारितं भवति तावदविचाररमणीया प्रत्यक्षादिप्रमाणानां प्रमाणता भवति यदा

---

दर्शयति प्रमाणाप्रमाणप्रसूतत्त्वाच्चेति । निर्दोषेति। इदमपि प्रमाणतायां बीजं विज्ञेयम्। स्वाभ्यूहेति। इदमप्रमाणतानिमित्तमवबोध्यम्। उक्तं बीजं साकारविचारेषूपलभ्य शङ्कते अथेति। विचारस्य हि द्विधा महत्त्वं स्वहेतुप्रमाणद्वारा स्वप्रमातृद्वारा च तच्चोभयमप्यत्रास्तीत्याह प्रत्यक्षादीतिमहानुभावैरिति च किंनेति। कुतोनेत्यर्थः। आक्षेपार्थकः किंशब्दः। व्यावहारिकमेषां प्रामाण्यमि-

---

सर्व साकार वस्तु निराकार में अनुस्यूत प्रतीत होवे है जो वस्तु जिस में अनुस्यूत प्रतीत होवे है उस का वोह वाध नही करसके है और उस से पृथक् भी नही होसके है जैसे तरंगों में सलिल अनुस्यूत है सो जल तरंगो को जल की वाधकता नही होवे है और तरंग जल से भिन्न भी नहीं सिद्ध होवे हैं इस वास्ते निराकार ही वास्तव है साकार सर्व मिथ्या है यह सिद्धहुआ (शंका) निराकार कौन वस्तु है जो साकार में अनुस्यूत है ( समाधान ) पूर्व कथन करादिया है निराकार परब्रह्म है सो सत्यस्वरूप है सर्व साकार के वाध का अवधि है जो जो वस्तु प्रतीत होवे है सो अस्ति भाति रूप करके प्रतीत होवे है सो अस्ति भाति सत् चित् ब्रह्म का रूप है असत् अज्ञान दृश्य का स्वरूप है विवेकी को यह विचार होवे है अविवेकी को साकार ही सत् प्रतीत होवे है ( शंका ) मीमांसा शब्द का क्या अर्थ है ( समाधान ) महान् विचार को मीमांसा कहे हैं संसार के बीज का विनाशक होने से निराकार विचार महान् है संसार गति का हेतु होने से साकार विचार तुच्छ है और निराकार परमार्थ को विषय करने से और निर्दोष वेद प्रमाण से उत्पन्न होने से भी निराकार विचार महान् है अपरमार्थ साकार को विषय करने से और अपनी बुद्धि की कल्पना मात्र से उत्पन्न होने से साकार विचार तुच्छ है

तु निराकारं विचार्यते तदा प्रत्यक्षादीनां प्रमाणताऽस्तमिता भवति । कथमेवम् । कथमेवमभिहितम् यावता निराकारं विचारयन्तोपि प्रत्यक्षादिप्रमाणानां मन्यन्ते प्रमाणताम् । मैवमन्यकल्पनात् ॥ अज्ञैः कल्पितमिदं प्रत्यक्षादीनामेते प्रमाणतामभिमन्यन्तइति न तु स्वयमपि तथा भवन्ति साकारमात्रस्य मिथ्यात्वदर्शनात् । आरोपितदोषेणाधिष्ठानस्य दुष्टत्वाभावाच्च न हि यत्र यदारोप्यते तत्तेन लिप्यतइति वक्तुं शक्यते । नापि निराकारं विचारयन्देहादिसंघातमहंममेतिवाऽभिमन्यते न चानभिमानस्य तस्य प्रत्यक्षादिप्रमाणेषु व्यावहारिकप्रमाणभावेषु पारमार्थिकप्रमाणभावोभासते विशेष-

---

त्याह शृण्विति । आनिराकारविचारमिति । मर्यादायामाङ् आङ्मर्यादाभिविध्योरितिसमासोऽव्ययीभावः तदेव स्पष्टयति यावद्धीति । निराकारविचारोदये तु साकारमात्रे मिथ्यात्वनिश्चयान्न प्रत्यक्षादीनां सत्यार्थविषयकत्वरूपं प्रामाण्यमित्याह यदात्विति । अस्तमितेति । पूर्वमज्ञानदशायां साकारसत्यत्वज्ञानात्कल्पिता तदानिवर्तेत इतिभावः । ननुनिराकारभक्ताअपि प्रत्यक्षादीनां प्रामाण्यमभिमन्यन्ते कथमन्यथाऽऽहारविहारादिसिद्धिस्तेषांभवेदित्याशङ्कते कथमेवमिति । एवम् । निराकारविचारोदये प्रत्यक्षादीनामप्रमाणत्वम् मन्यन्तेइति । आहारविहारादिनानुमीयतेइदम् । निराकारभक्ताः प्रत्यक्षादीनामानिराकारविचारमबाध्यत्वरूपप्रामाण्यमालम्ब्यैव व्यवहरन्ति अन्ये त्वन्यथामन्यन्तइत्याह मैवमित्यादिना । अन्यशब्दार्थं प्रकाशयन् संग्रहवाक्यं विवृणोति अज्ञैरिति । तथाभवन्ति अन्यकल्पितप्रत्यक्षादिप्रमाणताभ्युपगन्तारोभवन्ति । स्वयमेव कुतो नप्रत्यक्षादीनां प्रमाणतामभिमन्यन्तइतिचेत्तत्राह साकारमात्रस्येति । मात्रशब्दः कात्स्न्यार्थकः । स्वदृष्ट्या दोषाभावेपि परकल्पनया प्रत्यक्षादीनां प्रमाणत्वमभिमन्यन्तएव निराकारविचारकाइतिशङ्कायांसमाधत्ते आरोपितदोषेणेति । सामान्यमुख्यव्याप्तिमाह न हीत्यादिना । स्वदृष्टिपक्षे सिंहावलोकनन्यायेन विशेषमभिधातुं प्रक्रमते नापीति । अभिमानाभावे फलितमाह नचेति ॥ तस्य । निराकारभक्तस्य । उत्तरत्राप्येवम् ॥ साकार

दर्शित्वात्तस्य व्यावहारिकप्रमाणभावमवलम्ब्यैव च महानुभावा अपि साकारविचारेषु प्रावर्तन्तेति न महानुभावप्रवृत्त्यापि साकारविचाराणां महत्त्वं मन्तव्यम् । तथा च मुमुक्षुरविचार्यैव प्रत्यक्षादिप्रमाणतां यत्र कुत्रापि साकारविचारे प्रवर्तमानोनरोनिःश्रेयसाद् भ्रश्येद् जन्मजरामरणानर्थं च प्रपद्येताऽतोनिराकारमीमांसाऽऽचार्येण प्रस्तूयते यथाचायमर्थो निराकारमीमांसायास्तथा वयमस्यां निराकारमीमांसायां निरूपयिष्यामः । अथान्यत्र

---

विचारे प्रमाणद्वारा महत्वं प्रत्याख्याय प्रमातृद्वारापि तस्य तत्प्रत्याचष्टे व्यावहारिकप्रमाणभावमिति । महानुभावाः । कपिलकणादप्रभृतयः । ततश्च न महानुभावप्रवृत्तेः प्राबल्यमित्याह इतिनेति । स्पष्टमपरम्भाष्यम् ॥ तथा च साकारविचारप्रवृत्तिप्रतिषेधपुरःसरां निराकारविचारप्रवृत्तिसिद्धिमेव निराकारमीमांसारम्भस्यावान्तरप्रयोजनमाविष्करोति तथाचेति निराकारविचारस्यैव महत्त्वे सिद्धेचेत्यर्थः । अविचार्येति । एषाव्यावहारिकी पारमार्थिकी वेतिविचारमकृत्वेत्यर्थः । यत्र कुत्र प्रकृतिपरमाण्वादिविषयके । नरइति । अधिकारीत्यर्थः । एतच्चसाधनाध्याये स्फुटीभविष्यति । भ्रश्येत् । नप्राप्नुयात् । भ्रंशुअधःपतने इत्यस्य दैवादिकस्येदं रूपम् ॥ न केवलं परमार्थाप्राप्तिः प्रत्युतानर्थप्राप्तिश्च भवेदित्याह जन्मेत्यादि । अतः । निराकारमीमांसाया एवानर्थनिवृत्तिपुरःसरपरमार्थप्राप्तिसाधनत्वादित्यर्थः । कथमस्याएवोक्तविधतेत्यतआह यथाचेति । अर्थः । प्रयोजनम् । अर्थोऽभिधेयवस्तुप्रयोजननिवृत्तिष्वित्यमरः ।

---

( शङ्का ) साकार विचार प्रत्यक्षादि प्रमाणों से उत्पन्न हुए हैं और गौतमादि महर्षियों ने स्थापन किये सो महान् क्यों न होवें । ( समाधान ) निराकार का विचार जबतक न होवे तबतक प्रत्यक्षादि को प्रमाणता है निराकारविचार से अनन्तर प्रत्यक्षादि प्रमाणों की प्रवृत्ति नहीं होवे है । (शङ्का) निराकार विचारवान् भी प्रत्यक्षादि प्रमाणों से खानपानादि व्यवहार करते दीखते हैं । ( समाधान ) अन्य कल्पना से उन में प्रत्यक्षादि व्यवहार है उनकी दृष्टि में साकारमात्र मिथ्या है अन्य पुरुषों की कल्पना से उनको कोई लेप नहीं होवे है निराकारविचारवान् पुरुष आप देहादि सङ्घात में अहंममाभि-

भवतु यथा तथा वेदस्य तु मूर्द्धाभिषिक्तप्रमाणता भवतापि मन्यते अन्यथा निराकारविचारे प्रमाणदौर्लभ्यापत्तिः तथा च यज्ञादिविचाराः प्रमाणप्रसूता इति प्रमाणतया मन्तव्याः ॥ सन्ति हि वेदे स्वर्गतत्साधनसाङ्गविचारास्तेपि महान्तएव मन्तव्याइति कुतोनिराकारस्यैव महिमेति मैवम् । अभिप्रायानवबोधात् । नावाबोधिभवान् वेदस्याभिप्रायम् । न हि विधिनिषेधवाक्यानि स्वस्य विधेये निषेधे वा स्वस्य पर्यवस्यन्ति निराकारविचारे पर्यवसानात् । 'सर्वे वेदा यत्पदमामनन्ती'ति प्रभृतिश्रुतेः

---

साकारविचारविशेषमहत्त्वमापादयति अथान्यत्रेति । अन्यत्रप्रत्यक्षादौ मूर्द्धेति । यद्विरोधे स्मृत्यादिकमाभासतामापद्यते तत्त्वमित्युक्तार्थम् । अन्यथा । तात्त्विकप्रामाण्याभावे । भवतु वेदे तात्त्विकप्रामाण्यं किंततस्तत्राह तथाचेति । वेदस्य तात्त्विकप्रामाण्येऽभ्युपगते च । स्वोद्देश्यं भाषते यज्ञादिविचाराइति । यज्ञादिविचाराणां वेदप्रमाणमूलतामाख्यातुमाह सन्तिहीति । महिमा महत्त्वम् । सर्वस्यैव वेदस्य साक्षात्परम्परया निराकारे निष्ठानिरूपणान्नैवमित्याह मैवमिति । परमतात्पर्यमनवबुद्ध्यैवाशङ्काप्रवृत्तिरित्याह अभिप्रायेति । यज्ञादिविधेर्हि स्वाभाविकप्रवृत्तिविमुखीकरणार्थतया चेतःशुद्धिद्वारा निराकारविचारोदये तात्पर्यभानादितिभावः यद्यप्यापाततोयज्ञादिविचाराविधिवाक्यादिषु प्रतीयन्ते तथापि न तद्वाक्यानां तन्मात्रनिष्ठा तन्मात्रेण परमपुरुषार्थालाभात् किन्तु तद्वाक्यानां निराकारवाक्यैक्यतया निराकारमात्रे निष्ठेत्याह नहीत्यादि । पर्यवसानं । समाप्तिः । नैतत्स्वमतिकल्पितं किन्तु वेदोप्येवं वदतीत्याह सर्वेवेदाइति श्रुतेस्तात्पर्यार्थे परमतात्पर्यार्थे हेतुत्वेनोपन्यस्यति साक्षादिति । प्रकरणार्थमुप-

---

मानवाला नहीं होवे है अहं ममाभिमान विना प्रत्यक्षादि में प्रमाणबुद्धि नहीं होवे है और गौतमादिकों ने भी व्यावहारिक प्रमाणताको लेकर ही प्रत्यक्षादि को प्रमाण निरूपण किया है इसवास्ते विनाविचार से किसी विचार में पुरुष प्रवृत्त होजावेगा तब मोक्षमार्गसे पतित होजावेगा और अनर्थसागर को प्राप्त होजावेगा इसवास्ते निराकारमीमांसाके आचार्य श्रीगुरुनानकदेवजीने आरम्भ कियाहै। निराकारविचार का यह ही प्रयोजनहै सो हम आगे निरूपण करेंगे।

साक्षात्परम्परया सर्वेषां वेदानां निराकारे पर्यवसाना-भ्युपगमात् तस्मात्सिद्धमिदं निराकारविचारएव महि-मानमश्नुतइति निराकारमीमांसादर्शनस्य व्याख्यात-व्यस्येदमादिमं सूत्रम्—

## अथातो निराकारमीमांसा ॥१॥ इति

इहाथपदमानन्तर्यार्थम्। नार्थान्तरार्थमनभीप्सित-

---

संहरन्नाह तस्मादिति। निराकारमीमांसाव्याख्यानस्यारम्भं प्रतिज्ञाय व्याख्या-तव्यदर्शनस्य प्रथमं सूत्रं व्याख्यातुकामोभाष्यकारस्तत्स्वरूपनिर्देशपुरःसरं प्र-तीकमादत्ते निराकारेत्यादीतीत्यन्तम्। इतिशब्दः सूत्रक्रमनिर्देशार्थोनतु सूत्रा-वयवः। सूत्रमिति। अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनव-द्यं च सूत्रं सूत्रविदोविदुः' इतिवायुपुराणोक्तेः 'सूचनात्सूत्रमितियास्कोक्तेश्च शब्दसंक्षेपेणबह्वर्थं सूचयतीति सूत्रम्। अत्र भाष्येभूमिकायामेव निराकारं चि-दाकारं परं ब्रह्म विषयः अनर्थमूलनिवृत्तिपूर्वकनिराकारस्वरूपाभिव्यक्तिः फ-लम्। विषयवितृष्णोमुमुक्षुरधिकारी प्रतिपाद्यप्रतिपादकभावादिः सम्बन्धः इत्या-दिकं सूचितमितिवोध्यम् पदव्याख्यामारभमाणोभाष्यकारः शास्त्रारम्भसन्दे-हपूर्वकमधिकारिणं साधयन्नथशब्दस्यानन्तर्यार्थकत्वं प्रतिजानीते। इहाथपदमा-नन्तर्यार्थमिति। अत्र परिगृह्यते इतिशेषेण प्रतिज्ञापूरणीया। इह। अस्मिन् सूत्रे इत्यर्थः "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'त्यमरकोशात् अथश-ब्दस्य बहवोत्र संभावितार्थाः सन्ति तत्र मङ्गले यथा 'उदस्य कुम्भीरथशात कुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे। यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिव-र्गः स्नपयांबभूव ता'मिति नैषधेऽथस्नपयांबभूवेत्यस्य मङ्गलं स्नपनं चकारेत्यर्थः। आनन्तर्ये यथा अथ स्नात्वा भुञ्जीतेति। आरम्भे यथा 'अथ शब्दानुशास-नम्' प्रश्ने यथा 'अथ वक्तुं समर्थोसि' इति कार्त्स्न्ये यथा 'अथ धातून्ब्रूमः' इत्याद्यन्यतमार्थकोत्राप्यथशब्दः किं न स्यादित्यतआनन्तर्यार्थकं परिशेषयितु-मन्यार्थकत्वं तस्य प्रतिषेधति नार्थान्तरार्थमिति। तत्र प्रतिज्ञायांहेतुं निर्दिशति अनभीप्सितत्वादिति। प्रकृताभीष्टार्थाप्रयोजकत्वादित्यर्थः ननु प्रकृताभीष्टार्था-प्रयोजकत्वरूपोहेतुरेवाप्रयोजकइति शङ्कते कथमवगम्यते इति अनुकूलतर्केणा-

स्वात्कथमवगम्यते उच्यते। मङ्गलस्यावाच्यत्वात् शिष्य-प्रश्नस्यानुपलम्भात्। आरम्भस्यापि प्राथम्यादस्यसूत्रस्य

---

प्रयोजकत्वशङ्कां परिहरति उच्यते इति। यद्यर्थान्तरं स्यात्तर्ह्यधिकारिसिद्धिरू-पप्रयोजनरूपहेतूच्छित्तिरेव स्यादतो वाधवाधनाय संभावितमङ्गलरूपार्थान्तरं तावत्प्रतिषेधति मङ्गलस्यावाच्यत्वादिति अथशब्दस्य मङ्गलवाचकत्वाभावादि-त्यर्थः। तदुक्तमभियुक्तैः 'मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोप्ययं श्रुत्या मङ्गलसाधनं भवतीति' आर्थिकार्थमादाय कोशे तदुक्तिरितिभावः। ननु पूर्वो-क्तप्रमाणात्सूत्रकृतापि शास्त्रादौ मङ्गलं कार्य्यमित्यथशब्दोमङ्गलार्थं प्रयुक्तः 'ओं-कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलि-कावुभौ' 'अथ वर्णसमाम्नायः' इत्यत्रत्यात्रिभाष्यरत्नादावुदाहृतशिक्षाकारव-चनादितिचेन्न 'सकृदुच्चरितः शब्दः सकृदेवार्थं गमयती'तिन्यायात् आनन्त-र्य्यार्थकाथशब्दस्य मङ्गलार्थकत्वाभावेपि संगीतोपकारार्थं कृतेनापि मृदङ्गध्वनि-नेवेतरार्थकतया प्रयुक्तेनानेनापि मङ्गलसिद्धिसम्भवात् अव्ययतत्त्ववोधिन्यादि-षु 'निपातस्तुस्वरूपेणैव मङ्गलं मृदङ्गध्वनिवदि'त्यङ्गीकारात् 'सिद्धे शब्दार्थस-म्बन्धे-वृद्धिरादैच्' इत्यादावन्यार्थकैरपि सिद्धवृद्ध्यादिशब्दैर्मङ्गलसिद्धेर्महाभा-ष्यादौ दर्शितत्वाच्च ननु अथ वक्तुं समर्थोसीत्यादिवत् प्रश्नार्थकएवाथशब्दोस्त्वि-त्यतआहशिष्यप्रश्नस्यानुपलम्भादिति। शिष्यः शास्तुं योग्यः प्रश्नोयस्यासौ शिष्य-प्रश्नोधिकारी इदानीं तस्यैवानुपलब्धेः 'मानेर्जिज्ञासायामि' त्यनुशासनान्मी-मांसापदेनैव प्रश्नस्योपलम्भात् अतः पदस्य वैयर्थ्याच्चेतिभावः। नन्वथयो-गानुशासनमित्यत्र यथाथशब्दआरम्भार्थकोयोगशास्त्रमारभ्यते इति तद्वदत्रापि किं न स्यादित्यतआह आरम्भस्यापीति। आरभ्यते इति आरम्भः विचारः कर्मणि घञ् आरभ्यमाणस्य विचारस्याप्यनुपलम्भादित्यर्थः। अपिनानुपलम्भा-दित्यस्यानुकर्षः। अत्र मीमांसापदं ज्ञानेच्छापरम् उत विचारलक्षकम् आद्ये-ऽथशब्दस्यारम्भार्थत्वेन निराकारज्ञानेच्छारभ्यतइति हि सूत्रार्थः स्यात्स चासं-गतस्तस्याअनारभ्यत्वात् न हि प्रतिसूत्रमिच्छाधिक्रियते किन्तु तया विचारः न द्वितीयः कर्त्तव्यपदाध्याहारं विना विचारलक्षकत्वायोगात् अध्याहृते च ते-नैवारम्भोक्तेरथशब्दवैयर्थ्यात् किंत्वधिकारिसिद्ध्यर्थमानन्तर्यार्थतैव युक्तेति-सर्वमभिप्रेत्याह प्राथम्यादिति आरम्भोह्याद्यक्षणसम्बन्धः सचसाक्षाच्छास्त्रेएव

प्रथनसम्भवात् । परिशेषा—दुक्तार्थस्यैव तदर्थत्वात् । इतिसंक्षेपः ।

---

सम्भवति । न तु तदर्थविचारयोः शास्त्रव्यवधानेन तयोरसंभवात् शास्त्रस्य तु स्वरूपेणैव प्रथनसम्भवादितिभावः नन्व'थाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकात्स्न्यारम्भसमुच्चये'इतिमेदिनीकोशात् संशयाद्यर्थकोथशब्दोस्त्वितिचेन्न 'व्याख्यानतोविशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमि' ति न्यायेन शास्त्रस्य संशयनिवर्त्तकत्वेनैव शास्त्रत्वात् पूर्वं द्वितीयस्यानुक्तत्वेन समुच्चयस्याप्यसम्भवात् अधिकारस्याप्याधिकःकारः प्राधान्येनारम्भइत्यारम्भेन्तर्भावात् विकल्पस्य त्वत्र निरसनीयत्वान्नोपयोग इत्यादिसमाधानमुपारिष्ठान्मनासि निधायाह परिशेषादुक्तार्थस्यैवतदर्थत्वादिति । परिशेषाख्यानुमानप्रमाणादित्यर्थः यदाहुः'प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः'इति अत्राथशब्दआनन्तर्यार्थकोभवितुमर्हति अधिकार्यर्थे तस्यैवाभीप्सितत्वाद्यत्रैवं तत्रैवं यथा शुकवाक्यमित्यनुमानादुक्तार्थस्यैवानन्तर्य्यरूपार्थस्यैव तदर्थत्वादथशब्दवाच्यार्थत्वादिहाथपदमानन्तर्य्यार्थमितिप्रतिज्ञातपूर्वेण सम्बन्धः अथशब्दार्थवादं समापयतीति संक्षेप इति इतरेषामर्थानाम् सम्यक् क्षेपः प्रत्याख्यानमिति समाप्त-

---

( शंका ) अन्यविचारों को जैसी आपकी रुचि है वैसा मानों, परंच वेद तो सर्व प्रमाणों में शिरोमणि प्रमाण है सो वेद के कर्मकाण्ड मे स्वर्गादि फलों के साधन यज्ञादि के विचार किये हैं सो तौ महान होने चाहिये कैसे हम माने कि निराकार विचारही महान् है । ( समाधान ) कर्मकाण्ड का कर्ममात्र विधान में तात्पर्य नहीं है किन्तु चित्त की शुद्धि द्वारा निराकार के विचार में ही तात्पर्य है साक्षात्परम्परा से सर्व वेदों का निराकार विचार में ही तात्पर्य है 'सर्वे वेदा यत्पदमामनन्ति' यह श्रुति भी सर्व वेदों का निराकार में ही तात्पर्य ग्राहक है इसवास्ते निराकारविचार ही महान् है निराकारमीमांसा दर्शन का यह प्रथम सूत्रहै ॥ अथातोनिराकारमीमांसा ॥१॥ विषयवैराग्य के अनन्तर निराकार का विचारकरना चाहिये यह सूत्र का अर्थ है इस सूत्र में अथ पदका अनन्तर अर्थ है अन्य अर्थ नहीं है वक्ता की इच्छा के न होने से अन्य अर्थों में मंगल अथ शब्द का वाच्यार्थ नहीं है और शिष्य प्रश्न की उपलब्धि नहीं है इस सूत्र को प्रथम होनेसे आरम्भ अर्थ का भी स्वतएव भान होसकै है । परिशेष से जानाजाता है इहां अथ शब्द का अनन्तर ही अर्थ ग्राह्य है ।

**भवेदेतदेवं वक्तव्यं यदान्तर्य्यमिह विवक्षितन्तदपि नचशुद्धधर्मस्तथा बहुशस्तथाऽनुपलम्भात् उपलब्धौ च क्वचित्तस्य**

---

मित्यर्थः। प्रतिज्ञातार्थं पृच्छति वक्तव्यमिति यदानन्तर्य्यमिह विवक्षितं वक्तव्यंतदपीत्यन्वयः। यस्मादानन्तर्य्यमिति विग्रहः। ननु 'विद्यां चाविद्यां च यस्तद्वेदोभयं सहे' तियजुर्मन्त्रेण 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने' तिबृहदारण्यकश्रुत्या 'तपोविद्या च विप्रस्य नैःश्रेयस्करं पर' मिति 'कर्मणैव हि संसिद्धिमास्थिताजनकादय' इति स्मृतीतिहासाभ्यां च यज्ञादिकर्माणि निराकारज्ञानाय विधीयन्ते तद्बोधाय च पूर्वतन्त्रस्य सापेक्षत्वात्तदानन्तर्य्यमेवाथशब्दार्थोस्त्विति शङ्कते न च शुद्धधर्मानन्तर्य्यन्तथेति तथेत्यस्यान्ते वाच्यमितिशेषः। तथा च शुद्धधर्मानन्तर्य्यमेव तथाथशब्दार्थोस्त्विति न च वाच्यमित्यक्षरार्थः। शुद्धत्वंनिष्कामत्वम्। निरूपितं चैतन्मानकोपनिषद्भाष्ये निरूपयिष्यते च लेशतोऽत्रापि भाष्ये भाष्यकृतेति बोध्यम्। न च वाच्यमित्यत्र हेतुमाह बहुशस्तथानुपलम्भादिति सर्वथा साक्षादथशब्दानन्तर्य्यार्थस्यानुपलब्धिपराहतत्वादिति पदार्थः। अत्र भाष्यकारस्यायमभिप्रायः न तावदत्रोत्तरमीमांसानिरूपितानन्तर्य्यं संजाघटीति साधनभक्तेर्ज्ञानात्प्राचीनत्वेनानन्तर्य्यानुपपत्तेः फलरूपभजनानन्दस्य तु ज्ञानाजन्यत्वात्भक्तिर्ज्ञानाय परिणमते इति कृत्वापि ज्ञानसमकक्ष्यत्वाद्भक्तेर्नोत्तरमीमांसानन्तर्य्यं नापि पूर्वतन्त्रस्थन्यायसहस्रस्य निराकारब्रह्मज्ञाने तद्विचारे तद्भक्तौ वा उपयोगः। तस्य धर्मनिर्णयमात्रहेतुत्वात् नापि कर्मनिर्णयः। तस्यानुष्ठानहेतुत्वात् नहि धूमवह्न्योरिव धर्मनिराकारब्रह्मणोर्व्याप्तिरस्ति यया धर्मज्ञानाद् निराकारब्रह्मज्ञानं भवेत् यद्यपि'विद्यां चाविद्यां च 'तपोविद्या च विप्रस्य नैःश्रेयस्करं पर' मित्यादिना भक्तिकर्मणोर्निःश्रेयसहेतुत्वमभिधाय कथमनयोस्तद्धेतुत्वमित्याकांक्षायां'तपसा कल्मषं हंति विद्ययामृतमश्नुते। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इतिवाक्यशेषेण कर्मणः कल्मषक्षयहेतुत्वं विद्यायाअमृतप्राप्तिहेतुत्वं प्रदर्शितम् यत्र तु शुद्ध्याद्यवान्तरकार्य्यानुपदेशस्तत्रापि शाखान्तरोपसंहारन्यायेनोपसंहारः कर्तव्यः तथा च तदपेक्षितशुद्धिद्वारा कर्माणि हेतवो न साक्षात्तथापि तेषां नाधिकारिविशेषणत्वम् अज्ञातानां तेषां जन्मान्तरकृतानामपि फलहेतुत्वात् अधिकारिविशेषणं ज्ञायमानं प्रवृत्तिपुष्कलकारणमानन्तर्य्यावधित्वेन वक्तव्यम् अतः कर्माणि तदवबोधस्तन्न्यायविचारोवा नावधिरिति न निराकारभक्तिमीमांसायाधर्मजिज्ञासानन्तर्यमिति। नन्वन्तःकरणशुद्धि-

दूरत्वात्तदानन्तर्य्यस्य निराकारममिांसायामनुपपत्तेः अन्यथाविषयवैतृष्ण्यादिवैयर्थ्यन्त्वयाभ्यर्थितं स्यादिति चेद् ब्रूमहे विषयवैतृष्ण्यादयएव तथा तथाश्रुतावुपलब्धेरपरथानुपलब्धेश्च स्वानुभवसिद्धान्वयव्यतिरेकसिद्धकारणभावाच्च तेषामिति तथाहि निर्वेदमायादित्यादयः श्रुतयश्शतश उपलभ्यन्ते तथात्वं प्रथयन्त्यः भवन्तु वैतृष्ण्या-

---

द्वारैव निराकारभक्तिमीमांसायाः कर्मानन्तर्य्यमस्त्वितिशङ्कते उपलब्धौ च क्वचिदिति। क्वचिद्देशे उपलब्धौ सत्यामपि न च तद्विवक्षितमित्यनुषज्ज्यते इति पदयोजना शुद्धांशे आनन्तर्य्योपलम्भेपि न तदपि विवक्षितमित्यर्थः तत्र हेतुमाह तदानन्तर्य्यस्यनिराकारमीमांसायामनुपपत्तेरिति। तत्रापिहेतुः तस्य दूरत्वादिति शुद्ध्या व्यवधानेन साक्षादानन्तर्य्यानुपपत्तिरितिपिण्डार्थः। ननु नहि व्यापारेणव्यापार्य्यन्यथासिद्धइतिन्यायेनशुद्धिरूपव्यापारेणकर्मणामनन्यथासिद्धत्वेन तदान्तर्य्यमस्तीत्यतआह अन्यथेतिअन्तःकरणशुद्धिद्वारा कर्मणामेव भक्तिजनकत्वस्वीकारेनिर्वेदमायात्' त्यागेनैकेऽमृतत्वमानशुरि' त्यादिश्रुतिबोधितभक्तिसाधनीभूतवैराग्यस्य वैयर्थ्यं स्यादित्यर्थः। चेदित्यत्रानन्तर्यावधिसंदेहं बोधयन् प्रश्नयति ननु कस्मादानन्तर्य्यमत्र परिगृह्यते इत्यर्थः तथाचाधिकार्य्यभावादिदं शास्त्रं नारम्भणीयमिति प्राप्ते तं साधयन्नानन्तर्य्योत्तरं वक्ति ब्रूमहे इति विषयवैतृष्ण्यादयइव तथा आनन्तर्य्यरूपार्थशब्दार्थावधिभूताः अत्रादिपदेन 'एवं मद्भक्तियुक्तानामात्मा सम्यक् प्रकाशते' इतिस्मृत्या ज्ञानसाधनीभूता भक्तिरपि गृह्यते इतिबोध्यम्' तत्र हेतुविधयाप्रमाणमाह तथाश्रुतावुपलब्धेरिति-तथाचश्रुतिः 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोनिर्वेदमायान्नास्त्यकृतः कृतेनेति' अन्वयमुक्त्वा व्यतिरेकहेतुमाह अपरथानुपलब्धेश्चेति-अपरथेत्यस्यवैराग्याद्यानन्तर्य्यानङ्गीकारे इत्यर्थः श्रुतिसिद्धावन्वयव्यतिरेकौ स्वानुभवेनाप्यनुवदति' स्वानुभवेति। स्वपदेनात्रवादिप्रतिवाद्युभयं गृह्यते अग्रे भवन्त्स्विति बहुवचननिर्देशात् वादिप्रतिवाद्यनुभवेन सिद्धौ यावन्वयव्यतिरेकौ ताभ्यां सिद्धकारणत्वात् तस्य वैराग्यस्येत्यर्थः। तत्र प्रथमं प्रतिज्ञातां श्रुतिं स्वयमेवोदाहरति तथाहीति। श्रुतिस्तुपूर्वमुक्तैवआदिपदेन 'यदहरेव विरजेदि' त्यादिश्रुतेः 'दुःखोदर्केषु कामेषु जातनिर्वेदआत्मवानि' त्यादिस्मृतेश्च संग्रहः तथात्वमितिवैराग्यस्यानन्तर्य्यावधित्वमित्यर्थः प्रथयन्त्यः बोधयन्त्यः। पूर्वम-

दिषु निराकारमीमांसोपलभ्यते । विकारेषु सर्वत्रानृतमतेस्तस्य तेषूपादेयत्वमतेरुपशान्तेः॥ अभवत्सु च तेषु न तन्मीमांसोपलब्धचरी ततो विषयवैतृष्ण्यादयएव तथा

तिज्ञातावन्वयव्यतिरेकौस्वयमाह–भवत्स्वित्यादिना अयं चाहं च भवांश्चेति भवन्तस्तेषु 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' इत्येकशेषः। भवत्सु मध्ये वैराग्यवतएव निराकारमीमांसोपलभ्यते इत्यर्थः ॥ यद्वा भवत्स्विति शत्रन्तम् वैतृष्ण्यादिष्वधिकारेषु सत्सु सर्वत्रानृतमतेरुपशांतेः तस्मिन्नुपादेयत्वमतेस्तस्य निराकारमीमांसोपलभ्यते इत्यन्वयः वैराग्यादिषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते निराकारं मीमांसितुं ज्ञातुं च न विपर्यये । अथ कथंचित् कुतूहलितया प्रवृत्तस्यापि निराकारभक्तिविचारे फलपर्य्यन्तं तद्भक्तेरनुदयाद् व्यतिरेकसिद्धिरितिभावः । 'अक्षय्यं वै चातुर्मास्ययाजिनः सुकृत'मित्यादिकर्मफलाक्षयित्वश्रुतिबाधिकया यदल्पं तन्मर्त्यं यत्कृतकं तदनित्यमिति न्यायवत्या 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकः क्षीयते' इत्यादिश्रुत्या सर्वत्रदेहादौ अनृतमतिर्मिथ्यामतिर्यस्येति विग्रहः । अतोन्यदार्त्तमित्यादिश्रुत्यात्मनोऽन्यमात्रस्यानित्यत्वविवेकाद्वैराग्यलाभेऽधिकारी सिद्धइतिभावः । तस्यअधिकारिणः । तेषु वैराग्यादिषु यदुपादेयत्वं तत्रमतिर्यस्येति व्यधिकरणबहुव्रीहिः 'तस्मादेवंविच्छान्तोदान्तः' इत्यादिश्रुतेः उपगताशान्तिः शमादिर्यस्य सउपशांतिस्तस्येत्यर्थः शांतिदमादेरुपलक्षिकेतिबोध्यम् तेषु विषयेषु उपादेयत्वबुद्धिस्तस्याधिकारिणउपशाम्यतीति वा पिण्डार्थः।अन्वयमुक्त्वा व्यतिरेकमाह अभवत्स्वित्यादिना । तेषु वैराग्यादिष्वसत्स्वित्यर्थः । उपलब्धचरीति उपलब्धेऽधिकारिणि चरतीति उपलब्धचरी 'चरेष्ट'इतिचरधातोष्टः प्रत्ययः टिड्ढाणितिङीप्। यद्वा वैराग्यादितः पूर्वमुपलब्धा इत्युपलब्धचरी 'भूतपूर्वेचरडि' ति चरटि 'तसिलादिष्वकृत्वसुचः' इतिपुम्वद्भावः । यद्वा उपलब्धस्य पूर्वंभूतेत्युपलब्धचरी 'षष्ठ्यारूप्यचे'ति चकारेण चरडितिबोध्यम्। अथशब्दव्याख्यानमुपसंहरति –ततइति ।उपसंहृतमर्थमाह

अनन्तर निराकार की जिज्ञासा करनी योग्य है ऐसा इससूत्र का अर्थहोवे है अब इहां शंका है किससे अनन्तर निराकार की जिज्ञासा करनी चाहिये जो निष्कामकर्म के अनन्तर कहो तो जिन पुरुषों ने इसजन्म में निष्कामकर्म नहीं किये उनको पूर्वजन्म के बल से भक्ति न होनी चाहियेऔर वैराग्यादि सा-

के पुनस्ते इहामुत्र विषयवैतृष्ण्यं आत्मानात्मविवेचनं शमदमादिसाधनसम्पत् मुमुक्षा चेति ते ह्येतेऽथ्याउपायाः

विषयवैतृष्ण्यादयएव तथाइति निराकारभक्तिजिज्ञासायांवैराग्याद्यानन्तर्य्यमे-वेतितथेत्यस्यार्थः। तेषां संख्यां स्वरूपं च पृच्छति के पुनस्तेइति। स्वरूपं संख्यां चाहेहेतिसमारभ्यमुमुक्षाचेतीत्यंतं। संख्यागणनया ज्ञेया। एतेषामेवा-नन्तर्य्यावधित्वेनोपादानेहेतुमाह तेहीति। उपायाः। पुष्कलकारणानि। 'अ-क्षय्यं हवै चातुर्मास्ययाजिनः सुकृत 'मित्यादिश्रुत्या कर्मफलस्य नित्यत्वश्र-वणेन 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा' इत्यादिश्रुत्या च यावज्जीवं कर्मानुष्ठाननियमबोधनेन च वैराग्यासिद्धेः जीवस्य निराकारब्रह्मस्वरूपमोक्षोपि न युक्तः परस्परं तयोर्भेदात्। तस्य लोष्ठादिवत्पुरुषार्थत्वायोगाच्च ततो मुमुक्षुतायाअप्यसम्भवः प्राप्तइत्याक्षेपपरिहारार्थोऽतःशब्दस्तं व्याचष्टे अतःपदं हेत्वर्थमाचष्टेइति अतःशब्दोहेत्वर्थइत्यर्थः तदुक्तं गारुडे'अथातःशब्दपूर्वाणि सू-त्राणि निखिलान्यपि प्रारभेत नियत्यैव ततः किमत्रनियामकं। कश्चार्थस्तुत-योर्विद्वन् कथमुत्तमता तयोः। एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्वतः। एवमुक्तोनारदेन ब्रह्माप्रोवाचसत्तमः 'आनन्तर्याधिकारे च मङ्गलार्थेतथैवच। अ-थशब्दस्त्वतः शब्दोहेत्वर्थे समुदीरितः'इति अतःपदं आचष्ट इत्यस्य कर्तृ'यद्यपि अक्षय्यं हवै चातुर्मास्ययाजिनः सुकृतं भवती' त्यादिना कर्मफलस्य नित्यत्वं श्रावितं तत्तु'तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकः क्षीयते न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशु' रित्यादिश्रुत्या 'क्षीणे पु-ण्ये मर्त्यलोकं विशन्ति 'प्रजया कर्मणा मुक्तिर्धनेन च सतांन हि। त्यागेनैकेन मुक्तिः स्यात्तदभावे भ्रमत्यहो' इत्यादिस्मृत्या 'श्रमार्थमाश्रमाश्चापि वर्णानां पर मार्थतः। आश्रमैर्न च वेदैश्चयज्ञैः सांख्यैर्व्रतैस्तथा। उग्रैस्तपोभिर्विविधैर्दानैर्नाना-विधैरपि। न लभन्ते तमात्मानं लभंते ज्ञानिनः स्वय'मित्यादिपुराणवचनैः यत्कृतकं तदनित्यमितिन्यायेन च सह विरोधादाभूतसंप्लवपर्यन्तफलकथनेन कर्मस्तावक-

धनो के व्यवधान होनेसे कर्मों की अनन्तरता नहीं बनेहै ( समाधान ) वि-षयोंसेवैराग्यकेअनन्तरनिराकारकीजिज्ञासाकरनी योग्य है यह इहां अर्थ है जिस पुरुषको वैराग्य विवेक है उस को निराकार की जिज्ञासा होवे वह पुरुष विकारों को मिथ्या जानकर निराकार को अवश्य जिज्ञासा करे है और जिस को विषयों से वैराग्य नहीं उस को निराकार की जिज्ञासा कभी नहीं होवे है इसवास्ते अन्वय व्यतिरेक वैराग्यादि से अनन्तर जिज्ञासा करनी योग्य

अतःपदं हेत्वर्थमाचष्टे यतोविषयतृष्णामृगतृष्णावदनर्थजन्मभूर्निराकारमीमांसा च परमार्थकैवल्यावहा ततः परमार्थनिराकाराविर्भावाय निराकारमीमांसा कर्त्तव्येति वस्तुतस्तु भजनीयस्वरूपानिर्णयार्थम् "अथातोब्रह्मजि-

---

त्वेन न विरुद्धम्'आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते'इति विष्णुपुराणात्। एतेना'पामसोमममृताअभूम' इतिश्रुतिरपिव्याख्याता योपि'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इत्यादिना यावज्जीवकर्मानुष्ठाननियमः श्रावितः सोयं कर्मण्यधिकृतस्य नानधिकृतस्य नियोज्यस्य ब्रह्मवादिनः तथा च विदुषः कर्मानधिकारं दर्शयति श्रुतिः 'नैतद्विद्वानृषिणाविधेयोन विरुध्यतेविधिना शब्दचारः'। एतद्धस्मवैतत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचाक्रिरे तंवै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यंचरन्ति' इति यथाह गीतासु भगवान् 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते' इति। तथा च विरोधाभावात् अथातःशब्दाभ्यां प्रचुरकारणवतोधिकारिणः समर्थनाच्छास्त्रमारब्धव्यमितिसर्वं मनस्यभिप्रेत्य कर्तव्यपदाध्याहारेण सूत्रस्य वाक्यार्थं परिष्करोति यतइत्यादिना अतःपदं तत्पदार्थकं 'यत्तदोर्नित्यसम्बन्ध' इतिन्यायेन यतइत्याक्षिप्तम्। अनर्थजन्मभूरिति। विषयवासनोत्पादेन जन्मादिपरम्परारूपस्यानर्थस्य जन्मनउत्पत्तेर्भूर्भूमिः कारणमित्यर्थः। नापि च विषयतृष्णया किंचिदुपलभ्यते वस्त्वितिदृष्टांतेनाह मृगतृष्णावदिति। यथाहि मृगामरुभूमौ स्वकल्पितजलतृष्णयाभ्रमन्ते न लभन्ते सुखलेशं स्वाभीष्टं तथा तृष्णालवोपि न लभंते विषयेषु सुखकल्पनया सुखलेशमितिभावः। कथं तर्हि सुखलाभोभवतीत्यतआह निराकारमीमांसेत्यादि। परमार्थमविनाशिस्वरूपं यत्कैवल्यं तदावहा तत्प्राप्तिहेतुः चशब्दस्तुशब्दार्थः। अयं भावः निराकारे परे तत्त्वे स्वात्मतया विचारितेऽनर्थनिदानाज्ञाननिवृत्त्या कृतकृत्यताभवति स्वात्मानन्दस्याविनाशिन आविर्भावादिति। एतदेव दर्शयन् सकार्याज्ञाननिवृत्तेः प्रयोजनमाह परमार्थनिराकाराविर्भावायेति। भाष्ये ततइति ल्यपलोपेपञ्चमी तन्निवृत्तिमभिप्रेत्येत्यर्थः तन्निवृत्त्यर्थमित्यध्याहारोवेतिसुबोधम्। निराकारमीमांसेति निराकारभक्तिमीमांसेत्यर्थःब्रह्मविचारस्यावश्यकत्वेन सएवात्रानन्तर्य्यावधित्वेन विवक्षितोभाष्यकारैस्तु प्रौढवेदान्तसंस्कारैः 'कारणस्य कारणमपि तत्कारण' मितिन्यायेन

ज्ञासे" त्यादिना प्रतिपादितनिराकारं परं ब्रह्म तद्धि त-

---

तथाभिहितम् 'ज्ञानस्य भक्त्येकदेशतया अभिधास्यमानत्वादिति अन्वभिधास्यमानस्य भाष्यकारस्यापि तथैवाभिप्रेतत्वात् तेनैववैराग्यादेरपि गतार्थत्वाच्च वाक्यार्थज्ञाने पदार्थज्ञानं कारणमिति व्युत्पत्त्याथांतः पदयोरर्थप्रदर्शनपूर्वकम् सामान्यतोवाक्यार्थप्रदर्श्यपरिशिष्टंनिराकारपदार्थमाह निराकारमित्यादिना । अत्रनिराकारपदेन स्वरूपलक्षणं तटस्थलक्षणं च बोध्यते तथाहि निश्चितआकारः सच्चिदानन्दविग्रहोयस्येति तन्निराकारं 'सत्यं विज्ञानमानन्दं ब्रह्मेति' वृहदारण्यकश्रुतेः 'योवै भूमातत्सुख' मिति छान्दोग्यश्रुतेः तद्विज्ञानेन परि पश्यन्ति धीराआनन्दरूपममृतं यद्विभातीति' मुण्डकश्रुतेः 'आनन्दरूपः सर्वाधिष्ठानः सन्मात्र' इतिनृसिंहोत्तरतापनीयश्रुतेः नमोविज्ञानमात्राय परमानन्दमूर्तये' इति 'सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तये' इति च भागवतात्' आनन्दमयोभ्यासादि' तिसूत्रात् ' आनन्दमात्रकरपादमुखोदरादिरित्यादिपञ्चरात्रवचनात् 'परमात्मानं परमानन्दविग्रहमि' ति योगियाज्ञवल्क्यगीतावाक्याच्चेत्यभिप्रेत्याह परंब्रह्मेति । परः श्रेष्ठारिदूरान्योत्तरे क्लीवन्तु केवले' इति मेदिनीकोशात् सर्वप्रकर्षावधिभूतं केवलमित्यर्थः । 'सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठंप्रजाना' मित्यादिश्रुतेः 'परं ब्रह्म परं धाम पवित्रं परमं भवानि' त्यादिस्मृतेः 'परमः संप्रकृष्टत्वा' दितिलिंगादिपुराणाच्च उत्कर्षविशेषस्यास्पदमाह ब्रह्मेति 'बृंहणाद् व्यापनाद्ब्रह्मेत्यर्थः 'बृहिवृद्धावितिव्याकरणस्मरणात् । व्यापकत्वादेवदेशकालवस्तुतः परिच्छेदाभावादस्य नित्यत्वं सिद्धमितिभावः । 'ततः परं ब्रह्म परंबृहन्तमिति' श्वेताश्वतरश्रुतेः । 'बृहत्वाद्बृंहणत्वाच्च भावानां सलिलाश्रयात् । यस्माद्बृंहयते भावान् ब्रह्मतेन निरुच्यते' इतिवायुपुराणात्. बृहदस्यशरीरं वै यदप्रमेयं प्रमाणतः । बृहद्विस्तीर्णमित्युक्तं ब्रह्मा तेन सउच्यते' इतिब्रह्मवैवर्त्तपुराणाच्च । 'बृहत्त्वाद्बृंहणत्वाच्च तस्माद्ब्रह्मेतिशब्दित' इतिभारतात् 'बृहत्वाच्चस्मृतोब्रह्मेतिलैङ्गाच्च । 'यतः साकारसमुद्भवः' इतिवक्ष्यमाणतटस्थलक्षणप्रतिपादकं शास्त्रं प्रथमसूत्रस्यैव प्रपञ्चभूतमितिबोध्यम् तटस्थलक्षणमप्यत्रैव स्फोरयति तद्धीत्यादिना । तद्धि तदेव पूर्वोक्तं वक्ष्यमाणलक्षणं ब्रह्मैवेत्यर्थः 'यतोवाइमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे' तिभृगुवल्लीश्रुतेः 'स्रष्टा पाता तथैवात्ते' त्यादिस्मृतेः । 'जन्माद्यस्य यतः'

दविद्यया सर्वाकारमपि परमार्थतोनिराकारम् । तच्चा-
भिधित्सितलक्षणलक्षितं विवक्षितं ततो न शून्यशङ्का

---

इतिवेदान्तसूत्राच्च निष्पन्नः आकारोनामरूपात्मकः संसारोयस्मादित्यादि-व्युत्पत्त्या जगज्जन्मस्थितिलयाश्रयभूतं ब्रह्मैव स्वमायया साकारमिव भाति वस्तुतोनिराकारमेवेत्याह तदविद्ययेत्यादिना । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि' तिश्रुतेः'संभवाम्यात्ममायये'तिस्मृतेः 'विश्वं हि ब्रह्म तन्मात्रं संस्थितं विष्णुमायये' तिपुराणाच्च तदविद्ययेत्यस्य स्वाविद्याभिन्नमाययेत्यर्थः । 'माया चाविद्या च स्वयमेव भवती'ति नृसिंहोत्तरतापनीयश्रुतेः । 'तच्छब्दस्य पूर्वपरामर्शित्वात् ' ओंतत्सदितिनिर्देशोब्रह्मणस्त्रिविधः स्मृतः ' इतिगीतास्मृतेश्च यद्वा तेषां जीवानां याविद्याऽज्ञानं तेन निराकारेपि साकारत्वकल्पना न वस्तुत इत्यर्थः । 'सा माया या कार्य्यरूपाऽविद्या च जीवस्यैवोपाधिर्न तु ब्रह्मणि तत्सम्बन्धः शरीरिणां बन्धमोक्षकरी'इतिस्मरणात् 'त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितोये' इतिपुराणाच्च । यथाहुरुभयत्र 'प्रपञ्चोयदि विद्येत निवर्त्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ' इतिस्मृतिरपि तत्र 'मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि' इति एतेनाकारस्य सत्यत्वं वदन्तः परास्ताइति बोध्यम् । सर्वाकारमपीति । सर्वे आकारा नामरूपव्याकाराः कल्पिता यस्मिन्निति सर्वाकारमित्यर्थः 'ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं नामानि रूपाणि यमाविशन्ति ' इत्यादिश्रुतेः संज्ञामूर्त्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशादि ' तिसूत्रात् ' स सर्वनामा स च सर्वरूपः ' इत्यादिपुराणाच्च परमार्थतोनिराकारमिति । विचारप्रचारान्नामरूपोपाधिसंमर्देनेनवस्तुतोनिराकारं सच्चिदानंदरूपमेव संपद्यतेइत्यर्थः । यथाहुः ' अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकं । आद्यं त्रयं ब्रह्मरूपं मायारूपं द्वयं परमि ' ति ननु 'द्वे वाव ब्रह्मणोरूपे मूर्त्तं चैवामूर्त्तं च ' इत्युपक्रम्य अथातआदेशोनेति नेति ' इतिबृहदारण्यकश्रुतेः असद्वाइदमग्रआसीदितितैत्तिरीयश्रुतेः । ' 'असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वर ' मितिस्मृतेश्च निर्निश्चयनिषेधयोरिति ' कोशात् नास्ति बाह्यआभ्यन्तरश्चाकारो यस्येति व्युत्पत्त्या शून्यमेव निराकारपदार्थः कथं न स्यादिति चेन्नेत्याह तच्चेत्यादिना । तच्चेत्यत्र च शब्दस्त्वर्थकः वक्ष्यमाणशून्यशंका निरासार्थकः तत्तु निराकारं ब्रह्मैव नतु शून्यतत्त्वमित्यर्थः यतोवक्ष्यमाणलक्षणलक्षितं ब्रह्मैव निराकार-

विधेया नशून्यम्मीमांसितुमपि शक्यं शून्यत्वादेव अथ शून्यस्य शून्यत्वेनैव मीमांस्यत्वं स्यात् युक्तं चैतद् यस्य योहि स्वभावस्तस्य तेनैव रूपेणमीमांस्यत्वात् अन्यस्वभावस्यान्यथामीमांसने विप्रलम्भनापातादितिचेन्मैवं यथाकथंचित्तथात्वेपि तन्मीमांसाया निष्प्रयोजनत्वात्।

---

पदवाच्यमतः सर्वशून्यशङ्कैव न कार्या कुतः शून्यतत्त्वमिति पिण्डार्थः । पूर्वोक्तप्रमाणात्तु शून्यशङ्का प्रसरेदेवेति नास्तिकशिरोमणिशून्यवादिमाध्यमिकमतमाशंक्यनिषेधति न च शून्यम्मीमांसितुमपि शक्यं शून्यत्वादेवेति। यत्स्वरूपतएव शून्यमस्ति न हि तत्केनापि विवेक्तुं शक्यते स्वपराभावादितिभावः । अत्रेदं बोध्यम् । चत्वारः किल बुद्धस्य शिष्याः सौत्रान्तिकोवैभाषिकोयोगाचारोमाध्यमिकश्चेति तत्र बुद्धेनाद्ययोर्वाह्यार्थेष्वभिनिवेशमालोक्य तदाशयानुसारेणैव सर्वशून्यतालक्षणे तत्त्वे तयोर्वुद्धेरवताराय बाह्यार्थवादमभ्युपेत्य राद्धांतोभिहितः तृतीयस्य त्वीषत्परिपक्वचित्तस्य विज्ञानमात्रास्तित्ववादेन चतुर्थस्य मुख्याधिकारिणस्तु साक्षादेव शून्यवादउपदिष्टः यथाहुः[1] देशना लोकनाथानां सत्त्वाशयवशानुगा।भिद्यन्ते बहुधा लोके उपायैर्बहुभिः पुनः।गम्भीरोत्तान भेदेन क्वचिच्चोभयलक्षणा। भिन्नापि देशनाऽभिन्ना शून्यताद्वयलक्षणे'ति'आदेशोनेतिनेतीति' श्रुतिस्तु मूर्त्तामूर्त्तप्रकृतपृथिव्यादिवाय्वादिनिषेधपरा न तु सर्वशून्यं तत्त्वं प्रतिपादयति असदेवेति तु सदेवेत्यादिस्थले निषेध्यहेयसमर्पणार्थम् स्मृतिस्तु आसुरप्रकरणस्थत्वेन प्रत्युत नास्तिकनिंदां बोधयतीत्याहुः अतोनास्माकं शून्यशंकापीति भावः । ननु यथा शून्यत्वादेव शून्यं न मीमांसितुं शक्यते तथा निराकारत्वादेव निराकारमपि मीमांसितुं न शक्यं स्यादिति प्रतिवन्दीमभिप्रेत्य पुनरपि शङ्कते अथेत्यादिना विप्रलम्भना वंचना शेषं सुबोधम् प्रतिवन्दीपरिहारमभिप्रयन् पूर्वोक्ताशङ्कां निषेधति नेति। निषेधप्रतिज्ञायां हेतुमाह तन्मीमांसायानिष्प्रयोजनत्वादिति।शून्यत्वादेव।तस्य यथाकथंचिन्मीमांसितत्वे प्राप्तेपि प्रयोजनाभावादेव न शून्यं मीमांसितुं शक्यम् निराकारमीमांसने तु भ्रमादिनिवृत्तिपुरःसरपरमभजनानन्दरूपप्रयोजनस्य सत्वान्न प्रतिवन्ध्यवकाश इतिभावः । ननु सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निविवृत्सूनां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः तस्मात् सर्वं दुःखं दुःखमिति भावनीयम् ननु किं तदिति पृष्टे दृष्टान्तः कथनीय इति चेत् मैवं स्वलक्षणानां

## तस्याः किंचिदपेक्ष्यानन्तर्यानिर्देशश्च

क्षणानां सालक्षण्याभावात्क्षणिकं क्षणिकमिति भावनीयम् एतेन सदृशमपरमिति वक्तुमशक्यत्वात् ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् एवं शून्यं शून्यमित्यपि भावनीयं स्वप्ने जागरणे च न मयादृष्टमिदं रजतादीतिविशिष्टनिषेधस्योपलम्भात् यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदंताया अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्य चिद्वादिनः न चार्द्धजरतीयमुचितं न हि कुक्कुट्या एकोभागः पाकाय अपरोभागः प्रसवायकल्पतामिति तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शन द्रष्टॄणां मध्ये एकस्यानेकस्य वा असत्त्वेनिषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति अतस्तत्त्वं सदसदुभयात्मकचतुष्कोणविनिर्मुक्तं शून्यमेव तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम् असत्त्वं स्वभावइति पक्षे वन्ध्यापुत्रादेरपि प्रतीतिप्रसंगः स्यात् यथोक्तम् 'न सतः कारणापेक्षा व्योमादेरिव युज्यते। कार्य्यस्यासंभवी हेतुः खपुष्पादेरिवासतइति' तदुक्तम् भगवता लंकारावतारे 'बुद्ध्या विविच्यमानानां स्वभावोनावधार्य्यते। अतोनिरभिलप्यास्ते निःस्वभावाश्च दर्शिता' इति। 'इदं वस्तुबलायातं यद्वदन्ति विपश्चितः। यथा यथार्थाश्चिन्त्यन्ते विशीर्य्यन्ते तथा तथे'तिच न क्वचिदपि पक्षे व्यवतिष्ठन्ते-इत्यर्थः। दृष्टार्थव्यवहारश्चनः स्वप्नव्यवहारवत् संवृत्त्या सङ्गच्छते अतएवोक्तम् 'परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ। कुणपः कामिनी भक्ष्य इति तिस्रोविकल्पनाः। इति तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्वाणशून्यरूपं सेत्स्यतीति वयं कृतार्था नास्माकमुपदेश्यं किंचिदस्तीति तथाच भिक्षुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्त्तनमेव सर्वशून्यतायाः प्रयोजनमित्यतआह तस्या इति

---

है यह ही इस सूत्रका अर्थ है। इस सूत्र में अतः शब्दका हेतु अर्थ है जिस हेतु से विषयों की तृष्णा मृगतृष्णा के वत् अनर्थों का कारण है इसी हेतु से परमार्थ परब्रह्म निराकार की अभिव्यक्ति के वास्ते निराकार की जिज्ञासा करनी चाहिये इस सूत्रमें निराकार परब्रह्म का नाम है सो परब्रह्म अविद्या से सर्वाकार है और वास्तव में निराकार है उसका लक्षण दूसरे सूत्रमें कहेंगे इसवास्ते शून्य के ग्रहण की शङ्का नहीं करनी और शून्य का शून्यस्वभाव होने से जिज्ञासा भी नहीं बने है। ( शङ्का ) शून्य की शून्यत्व रूप करके ही जिज्ञासा बनसके है जिस वस्तु का जैसा स्वभाव होवे है उस की उसीरूप करके

तदाविर्भावस्यामोक्षत्वाच्च न हि स्वाभावं भावयितुं कश्चिदपि प्रयतते च आविर्भावतिरोभावयोरभावेऽभावाच्च । नचाभावे तौ सम्भवतोऽभावत्वादेव अन्यथावन्ध्यासूनोरप्याविर्भाव तिरोभावावनिवार्य्यौ भवेताम् अपि च न तदर्थेन भक्तिः

किंचिदपेक्ष्यतस्याः आनन्तर्य्यासिद्धेश्चेत्यन्वयः ननुपूर्वोक्तभावनात्रयस्यैवानन्तर्य्यावधित्वमस्माकमस्तीत्यरुचेराह तदाविर्भावस्यामोक्षत्वाच्चेति सर्वशून्यताज्ञानस्य फलं नैरात्म्यलक्षणंमुक्तिस्तव शून्यवादिनोभिमता सा च न पुरुषार्थः प्रत्युतानर्थएव न हि कश्चिदात्मनोनाशमसत्त्वं वा स्पृहयति प्रत्युत द्वेष्टयेवेति शास्त्रस्य नैष्फल्यमनर्थार्थत्वं चेत्यभिप्रेत्य तन्मते मोक्षाभावं व्युत्पादयति न हि स्वाभावं भावयितुं कश्चिदपि प्रयतते चेति । ननु राजभयापकीर्त्यादिवशाद्बहवः स्वात्मानं नाशयितुं यतमाना दृश्यन्त इत्यतआहआविर्भावेति अभावे आविर्भावतिरोभावौ न स्वीक्रियेतेअभावत्वादित्यर्थः ननुसामयिकाभावे प्रादुर्भावतिरोभावयोर्नैयायिकवृद्धैः स्वीकारादभावत्वहेतुर्व्यभिचारीत्यतआह नचाभावइति अयंभावः । भवतां शून्यं कस्याभावस्यात्मा न तावत् प्रागभावस्य तस्य विनाशित्वात् शून्यस्य च नित्यत्वात् प्रागभावस्याविर्भावे पुनस्तद्घटस्याविर्भावप्रसंगात् अतएव न ध्वंसस्य आत्मा तस्योत्पत्तिमत्त्वात् नाप्यन्योन्याभावस्यात्मा तस्य सार्वदिकत्वेन सर्वत्रसुलभत्वेन च सर्वेषां सदामोक्षप्रसंगात् नाप्यत्यन्ताभावस्यात्मा तस्य सावच्छिन्नप्रतियोगिताकत्वेन नियतत्वात् सर्वशून्यस्यापि तथात्वे शून्यस्य शून्यत्वमेव न स्यात् तदर्थं धर्मसम्बन्धयोस्सत्तास्वीकारापातात् नापि सामयिकाभावस्यात्मा शून्यम् भवितुमर्हति मोक्षस्याप्यनित्यत्वापातात् तस्यानङ्गीकाराच्चेति युक्तमुक्तं न चाभावे तौ संभवतोऽभावत्वादेवेति ननु माभूत् भावात्मा शून्यं तदन्यदेव तदस्त्विति चेत्तत्राह अन्यथेति अन्यप्रकारेण स्वीकारे इत्यर्थः शून्यस्य सद्रूपत्वमनिवर्चनीयत्वमसद्रूपत्वं वा न

जिज्ञासा करनी उचित है अन्य स्वभाववाली वस्तु का अन्य स्वभाव से विचार करने में विप्रलंभकता दोष प्राप्त होवे है ( समाधान ) इस रीति से कथंचित शून्य की जिज्ञासा का सम्भव तो होसके है परंच उसकी जिज्ञासा करनी निष्प्रयोजन है और शून्य की जिज्ञासा को किसी की अपेक्षा से अनन्तरता भी नहीं सिद्ध होवे है और शून्य की अभिव्यक्ति को मोक्ष का रूप भी बने नहीं और अपने शून्य होने की किसी को इच्छा भी नहीं होवे है ॥

**सार्था भवति अभावे भक्तेरसम्भवात् किञ्च शून्ये प्रमाणसाक्षिसद्भावासद्भावविकल्पेन न शून्यासिद्धिः कथमप्यङ्गीकारार्हा तस्मान्निराकारं परं ब्रह्मेति तच्चैकम् स्वभावतोतोऽत्र निराकारस्य मीमांसेति षष्ठीसमासः ।**

---

प्रथमद्वितीयौ स्वमतहानिपरमतप्रवेशादिना कलुषितत्वात् असद्रूपत्वे त्वाह वन्ध्यासूनोरप्याविर्भावतिरोभावावनिवार्य्यौ भवेतामिति ननु यथा भवतां मते निर्धर्मकं ब्रह्म सदसदनिर्वचनीयभिन्नमेवास्ति तथास्माकं शून्यमप्यास्त्विति चेत्तत्राह अपि च न तदर्थेन भक्तिः सार्थाभवतीति शून्यस्य भावत्वमभावत्वं वा तत्र न तावद्भावत्वं पूर्वोक्तदोषप्रसंगात् । अभावेत्वाह अभावे भक्तेरसंभवादिति । शून्यरूपाभावस्य निःस्वरूत्वेन भक्तेरसम्भवइति भावः 'सदेव सौम्ये'त्यादिश्रुतेर्ब्रह्मणोभावरूपत्वाङ्गीकारेण तत्र सम्भवति भक्तिरितिवोध्यम् । ननु भजनं भक्तिर्भजनं च सेवनं पौनःपुन्येनाभ्यासः स यथापरमेश्वरप्राप्त्यर्थं भवद्भिः सम्भाव्यते तथास्माभिरपि शून्यनिर्वाणप्राप्त्यर्थं पूर्वोक्तभावनाचतुष्टयस्य भक्तिरूपाभ्यासः क्रियते एवेत्यतः समूलमुन्मूलयन्नाह किंचेति । तव मते केन प्रमाणेन शून्यस्य प्रसिद्धिः न तावत् प्रत्यक्षेण अवस्तुनइन्द्रियसम्बन्धायोगात् अतएव स हचाराद्यग्रहान्नानुमानेन । नाप्यनुपलब्ध्यार्थापत्त्या च तयोस्त्वया मानत्वानभ्युपगमात् नापि साक्षिणा तदभ्युपगमे सर्वशून्यत्वाप्रसंगात् क्षणिकविज्ञानानां च स्वमात्रगोचरत्वाच्छून्येन तेषां सम्बन्धाघटनाच्च प्रमाणाभावे शून्यमेव न सिद्ध्यति अन्यथा वन्ध्यापुत्रोपि सिध्येदित्याद्यभिप्रेत्याह शून्येप्रमाणसाक्षिसद्भावासद्भावविकल्पेन न शून्यसिद्धिरिति निर्विशेषस्याप्यभावस्य विचित्रजगज्जननस्वाभाव्ये तस्य सार्वत्रिकत्वात्सर्वकार्य्याणां सर्वत्रोत्पत्तिः स्यादित्यभिप्रेत्याह कथमप्यङ्गीकारार्हेति निराकारंब्रह्मैव परिशेषयन् शून्यवादापवादमुपसंहरति तस्मादिति ननु शून्यवादनिरासेपि निश्चितआकारोयस्येत्यादिव्युत्पत्त्यान्योघटादिरेव निराकारपदार्थः किं नस्यादित्यत आह तच्चैकामिति । तन्निराकारपदवाच्यत्वेनाभिप्रेतं तु एकमेव नानेकम् घटादीनां वहुत्वाद्दृश्यत्वादिमत्वाच्च न निराकारपदवाच्यत्वेनाभिप्रेतत्वमित्यर्थः । ननु 'यस्य पृथिवीशरीरं यस्यापः शरीरं यस्य विज्ञानं शरीरं यस्य आत्माशरीर' मित्यादिश्रुतौ ब्रह्मणोपि वहुरूपत्वश्रवणात् कथं तस्यैकत्वमित्यतआह स्वभावतइति । सोपाधिकस्यानेकत्वेपि 'एकमेवाद्वितीयं नेहनानास्तिकिंचने'त्यादिश्रुतेर्निरुपाधिकस्य केवलमेवेत्यर्थः । स्वभावतइत्यस्य स्वरूपतइत्यर्थः । शून्यवादनिरासपूर्वकसच्चि-

प्रकृतिविकृतिभावविरहान्न चतुर्थीसमासोनिराकारायमीमांसेति । निराकारस्येतिषष्ठी कर्मणि न शेषे मीमांस्यापेक्षत्वान्मीमांसायाः मीमांस्यान्तराश्रवणाच्च । कथमेतन्मीमांसोपयोगिनीनामन्यासां मीमांसानां तथासति

---

दानन्दविग्रहकनिराकारस्यसमर्थनादपि शास्त्रमारब्धव्यमित्याहअतइति । सूत्रवाक्यपरिपूर्णार्थमध्याहृतकर्तव्यपादान्वयार्थे च निराकारमीमांसापदेन विचारं लक्षयितुंप्रतिज्ञातवाक्यार्थसमर्थनाय तस्य स्वाभिमतसमासकथनेनावयवार्थं दर्शयति निराकारस्य मीमांसेतिषष्ठीसमासइति । ननु यूपाय दारु यूपदारु इत्यादिवत्प्रकृतेपि निराकारायमीमांसेतिचतुर्थीसमासएवास्तु प्रथमोपस्थितत्वादित्यतआह प्रकृतिविकृतिभावविरहान्नचतुर्थीसमासइति । विकृतिःप्रकृत्येतिवक्तव्य'मितिभाष्यवार्तिकेन नियमनान्नचतुर्थीतदर्थार्थेतिसूत्रेण समासोभवितुमर्हति निराकारस्य मीमांसा अविकारत्वादित्यर्थः । वस्तुतस्तु तादर्थ्ये चतुर्थी एवात्र नोदेति निराकारस्य मीमांसोपकाराजनकत्वादिति भावः । सम्बन्धसामान्यं हि शेषः मीमांसेत्यत्र मानेर्जिज्ञासायामितिशास्त्रात्सन् प्रत्ययवाच्येच्छाया ज्ञानं कर्म तस्य च ज्ञानस्य निराकारं कर्म तत्र सकर्मकक्रियायाः कर्मज्ञानं विना ज्ञातुमशक्यत्वात् इच्छायाविषयज्ञानजन्यत्वाच्च प्रथमापेक्षितं कर्मैवात्र षष्ठ्या वाच्यं न शेषइत्यभिप्रेत्य संभावितशेषषष्ठीं दूषयति निराकारस्येति षष्ठी कर्मणि न शेष इति । 'कर्तृकर्मणोः कृति' इतिसूत्रेण विहितकर्मषष्ठ्याः षष्ठीत्यनेन समासः न तु शेषे षष्ठीतिविहितषष्ठ्याइत्यर्थः । नेतिप्रतिज्ञायां हेतुमाह मीमांस्यापेक्षत्वादिति ननु प्रमाणादिकमन्यदेव मीमांसायाः कर्मास्तु निराकारं तु तच्छेषितया सम्बध्यतामित्यतआह मीमांस्यान्तराश्रवणाच्चेति । 'श्रुताश्रुतयोः श्रुतसम्बन्धोबलीयानि' तिन्यायेनोपस्थितं निराकारं कर्म त्यक्त्वाऽन्यदश्रुतं कल्पयन् 'पिंडं त्यक्त्वा करं लेढी' तिन्यायमनुसरतीतिभावः । शतं हि षष्ठ्यर्थाइति महाभाष्यात् 'सर्वे पदा हस्तिपदे निमग्ना' इतिन्यायाच्च निराकाराश्रिताशेषप्रमाणादिविचारप्रतिज्ञानार्थं शेषषष्ठीं स्वीकारयति कथमित्यारभ्य चेदित्यन्तेन । तथासति कर्मषष्ठ्यन्तेन समासे सति एतन्मीमांसोपयोगिनीनां निराकारभक्तिमीमांसोपयोगिनीनामान्यासां निराकारभक्तिलक्षणसाधनादिमीमांसानां प्रतिज्ञाया लाभः कथं भवेदित्यन्वयपूर्वकप्रश्नार्थः । शेषेषष्ठीतिविधानात् षष्ठ्या सम्बन्धमात्रं प्रतीतमपि विशेषाकांक्षायां सकर्मकक्रियासन्निधानात्

प्रतिज्ञाल्लाभइति चेत् उच्यते मुख्यमीमांसयाऽन्यासां तदविनाभूतानां मीमांसानामर्थतोल्लाभात् यथा राजासौ यजतेइत्युक्त्या तदविना भूता पत्नी लब्धार्थादेव भवति तद्वद्याभिर्मीमांसाभिर्विना न भवति निराकार-मीमांसा ता मीमांसा अर्थलब्धाएव भवन्ति ततो न पृथक्

---

कर्मत्वे एव पर्य्यवस्यति तदुक्तंवार्तिककृता 'अवश्यमेव सामान्यं विशेषं प्रतिगच्छती' ति न चैवं कर्मलाभेपि प्रत्यक्षं 'कर्तृकर्मणोः कृती' तिसूत्रेण मीमांसापदस्याकारप्रत्ययान्तत्वेन कृदन्तस्य योगे विहितषष्ठीवाच्यं प्रथमापेक्षितं कर्मत्यक्त्वा परोक्षमशाब्दं कल्पयतोन्यर्थस्ते प्रयासइतिशंक्यम् निराकार-भक्तिविशेषाशेषविचारप्रतिज्ञानार्थत्वात् शेषषष्ठ्यां हि स्वीकृतायां निराकारसम्बंधिनी मीमांसा प्रतिज्ञाता भवति तत्र यानि लक्षणप्रमाणयुक्तिज्ञानभक्तिसाधनफलादीनि तेषामपि विचारः प्रतिज्ञातोभवति तन्मीमांसाया अपि निराकारभक्त्यर्थत्वेन निराकारसम्बन्धित्वात् कर्मणि षष्ठ्यां तु निराकारकर्मकएव विचारः प्रतिज्ञातोभवतीत्यभिसन्धिना शेषषष्ठीत्युच्यते अतोन मत्प्रयासोऽन्यर्थ इति गूढाभिसन्धेर्भाव इति भावः। त्वत्प्रयासस्येदं फलं न युक्तं सूत्रेणमुखतः प्रधानभूताया निराकारभक्तेर्विचारे प्रतिज्ञाते सति तदुपकारणानां विचारस्यार्थिकत्वेन प्रतिज्ञातत्वादित्याह सिद्धान्ती न मुख्यमीमांसयेत्यारभ्य भवन्तीत्यन्तेन। संग्रहीतमर्थं सदृष्टान्तं व्याकरोति राजेत्यादिना राजायजतेइत्यु-

---

शून्यमें आविर्भाव तिरोभाव का भी असम्भव है शून्यका आविर्भाव तिरोभाव मानोगे तो वन्ध्यापुत्र के भीआविर्भाव तिरोभाव होने चाहिये और शून्य की भक्ति का असम्भव है औरशून्य में कोई परमाण वा साक्षी मानो वा न मानो तो भीशून्य की सिद्धि नहीं होवे है इसवास्ते निराकार परब्रह्म है सो निराकार स्वरूप से एक है तिस की मीमांसा यह अर्थ है तिसके वास्ते मीमांसा यह अर्थ नहीं है जहां कार्यकारणभाव होवे है उसस्थान में तिसवास्तेयह अर्थ होवे है इहाँ कार्यकारणभाव नहीं है निराकार की यह कर्मषष्ठी विभक्ति है केवल संबन्ध अर्थ में नहीं है मीसांसा को कर्म की अपेक्षा होने और निराकार अन्य ग्रहण करनेसे निराकारमीमांसा का ही लाभ होवे है निराकारमीमांसा का उपयोगी साधनादिमीमांसा का कैसे लाभहोवेगा (समाधान) मुख्य निराकारमीमांसा के ग्रहण से उसकी उपयोगी साधनादि मीमांसा का अर्थात् लाभ होवे है।

ताः प्रतिज्ञातव्या भवन्ति । तस्मादेषा कर्मणि षष्ठी न शेषे महान् विचारोमीमांसा महत्त्वं चास्या अनर्थमूल-निराकरणात् । स्वस्वरूपाविर्भावकत्वाच्चेत्येवमुन्नेयम् ।

---

त्त्वा तदविना भूता पत्नी अर्थादेव लब्धा भवतीत्यन्वयः पत्न्याश्च दम्पत्योः सहाधिकाराद् यज्ञकर्तृकत्वात् तत्फलभोक्तृत्वसम्बन्धाद् यज्ञसंयोग इतिभावः । ततएव महर्षिः पाणिनिः 'पत्युर्नोयज्ञसंयोगे' इति सूत्रं प्रणयति स्मेतिबोध्यम् । एकाकिनोपि राज्ञोगमनसम्भवाद्गच्छतीत्युपेक्षितम् षष्ठीवादमुपसंहरति तस्मा-दिति । ननु 'अथातो धर्मजिज्ञासे' त्यादिवदत्रापि 'अथातोनिराकारभक्ति-जिज्ञासे' त्येवं जिज्ञासापदघटितं सूत्रं सूत्रकृताकुतोन कृतमित्यतस्तैरगतार्थत्वं सूचयन्मीमांसापदसंवलितसूत्रकरणे तात्पर्य्यमाह महान्विचारोमीमांसेति । नन्वनेकशाखाभेदमभिन्नवेदशाखिविचारवत्त्वेनपूर्वतन्त्रादेरपिमहत्त्वमसंदिग्धमि-तिकथमस्यैवमहत्त्वमुच्यते इति तत्राह महत्त्वं चास्याअनर्थनिराकारणादिति मानपूजायामितिपाणिनिस्मरणात् अनर्थनिवृत्तिपूर्वकभक्तिप्रतिपादनादस्यैव-महत्त्वमित्यर्थः । त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं उर्वारुकमिव बन्धनान्मृ-त्योर्मुक्षीय मामृतादि' तितैत्तिरीयमन्त्रात् 'भक्तिः प्रसिद्धा भवमोचनाय ना-न्यत्ततः साधनमस्ति किंचिदि' त्यादिव्यासस्मरणाच्च विस्तरमग्रेप्रमाणयि-ष्यामः । प्लवाह्येतेऽदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयोयेभिन-न्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति 'अविद्यायामन्तरे वर्त्तमानाः स्वयं धीराः पण्डितं मन्यमानाः जंघन्यमानाः परियन्तिमूढा अन्धेनैव नीयमाना यथान्धाः' इत्यादि मुण्डकादिश्रुतेः 'यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः कामात्मानः स्वर्गपरा जन्मकर्मफल-प्रदाम् क्रियाविशेषबहुलां भोगैश्वर्य्यगतिं प्रति' इत्यादि स्मृतेश्च कर्मकाण्डस्य तु स्वर्गादिविनाशिफलबोधकत्वेनानर्थपरत्वादमहत्त्वमितिभावः । अनर्थनिरा-करणंसच्चिदानंदस्वरूपाविर्भावश्च भक्तेः फलं तत्र प्रथममुक्त्वा द्वितीयमाह स्वस्वरूपाविर्भावकत्वाच्चेति धर्मज्ञानभक्त्यादिबहुतरविचारसत्वादप्यस्य म-हत्त्वमित्याह इत्येवमुन्नेयमिति इत्यादि बहुतरमूह्यमित्यर्थः ॥ अत्र यद् बहुतरं वक्तव्यं तदुक्तं प्रथमसूत्रावतरणे इति बोध्यम् । ननु निराकार-मीमांसाया ब्रह्मजिज्ञासया भेदोऽभेदो वा नाद्यः 'भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ज्ञानादेव

**न च ब्रह्मजिज्ञासया सहास्या अभेदःअस्यास्तद्विशेषरूपत्वात् । अत्र हि विशेषतोनिराकारात्मतयैव ब्रह्ममीमांस्यते तन्मीमांसामात्रेण मुमुक्षोर्मोक्षसिद्धेःसम्भवात्**

---

तु कैवल्यं ' नान्यः पन्थाविद्यतेऽयनाय ' इत्यादिश्रुतिभ्यो ब्रह्मजिज्ञासायां अपि अविद्यातत्कार्यनिवृत्तिपूर्वकपरमानन्दाविर्भावजनकत्वेन महत्त्वसत्त्वात्कथमस्याएव महत्त्वसंगतिः न द्वितीयः तया पौनरुक्त्यात् महत्त्वाभावेन अस्यारम्भस्य वैयर्थ्यादित्याशंक्याह न च ब्रह्मजिज्ञासया सहास्या अभेदइति। न चेत्यस्य वाच्यमितिशेषः । नचवाच्यमित्यत्र हेतुः अस्याइति । अस्या निराकारमीमांसायास्तद्विशेषरूपत्वात् ब्रह्मजिज्ञासाविशेषात्मकत्वादित्यर्थः । ब्रह्मजिज्ञासायां द्विरूपेण ब्रह्मणः प्रतिपादनं सगुणत्वेन निर्गुणत्वेन च सगुणमुपास्यं निर्गुणं ज्ञेयमत्र तु निर्गुणरूपेणैव ब्रह्मणोविचारः कृत इति भावः । संग्रहवाक्यं विवृणोति अत्र हीति । सविशेषरूपेण ब्रह्म कुतो नात्र मीमांस्यतइतिचेत्तत्राह तन्मीमांसामात्रेणेति ।मात्रपदं सविशेषविचारं व्यवच्छिनत्ति ‘ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये’इति मन्त्रवर्णात् सर्वेषां मुमुक्षूणां निःश्रेयसफलाय निराकारभक्तिविचारः कर्तव्यइतिसूत्रस्यसमासघटितावयवार्थमुपसंहरति तस्मादिति । सम्भावितसर्वदोषनिराकरणेन शास्त्रारम्भस्य समर्थनादित्यर्थः । निराकारमीमांसा कर्त्तव्येति । अथातोधर्मजिज्ञासाइत्यादिवत्कर्त्तव्यजिज्ञासापदं विहाय तत्स्थाने मीमांसापदमभिषेचयतः सूत्रकारस्य भक्तितत्साधनोभयमभिप्रेतंतथाहि अत्र यदिमानेर्जिज्ञासायामिति शास्त्रात् ज्ञानेच्छे प्रकृत्यर्थः सन् तु मानवधेतिसूत्रेण स्वार्थिकस्तदा तत्रकर्तव्यत्वानन्वयात् तत्र प्रकृत्यर्थैकदेशज्ञानेन भक्तिसाधनीभूतं ज्ञानं विवक्ष्यते गङ्गायां मीनघोषौ स्त इत्यादिवदुभयसम्भवादिच्छार्थकप्रकृत्या इच्छासाध्यो विचारोलक्ष्यते तथा च निराकारज्ञानाय विचारः कर्त्तव्यइत्यर्थः सम्पन्नस्तेन च ‘ ज्ञानप्रसादेन विशुद्धसत्व ’ इत्यादिश्रुतेः ‘ ज्ञानं ज्ञानिपुसुकरं यत् कृष्णभक्तिप्रदं शुभमि’त्यादिपञ्चरात्रवचनाच्च भक्तिसाधनीभूतज्ञानविचारआक्षिप्यते। यदि तु मानपूजायामिति पूजार्थकमानधातोरिच्छायाम् ‘ धातोः कर्मणः ’ इति सूत्रेण सन्प्रत्ययः क्रियते तदा तु प्रकृत्यर्थःपूजनं तच्च भक्तिरेव तस्य च लक्ष्ये प्रत्ययार्थे विचारे यथाश्रुतएवान्वयः। तथा च निराकारभक्तिविचारः कर्त्तव्य इत्यर्थोनिष्पन्नः । तथा च सूत्राणामनेकार्थत्वस्य भूषणत्वात्तन्त्रादिनोभयं विवक्षितम् निराकारविचारस्य तद्भक्तिविचारस्य च सूत्रेषु भाष्ये चोपलभ्यमानत्वात् तदुक्तं तन्त्रवार्त्तिककृता‘ सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिके ।सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठि-

तस्मान्निराकारमीमांसा कर्त्तव्येति समासः ॥ १ ॥

साकारेण विकारेण निराकारं कारणं लक्षयितुं तल्लक्ष-

तमि'तिएवमन्येपि विचाराः तदङ्गभूता आक्षिप्ता बोध्याइति बोध्यम्। नन्विदं सूत्रं शास्त्राद्बहिः स्थित्वा शास्त्रमारम्भयति अन्तर्भूत्वा वा आद्ये तस्य हेयता शास्त्रेणासम्बन्धात् द्वितीये तु तस्यारम्भकं वाच्यम् न च स्वयमेवारम्भकं स्वस्मात्स्वोत्पत्तेरित्यात्माश्रयात् न चारम्भकान्तरं पश्याम इतिचेदुच्यते 'श्रद्धाभक्तिध्यानयोगादवेही'त्यादिश्रुतेः 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' नाहं वेदैरित्युपक्रम्य भक्त्या त्वनन्यया शक्य'इत्यादिस्मरणात्' भक्त्याहमेकयाग्राह्यः भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केन चित् प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनमि'त्यादिपुराणाच्च भक्तेः कर्त्तव्यत्वविधिना आरब्धमिदं सूत्रं शास्त्रान्तर्गतमेव शास्त्रारम्भं प्रतिपादयति यथास्वाध्यायोध्येतव्यइत्यध्ययनविधिर्वेदान्वर्गतएव कृत्स्नवेदस्याध्ययनं प्रयुङ्क्ते तद्वदिदमपीत्यनवद्यमितिशिवम् ॥ १ ॥

प्रथमसूत्रेण शास्त्रारम्भमुपपाद्य मूलभूतनिराकारविचारमुपजीव्यप्रकृततद्भक्तिविचारसिद्ध्यर्थमुपोद्घातसंगत्या 'लक्षणप्रमाणाभ्यां वस्तुसिथति'रितिन्यायेन निराकारब्रह्मलक्षणप्रतिपादकं तावल्लक्षणसूत्रमवतारयति साकारमित्यादिना संगतिस्तु 'अनन्तराभिधानप्रयोजकाकांक्षाजनकज्ञानविषयत्वम्' इतिदीधितिकारमथुरानाथाद्यः वस्तुविशेषस्य वस्तुविशेषानन्तरं निरूपणे प्रयोजिका या जिज्ञासा तज्जनकं तत्स्वरूपोपयोगि यज्ज्ञानं तद्विषयत्वमित्यर्थः उपोद्घातश्च संगतिविशेषः'प्रसंगउपोद्घातो हेतुतावसरस्तथा। निर्वाहकैक्यकार्य्यैक्ये षोढासंगतयोमताः' इत्युक्तेः वस्तुतस्तु परिगणनं प्रायिकमाक्षेपादीनामपि संगत्यन्तराणामुपलब्धेरित्याद्यन्यत्र द्रष्टव्यम् उपोद्घातस्तु प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनम् तदुक्तं तंत्रवार्तिके 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः' इति अस्ति ह्यत्र प्रकृतविचारोभक्तिविचारः निराकारलक्षणविचारस्तु प्रकृतभक्तिविचारसंगमनार्थइत्यादिबोध्यम्। आकारेण सहवर्तमानइतिव्युत्पत्तिभ्रमव्युदासाय कारणेन समानः आकारोयस्येत्यभिप्रेतार्थप्रदर्शनाय च विशेष्यमाह विकारेणेति अत्राकारपदेनभूतजातं गृह्यते विकारपदेन च भौतिकजातं गृह्यते इति बोध्यम्। अन्नमयं प्रनइत्यादौ तथा श्रवणादितिभावः तात्त्विकोन्यथाभावोहि विकारः 'महदाद्यं विशेषान्तं सवैरूप्यं विलक्षणं विकारलक्षणं तद्वै साक्षरं क्षरमेवचे'ति वायुपुराणोक्तेः 'तथाहि स्वासाधारणधर्मपरित्यागपुरःसरः पुनःकारणभावप्रतिरोधिधर्मान्तरोदयोविकारः

णसूत्रमाचष्टे भगवान् सूक्ष्मवित्सूत्रकृत्-

## सू० यतः साकारसमुद्भवः ॥ २ ॥

---

यथादुग्धस्यदधिभावे दुग्धासाधारणधर्मस्य माधुर्य्यादेः परित्यागः पुनर्दुग्धभावापत्तिप्रतिरोधिनोऽम्लत्वघनत्वादेरुदयश्चेत्येवंसाकारस्य विकारत्वस्वीकारे यथादध्नोविकारत्वं दुग्धस्य च विकारित्वम् तथा निराकारब्रह्मणोपि विकारित्वप्रसंगादेतादृशं साकारस्य विकारत्वं न विवक्षितं किन्तु विकारोत्र वाचैवारभ्यते 'वाचारम्भणं विकारोनामधेयं'योवै तां वाचं वेद यस्याएषविकार' इत्यादिश्रुतेः 'तदनन्यत्वमारम्भणशब्दादिभ्य' इतिसूत्रस्य च तथैवसंगतार्थत्वात्अतएव दधिदुग्धशुक्तिरजतादिदृष्टान्तमप्रदर्श्य सुवर्णकटकादिदृष्टान्तप्रदर्शनमपि संगच्छते न च पूर्वाकारपरित्यागेनाकारान्तरापत्तिस्तत्र दृश्यते इतिवाच्यम् पूर्वाकारपरित्यागाभावात् अन्यथा तत्र सुवर्णव्यवहारो न स्यात् तस्मात्सुवर्णस्याविकारित्वमेव एवमेव ब्रह्मणोप्यविकारित्वं श्रुतिसम्मतमित्यधिकमग्रेवक्ष्यामः । कारणमिति अभिन्ननिमित्तोपादानकारणमित्यर्थः तल्लक्षणसूत्रमिति । तस्य निराकारब्रह्मणोलक्षणं स्वरूपतटस्थोभयाविधलक्षणसूचकंसूत्रमित्यर्थः । तथा सूत्रकरणे सूत्रकृतः समार्थ्ययोगमाह भगवानिति भगोहि सर्वदाऽनपायिनीसमृद्धिवुद्धिसम्पत्तिकीर्तिरूपा शक्तिः तद्वान् हि भगवानित्यर्थः । तदुक्तं प्रकृतिखण्डे 'समृद्धिवुद्धिसम्पत्तियशसां वचनो भगः । तेन शक्तिर्भगवती भगरूपा च सा सदा । तया युक्तः सदात्मा च भगवांस्तेन कथ्यते । 'इतिलैङ्गे च भगवान भगसद्भावादि'ति यद्वा भगवान् सर्वज्ञइत्यर्थः'भगवान् सर्वविज्ञानादि'तिकौर्मवाक्यात् । ननु समृद्ध्यादिवत्त्वेपि सूक्ष्मदर्शित्वं विना सूत्रकृत्त्वं नोपपद्यतेइत्यतस्ततसमर्थयन् विशिनष्टि सूक्ष्मविदिति 'ज्ञानं ज्ञेयेषु भिन्नेषु यदा भेदेन वर्त्तते । यत्राधिवासिनी वुद्धिस्तत्सौक्ष्म्यमितिवर्त्तते 'इति भारतात् ज्ञानज्ञेयादिमध्ये यत्सूक्ष्म तत्वेत्तीति सूक्ष्मवित् यद्वा निराकारब्रह्मसूत्रनिर्माणे ब्रह्मवित्त्वमेवापेक्षितमिति तदाह सूक्ष्मविदिति'दृश्यते त्वग्र्यया वुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रिति कठश्रुतेः 'नित्यं विभुं सर्वगतं सुसूक्ष्मम् । 'सूक्ष्माच्च तत्सूक्ष्मतरं विभाती'ति मुण्डकश्रुतेः। 'सत्यं सूक्ष्मं परिपूर्णमद्वयमि'तिनृसिंहतापनीयश्रुतेश्च सूक्ष्मं ब्रह्म वेत्तीत्यर्थः 'महतोमहीयानिति'श्रुत्या महत्त्वप्रतिपादनात् ब्रह्माणि दुर्ज्ञेयत्वेन सौक्ष्म्यमस्तीति बो-

यतइति निराकारं कारणं लिलक्षयिषितमाह तच्च न निमित्तमात्रं किंतूपादानमपि सूत्रे कारणश्रुतौ च पञ्च-

ध्यम् ननुसाकारसमुद्भवस्य निराकारब्रह्मसम्बन्धाभावान्न लक्षणत्वमित्याशंक्य तत्कारणत्वमितिपञ्चम्यर्थमभिप्रेत्य लक्षणसूत्रं व्याचष्टे यतइत्यादिना यतइति कर्तृपदमाहेत्यनेन संबध्यते । यच्छब्देन सच्चिदानन्दरूपं वस्तूच्यते 'आनन्दाद्ध्येवेत्यादौ निर्णीतत्वात् तथा च स्वरूपलक्षणमपि सिद्धमितिबोध्यम् । ननु यथाभ्युदयहेतुत्वात् धर्मोजिज्ञास्यएवं निःश्रेयसहेतुत्वात् निराकारब्रह्मापि मीमांस्यमित्युक्तं तच्च यतः साकारसमुद्भवइति लिलक्षायिषितं तच्च लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्त्वे च समानमित्यतो भवतिविचारः तत्किं लक्षणकं पुनर्ब्रह्मणः कारणत्वं उपादानत्वं निमित्तत्वं कर्तृत्वं वा कथं पुनरेवं संदेहः यावता 'यतो वा इमानि भूतानि' त्यादि श्रूयते तत्र यत इतिपञ्चम्यास्तसिः पञ्चमी च विभाषागुणे स्त्रियामित्यत्र विभाषेति योगविभागात्क्वचिदगुणेपि हेतौ हेतुत्वं च निमित्तएव दण्डादौ प्रसिद्धमतस्तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति कस्मात् ईक्षापूर्वककर्तृत्वश्रवणात् ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते 'सईक्षां चक्रे, सप्राणमसृजत्' इत्यादि श्रुतिभ्यः ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम्अनेककारकपूर्विका च क्रिया फलसिद्धिहेतुर्लोके दृष्टा सच न्यायआदिकर्त्तर्यपि युक्तः संक्रमयितुम् ईश्वरत्वप्रसिद्धेश्च ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुं कार्यं चेदं जगत् सावयवमचेतनमशुद्धं दृश्यते कारणेनापि तस्य तादृशेनैव भवितव्यं कार्यकारणयोः सारूप्यदर्शनात् ब्रह्म च नैवं लक्षणमवगम्यते 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इत्यादि श्रुतिभ्यः पारिशेष्याद् ब्रह्मणोऽन्यदुपादानकारणमशुद्ध्यादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यम् ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादितिवदन्तं प्रति निराकारब्रह्मणि उपादानत्वमपि प्रतिजानीते तच्च न निमित्तमात्रमित्यादिना तच्चेत्यत्र चकारस्त्वर्थकः पूर्वोक्तशंकां वारयति तत्तु न केवलं निमित्तमात्रमपि तूपादानं कर्तृचापीत्यन्वयार्थः । प्रतिज्ञायां हेतुमाह सूत्रेकारणश्रुतौचपञ्चमीश्रुतेरिति । अत्र यतः साकार समुद्भवइतिसूत्रे 'भुवः प्रभुवः' इतिसूत्रेण 'यतो वा इमानि' इतिश्रुतौ तु 'जनिकर्त्तुः प्रकृति' रितिसूत्रेणापादानसंज्ञायामपादाने पञ्चमीति पञ्चमीविभक्तिश्रवणादित्यर्थः तस्याश्च कारकविभक्तित्वेन कारण-

मीश्रुतेः का सा श्रुतिरिति चेत् 'यतोवाइमानि भूतानि जायन्ते' इत्याद्या सा तयैव तन्निर्णये व्यर्थं सूत्रमिदमितिचेत् न तत्र यतइतिकारणमात्रनिर्देशाद्वादिविवादानि-

त्वमर्थः । इतरविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वादितिभावः यद्वा पञ्चमीश्रुतेरित्यस्य पञ्चमीश्रुतिप्रमाणादित्यर्थः लिङ्गाद्यपेक्षया श्रुतेर्बलीयस्त्वादिति भावः । वेदव्यासैरपि प्रकृतिश्चेत्यादिसूत्रकदम्बेनाभिन्ननिमित्तोपादानत्वमेव साधितमिति ततएवावगन्तव्यमितिबोध्यम् । कारणत्वबोधकपञ्चमीघटितां श्रुतिं पृच्छति का सा श्रुतिरिति चेदिति श्रुतिमाह यतो वा इमानीत्यादि । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्वतद्ब्रह्म' तितैत्तिरीयभृगुवल्ल्यां श्रूयते । इत्याद्येत्यत्रादिपदेन 'तस्माद्वाएतस्मादात्मनआकाशः सम्भूत' इत्यादेः संग्रहः । सिद्धसाधनेन सूत्रानारम्भमाशङ्कते तयैवेत्यादिना तयैव यतोवा इत्यादिश्रुत्यैव तन्निर्णये इत्यस्य जातेइतिशेषः तस्य अभिन्ननिमित्तोपादानकारणत्वस्य निर्णये निश्चये जाते सतीत्यर्थः । तयैकेत्यत्र एवकारव्यावर्त्यमाह व्यर्थं सूत्रमिति ।यतः साकारसमुद्भव इतीदं सूत्रं व्यर्थं सिद्धसाधनात् अनधिगतार्थविषयकत्वाच्छास्त्रस्येतिभावः पूर्वोक्तशंकां निषेधति नेति' शङ्काया गूढं बीजमनूद्य लक्षणसूत्रं सार्थकयति तत्रेत्यारभ्यअत्रानुसन्धेयं निमित्तं स्वयमेवेत्यन्तेन । तत्र 'यतोवाइमानी'त्यादिश्रुतौ—यतइतिहेतुमात्रबोधकपदोच्चारणं श्रुत्वा ये प्रधानादिकारणत्ववादिनां विवादाः प्रवृत्तास्ते-

जैसे राजा यज्ञ करता है इस कथन से राजा के यज्ञ में उपयोगी उस की स्त्री का लाभ अर्थात् होवे है वैसे जिस साधनादि मीमांसा के विना निराकार मीमांसा असम्भव है उन का अर्थात् लाभ होवे है पूज्यविचार को मीमांसा कहे हैं अज्ञान का विनाशक होने से और आत्मस्वरूप का बोधक होने से निराकारमीमांसा को पूज्य जानना यद्यपि ब्रह्ममीमांसा शारीरक सूत्रों में करी है तथापि यहां विशेष निराकाररूप करके ब्रह्म का वर्णन किया है इस वास्ते ब्रह्ममीमांसा के साथ निराकारमीमांसा का अभेदरूप दोष नहीं है इस वास्ते निराकार ब्रह्म का पूज्य विचार करना चाहिये ॥ १ ॥ साकार विकार से निराकार के बोध वास्ते निराकारके लक्षण का सूचक सूत्र कहे हैं (सू० यतः साकार समुद्भवः ॥२॥) यतः यह पद निराकार को कहे है सो निराकार केवल निमित्त कारण नहीं है किन्तु इस सूत्र में और श्रुतिमें पंचमी विभक्ति के श्रवण से उपादानरूप भी है ।

रासार्थमेतत्सूत्रप्रणयनात् निराकारमेव साकारकारणं भवितुम्प्रभवति न साकारमितिनिर्णयार्थमेतत्सूत्रो-

पां निरासाय निराकारमेवात्र दर्शने कारणत्वेन निश्चीयते न तु साकारं तथा कारणं भवितुं प्रभवतीति पिण्डार्थः इतिनिर्णयार्थम् । एवं निराकारस्य कारणत्वनिश्चयार्थम् वाक्यार्थविचारान्तेयुक्तिमत्तयायोह्युच्यते सनिर्णयः यथाहुः 'धर्मार्थकाममोक्षेषु प्रतिज्ञाय विशेषतः। इदं तदिति वाक्यान्ते प्रोच्यते सविनिर्णयः' इति ॥ एतत् सूत्रप्रणयनादितिपञ्चम्यन्तं नेतिनिषेधे हेतुः यतः साकारेत्यादिसूत्रनिर्माणादित्यर्थः अस्माकं दर्शने सर्वमद्वैतं यतो निराकारादेव साक्षात्परंपरया च निखिलसाकारविकारप्रादुर्भावोन तु प्रधानादेर्जडजातात् सर्वस्य तथाहि अत्र साकारपदेन शुद्धनिराकारसच्चिदानन्दाद्भिन्नं सर्वं गृह्यते तथा च साकारं कार्य्यमाद्यं निराकारचेतनजन्यम् भवितुमर्हति कार्य्यत्वात् घटादिवदितिप्रधानपरमाणुशून्यादीनां संभावितानां सर्वेषां निरासः । 'योब्रह्माणं विदधाति पूर्वं' 'सर्वएत आत्मानोव्युच्चरन्ति' इतिश्रुत्या स्थूलसूक्ष्मदेहोपाधिद्वारा हिरण्यगर्भादीनामपि कार्य्यत्वेन जगन्मध्यपातित्वान्न तेषामपि जगत्कारणत्वमितिभावः अधिकं तु जन्माद्यस्ययतइत्यादितोमध्यतन्त्राज्ज्ञेयम् वस्तुतस्तुउपक्रमोपसंहारादिषड्विधतात्पर्य्यनिर्णायकलिंगसहकृतयतोवा इत्यादिश्रुत्या शुद्धनिराकारस्यैव जगत्कारणत्वबोधनात् प्रधानादेः कारणत्वप्रसंगएव नास्तीति बोध्यम् । येत्वेवं वदन्ति शुद्धे उपादानत्वं नास्ति किं तर्हि शबले शबलगतं चोपदानत्वं तदनुगतस्य शुद्धस्य लक्षणं शाखेव चन्द्रस्य मायैव चोपादानं तद्गतं चोपादानत्वं तदधिष्ठानस्य लक्षणमिति ते तु 'तत्तुसमन्वयादि'तिसूत्रेण श्रीव्यासैरेव समाधीयन्ते तथाहि तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः तत् ब्रह्मैव समवायिकारणं कुतः समन्वयात् सम्यगनुवृत्तत्वात् अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् जडजीवान्तर्य्यामिष्वेकैकांशस्य प्राकट्यं अन्यांशस्य तिरोभावः भगवदिच्छायाएव सर्वत्र नियामकत्वात् अलीकत्वप्रतीतेः सर्वत्रासत्वान्नालीकत्वं पटादिष्वनुगतमतोन मायायाउपादानत्वसम्भवः । ब्रह्मणः समवायित्वे तु 'तदात्मानं स्वयमकुरुत' इत्यादिश्रुतिरनुगृहीताभवति न च शाखाचन्द्रन्यायोप्यत्र सम्भवति यथा चन्द्रं दिदर्शयिषुः शाखां दर्शयित्वा पुनस्तां त्याजयित्वा तदग्रस्थं चन्द्रं पश्येति वदति तत्रापि भृगुपित्रा यदि यतोवाइमानिभूतानीत्यादिना जगत्कारणं जिज्ञास्यमुक्त्वा पुनरन्यदुक्तं स्यात्तदा त्वदुक्तन्यायोत्र प्रवर्त्तेत तस्माज्जगत्कारणं शुद्धमेव जिज्ञास्यं न तु शबलं पारिभा-

त्थानमित्यादिकमत्रानुसंधेयं निमित्तं स्वयमेव साकार-शब्दो भूतं भौतिकं चाचष्टे न च श्रुतौ भूतशब्दमात्रश्रुतेर्विरोधः तत्र भूतशब्दस्य प्राणभृत्परत्वात् अर्थाद्द्भौतिक ग्रहणस्य विवक्षितत्वाद्वा न हि भूतानां निराकारपरब्र-

---

षिकम् एवं शाखाचन्द्रन्यायस्यात्रासम्भवाद्वादिमते निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय सगुणब्रह्मणोमायायाश्च लक्षणकथने सूत्रकारस्य प्रतिज्ञाहान्युपक्रमविरोधरूप-दोषौ स्यातामेव तस्मात् यतः साकारसमुद्भव इति सूत्रं निराकारब्रह्मणः कारणत्वं वदतीति स्वीकरणीयम् शुद्धस्य कारणत्वे च तदैक्षत वहु स्यां प्रजायेयेत्यादिश्रुतौ तत् पदेन शुद्धस्यैव परामर्शः कर्तव्यस्तस्य वहुभाव उत्पत्तिश्च यदि स्वीक्रियते तदा शुद्धत्वहानिरित्युभयतः पाशारज्जुर्वादिन एव स्यात् न च मायया वहुभवनं तस्मिन्प्रपाठके मायावाचकपदाभावात् ऐन्द्र-जालिकदृष्टान्तस्यापि तत्राभावात् प्रत्युत मृत्सुवर्णादिदृष्टान्तएव तत्र श्रुतः सच शुद्धस्य कारणस्य कार्य्यरूपत्वस्वीकारएवानुकूलः न हि मृत्सुवर्णादीनां मायाया घटकुण्डलादिरूपं वा येन ब्रह्मणोमायया जगद्रूपतायां दृष्टान्तता स्यात् किंच शवलस्य जगत्कारणत्वेन मुख्यत्वाभावाद् गौणस्यैव जगत्कारणत्व-मुक्तं स्यात्तथा च ‘ गौणश्चेन्नात्मशब्दादितिसूत्रविरोधः स्यादित्याद्यभिप्रेत्याह इत्यादिकमत्रानुसन्धेयमिति ननु ‘ पृथिव्या ओषधयः ओषधिभ्योन्नमि ’ त्यादि श्रुतौ विकारेभ्योपि विकारान्तरोद्भवश्रवणात् कथं निराकारादेवसर्वसाकार-समुद्भवइत्याशंक्य साक्षात्परंपरया च सर्वं साकारवस्तु निराकारादेव समुद्भ-वतीत्याह साकारशब्दोभूतं भौतिकं चाचष्टइति । भूतम्—आकाशादि पञ्च महाभूतम् । तत्कार्यं भौतिकम् । नन्वेवं यतोवाइमानीतिश्रुत्या विरोधस्तत्र भूतमात्रस्य श्रवणादित्याशंक्याह न च श्रुतावित्यादिनालमित्यन्तेन । श्रुतेः श्रवणात् । विरोधः श्रुतिसूत्रयोरितिशेषः । तत्र यतोवाइमानीतिश्रुतौ स्वमत-मभिधाय शङ्कितृपक्षानुरोधेनाप्याह अर्थादिति । कार्य्यकारणयोरभेदइत्यार्थिका-र्थात् । भौतिकग्रहणस्यतस्यापि । पूर्वोक्तमार्थिकार्थमुपपादयति न हि भूताना-मित्यादिना । ‘ यः पृथिव्यां तिष्ठन् पृथिव्याअन्तरोयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरोयमयतीत्यादिश्रुतेः सएव निराकारपर-मात्मा तेनतेनात्मनावतिष्ठमानोभिध्यायंस्तं तं विकारं सृजतीति सर्वेषां भूतभौतिकानामुद्भवस्य निराकारपरब्रह्मायत्तत्वमेव सिद्धमितिभावः । आद्य-

ह्मायत्तसमुद्भवे भौतिकानामन्या गतिरस्ति तेषां तत्का-र्य्यत्वाच्चेत्यलम्। समुद्भवशब्दोनोत्पादमाह असतस्तदनु-पपत्तेः सत्त्वे चाविर्भावमात्रं साकारस्य संपत्स्यते तथा चाविर्भावंसमुद्भवशब्दोव्याचष्टे साकारस्यतथा चात्र सत्कार्य्यवादसिद्धान्तमसुसूचत्सूत्रकृत्। इतिचिन्तनीय-

---

त्त्वम्। साध्यक्षत्वमधीनत्वमित्यनर्थान्तरम्। अनन्यगतित्वे हेतुमाह तेषां तत्का-र्य्यत्वादिति तेषां भौतिकानां तत्कार्य्यत्वं भूतकार्य्यत्वं तस्मादित्यर्थः। सत्का-र्य्यवादे कार्य्यस्य कारणे विद्यमानत्वादित्यादिं हेतुं चकारः समुच्चिनोतीति बोध्यम् 'सोकामयत बहु स्यां प्रजायेये' तिप्रस्तुत्य 'सच्चत्यच्चाभवत् तदा-त्मानं स्वयमकुरुते' त्यादिश्रुतिसमुदायोपि निराकारस्यैव भूतभौतिकसर्वात्म-भावं दर्शयतीत्यभिमेत्याह इत्यलमिति। नन्वेवमपि न विरोधपरिहारः कारणव्या-पारात्प्राक् कार्य्यस्यासत्त्वादित्यतआह समुद्भवशब्दोनोत्पादमाहेति समुद्भवशब्द-स्योत्पादार्थे दण्डमाहअसतस्तदनुपपत्तेरिति प्रागसतः कार्य्यस्योत्पादाङ्गीकारे दोषादित्यर्थः कोसौ दोष इति चेदत्रोच्यते असच्छब्देन किं गृह्यते 'अभावोलीकं वा नाद्यः तस्य सर्वत्रसुलभत्वेन सर्वत्र सर्वकार्य्योत्पादप्रसंगात् अतएव न द्वितीयः वन्ध्यापुत्रादेरपि उत्पादप्रसंगादितिसंक्षेपः 'तद्धेदं तर्ह्यव्याकृतमासीदित्यादिश्रु-तिभिरव्यक्तावस्थायां सतामेव कार्य्याणां कारणव्यापारादभिव्यक्तिसिद्धिरिति स्वमतमाह सत्त्वेचाविर्भावमात्रं साकारस्य सम्पत्स्यते इति तद्धैके आहुरस-देवेदमग्रआसीदित्यादिश्रुतिसिद्धं सत्कार्यवादसिद्धान्तमेव श्रीगुरोस्तात्पर्यवि-षयइत्याह तथाचात्रसत्कार्य्यवादसिद्धान्तमसुसूचत्सूत्रकृदिति। तथा चेत्यस्य किन्तु इत्यर्थः। अत्र च प्रादुर्भावतिरोभावशब्दौ कार्य्याणामुत्पत्तिनाशव्यवहार भाजावितिबोध्यम्। ननु प्रादुर्भावोपि सन् असन् वा आद्ये कारणव्यापारा-त्प्रागपि कार्य्यस्याभिव्यक्त्या स्वकार्य्यजनकत्वापत्तिः। कारणव्यापारश्च वि-फलः। अन्त्ये चाभिव्यक्तावेव सत्कार्य्यसिद्धान्तहानिः असत्याएवाभिव्यक्ते रभिव्यक्त्यङ्गीकारादितिचेदत्राहुः कारणव्यापारात् प्राक् सर्वकार्य्याणां सदा-सत्त्वाभ्युपगमेनोक्तविकल्पानवकाशात् घटवत् तदभिव्यक्तेरपि वर्त्तमानावस्थया प्रागसत्त्वेन तदसत्तानिवृत्त्यर्थं कारणव्यापारापेक्षणात् अनागतावस्थया च स-त्कार्य्यसिद्धान्तस्याक्षतेः। नन्वेवमपि सत्कार्य्यसिद्धान्तरक्षार्थमभिव्यक्तेरप्य-

मन्यथोत्पादशब्दमेव कुतोनोपादितेत्यलम्। उद्भवग्रहणमुपलक्षणं स्थितितिरोभावयोः तयोस्ततोऽन्यत्रासंभवात् न ह्यन्यस्मादाविर्भूयान्यत्र स्थितितिरोभावभाजोभावाः क्वाप्युपलभ्यन्ते यद्दृष्टान्तावष्टम्भोत्र भवेत्। तस्मा-

---

भिव्यक्तिरेष्टव्या तथाचानवस्थेति चेन्नैवं जन्मकर्मबीजाङ्कुरवदनादित्वेनाविरोधादित्यभिप्रेत्याह इति चिन्तनीयमिति इत्यादिविवेक्तव्यमित्यर्थः। सूत्राक्षरैरेव सूत्रकृतस्तात्पर्य्यमभिनयति अन्यथेत्यादिना। उपादितेति तुडुदाञ्दाने इत्यस्योपपूर्वकस्यात्मनेपदे लुङि रूपमितिबोध्यम्॥ नन्वेमपि न्यूनतारूपविरोधस्तदवस्थएव सूत्रेस्थितिलयबोधकपदाभावादित्यतस्तं वारयन् समुद्भवशब्देन स्थितिलयावप्युपलक्षयति उद्भवग्रहणमुपलक्षणंस्थितितिरोभावयोरिति। यद्वा तत्र यत्समुद्भवकारणं तद्ब्रह्मेतिब्रह्मत्वविधानमयुक्तम् स्थितितिरोभावकारणाभिन्नत्वेन ज्ञाते ब्रह्मत्वस्य ज्ञातुमशक्यत्वात् अतः समुद्भवंस्थितितिरोभावैर्निरूपितानि त्रीणि कारणत्वानि मिलितान्येव लक्षणमित्याशयेनाह उद्भवग्रहणमुपलक्षणं स्थितितिरोभावयोरिति मूलश्रुत्या वस्तुगत्या च आदित्वं ज्ञात्वा तदपेक्ष्य सूत्रकृता समुद्भवस्यैवादित्वेन सूत्रेसंग्रहीतत्वमितिभावः। एतेन संसारचक्रस्यानादित्वात्कथं समुद्भवस्यैवादित्वमितिशङ्कापि समाहितेतिबोध्यम्। उपलक्षणेबीजमाह तयोस्ततोन्यत्रासंभवादिति तत इति संसारसमुद्भवाधिकरणसकाशादित्यर्थः। बीजमुपपादयति न हीत्यादिना। पदार्थमुपसंहरति तस्मादिति दिगिति 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदा-

---

'यतो वा इमानि भूतानि जायन्ते। इत्यादिश्रुति के अर्थ का निर्णय इस सूत्र में किया है श्रुति में यतः इस पद से साकार का ग्रहण अनेक वादियों ने किया है। उन के मत के खण्डनवास्ते इस सूत्र की प्रवृत्ति है इस सूत्र में साकार शब्द भूत भौतिक प्रपञ्चको कहे है श्रुति में भूत करके प्राणिमात्र लियेजाते हैं और भूतों के आधिभौतिक पदार्थों की स्थिति होवे है इसवास्ते श्रुति में भूत करके भौतिकों का ग्रहण होवे है उत्पाद शब्द आविर्भाव को कहे है असत पदार्थ का आविर्भाव बने नहीं इसवास्ते सूत्रकारने इस सूत्र में सत्कार्यवाद अपना सिद्धान्त सूचन किया है।

न्निराकारचिदाकारमात्रनिष्ठा साकारस्याचिदाकारस्य सर्वदाऽऽस्थेया सूरिभिरितिदिक् । सर्वस्यास्य स्थूलसूक्ष्मप्रपञ्चस्याकारवतोविकारभाववतश्च साकारस्योच्चावचमुपलभमानस्य नानाविधनिमित्तनैमित्तिकभावेन प्रतिनियतस्वभावस्य भूतभौतिकस्वरूपस्याविर्भावस्थितिति-

---

यतनाः सत्प्रतिष्ठाः कथमसतः सज्जायेत तत्सत्यं यादिदं किं च तत्सत्यमित्याचक्षते' इति सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठा' इति च श्रुतेः 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा 'इत्यादिस्मृतेश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात् तदनन्यत्वाच्च सिद्धैषाश्रौती प्रतिज्ञा 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात' मितिनिराकारे साकारस्य प्रतिष्ठापक्षे दिगर्थोऽवसेयः । उपलक्षणपक्षे त्वयं दिगर्थः । यतः साकारसमुद्भवइत्यत्रैव समुद्भवइतिसमस्तपदत्रयेणोत्पत्तिस्थितिलया विपरीतक्रमेण बोध्यन्ते । तथाहि संपदेन संहारो विवक्षितः । उत्पदेन उत्पत्तितः ऊर्ध्वं स्थितिः । 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपोवा च्यः' इतिवार्त्तिकात् भवपदस्योत्पत्तिवाचकत्वं प्रसिद्धमेव तथा च संहारेण ऊर्ध्वस्थित्या च सहितोभवइति समुद्भवइति मध्यमपदलोपी समासः अस्मिन्पक्षेपि उत्पत्तेरेव प्राधान्यम् । अप्रधानतृतीयान्तघटितसमासकरणादितिध्येयम् । एवं च तज्जलानिति श्रुतिवदुपलक्षणं विनैव सूत्रसंगतेः सम्भवान्न सूत्रकारस्य न्यूनतेतिदिशोभावः । 'एषब्रह्मैषइन्द्रएषप्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाशआपोज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वागावः पुरुषा हस्तिनो यत्किंचेदं प्राणिजंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मे'त्यदिश्रुतिसिद्धं सूत्रस्य वाक्यार्थमुपपादयति सर्वस्येत्यारभ्य वाक्यार्थइत्यन्तेन । स्थूलं पञ्चमहाभूतानि सूक्ष्मं तन्मात्रपञ्चकम् । अत्र 'स्थूलानि सूक्ष्माणिचे'ति श्रुत्यनुरोधेन क्रमाविवक्षया तथोक्तम् यद्वा स्थूलेन सहितं सूक्ष्ममितिसमासकरणे सूक्ष्मस्य प्राधान्यं ज्येष्ठत्वं च सूच्यते इति न क्रमविरोधेपि । तदनुसारेणैव कार्य्यं कार्यिचाह आकारवतोविकारभाववतश्चेति तत्राकारवत्कार्य्यम् अत्यन्तस्थूलं विकारभाववती तत्प्रकृतिरित्यर्थः यद्वा आकारवतइत्यस्यैव विवरणं विकारभाववतइति भाष्यकाराणां सर्वत्र त-

रोभावा यतः सर्वविदः सर्वयोनेः सर्वनियन्तुः सम्भवन्ति तन्निराकारं परं ब्रह्मेति वाक्यार्थः । न च तदपि साकारकारणं कथंकारं निराकारं स्याद् अदृष्टत्वात् साकारं तु किंचित्कटकारवत्कल्प्यतां दृष्टत्वादिति वाच्यम् तथासति तस्यापि साकारत्वेन कटकारवत्सकारणत्वापातेऽनवस्थानात् न च किंचित्साकारमपि स्यान्नित्यमित्यभिनिवेष्टव्यम् । अदृष्टत्वहेतोस्त्वय्यैवोहनात् अश्रुतत्त्वाच्च न

---

थाशैलीपरिशीलनादितिबोध्यम् पूर्वत्र पठितस्य सर्वस्येत्यस्य साकारस्येत्यनेनान्वयः सर्वस्य साकारस्येत्यन्वयार्थः । उच्चावचम् उत्कृष्टानिष्कृष्टभावम् । उपलभ्यमानस्येति कर्मप्रत्ययान्तपाठेतु ' उच्चावचमि ' तिक्रियाविशेषणमितिबोध्यम् सर्वविदइत्यादित्रयं पञ्चम्यन्तम् सर्वविदः सर्वज्ञात् सर्वज्ञस्यैवोत्पत्तिकर्तृत्वं सम्भवतीतिस्फोरितम् । ' यः सर्वज्ञःसर्वविद्यस्यैषमहिमाभुवि ' ' सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ' इतिमुण्डकादिश्रुतेः । ' तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ' इति ' वेदाहं समतीतानि वर्त्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ' इत्यादिस्मृतेः ' सर्वज्ञः सर्वविज्ञाना ' दितिलैङ्गादिवाक्याच्च सर्वयोनेरित्यनेनोपादानत्वं सूचितम् ' सर्वत्रयोनित्वम् ' ' एषयोनिः सर्वस्य प्रभवाप्ययौ हि भूताना ' मिति माण्डूक्यनृसिंहतापन्यादिश्रुतेः सर्वनियन्तुरित्यनेन स्थितिकर्तृत्वं बोधितम् ईशानोभूतभव्यस्य सएवाद्य' इति ' एष सर्वेश्वरएष सर्वज्ञएषोन्तर्यामीति नृसिंहतापनीयश्रुतेश्च ननु न निराकारस्य साकारकारणत्वं दृष्टान्ताभावात् अतः साकारमेव साकारमुत्पादयति कटकारविदितिसिद्धं नः समीहितं साकारकारणवादिनामिति साकारकारणवादी शङ्कते न चेत्यादिना कथंकारमित्यस्य न कथमपीत्यर्थः दृष्टत्वादिति । सम्भवतिदृष्टफलकत्वेऽदृष्टकल्पनाया अन्याय्यत्वादितिन्यायादित्यर्थः प्रतिबन्द्या समाधत्ते तथासतीत्यादिना ननु साकारबीजाङ्कुरवन्नेयमनवस्था मूलक्षयकरीति शङ्कते न चेति किंचिदितिप्रधानपरमाण्वादीत्यर्थः । घट्टकुटीन्यायेन वाद्युक्तं हेतुं वादिमूर्धन्येव प्रक्षिपति अदृष्टत्वहेतोस्त्वय्यैवोहनादिति साकारस्यापिनित्यत्वेनादृष्टचरत्वादित्यर्थः । ननु मा भूदत्र दृष्टं प्रमाणं त्र्यणुकावयवाः सावयवाः कार्य्यत्वादित्याद्यनुमानेन तु लाघवतर्कसहकृतेन परमाणूनां नित्यत्वं सेत्स्यति इत्याशंक्यानुमानस्य श्रुतिसंवादित्वाभावात् प्रत्युत साकारस्यानित्यत्वबोधकप्रबल श्रु-

हि क्वचिदपि श्रुतिषु साकारं नित्यमिति श्रूयते श्रूयते च सर्वं साकारमसकृच्छ्रुतिष्वनित्यमिति । कास्ता इति चे'दतोऽन्यदार्त्तम्' नित्योनित्यानामि'त्यादयस्ताः । न च

---

तिप्रमाणेन वाधाच्च मैत्रमित्याहअश्रुतत्वाच्चेति श्रुतिसम्वादित्वाभावेनानुमानस्याप्रमाणत्वादिति भावः । श्रुतिसहायरहितमनुमानं न कुत्रचित् । निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च । श्रुतिस्मृतिसहायं यत्प्रमाणन्तरनुत्तमं । प्रमाणपदवीं गच्छेन्नात्र कार्य्याविचारणे' तिकूर्मपुराणादनुमानस्य स्वतःप्रामाण्यं नास्त्येव यथाहुराचार्य्यवाचस्पतिमिश्राः 'आगमानपेक्षितमनुमानं तु दृष्टसाधर्म्येण प्रवर्त्तमानं दृष्टविपर्य्यये तुषादपि बिभेमितरा' मितिबोध्यम् । अश्रुतत्वमेवोपपादयति न हीत्यादिना । परमाण्वादिनित्यत्ववाधं ब्रुवाणोवादिनमनिष्टमापादयति श्रूयते चेत्यादिना अनित्यत्वबोधिकाः श्रुतीस्तात्पृच्छति कास्ताइतिचेदिति श्रुतिं पठति अतोन्यदार्त्तमिति । आर्त्तं नश्वरम् । श्वेताश्वतरीयां द्वितीयां श्रुतिं पठति नित्यइति ।'नित्योनित्यानांचेतनश्चेतनानामेकोवहूनां योविदधातिकामा नि'ति आदि पदेन 'नान्यत्किंचनमिषत्' 'वाचारम्भणं विकारोनामधेयम्' न द्वितीयमस्ति' नात्र काचन भिदास्ति' नैव तत्र काचन भिदास्ति' सर्वं विकारजातं मायामात्रम्' सर्वत्र न ह्यस्ति द्वैतसिद्धिः' नास्ति द्वैतं कुतोमर्त्यम् प्रपञ्चोयदि विद्येत निवर्त्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः' इत्यादि-

---

उद्भव ग्रहण स्थिति तिरोभाव का भी उपलक्षण है जिससे आविर्भाव होवे है उसी में स्थिति तिरोभाव भी होवे है अन्य से आविर्भाव अन्य में स्थिति तिरोभाव किसी पदार्थ का नहीं देखा है स्थूलसूक्ष्म नाना विकारोंवाला नाना प्रकार निमित्त निमितिरूप भूत भौतिक सर्वसाकार प्रपंच का आविर्भाव स्थिति तिरोभाव जिस सर्वज्ञ सर्वकारण सर्वनियन्ता से होवे है सो निराकार पर ब्रह्म है येह इससूत्रका वाक्यार्थ है जो साकार संसार के दृष्ट के अनुसार साकार ही कारण माने तो उस कारण का भी कारणान्तर मानना होगा सो भी साकार होगा तो उस का भी कारणान्तर होगा तब अनवस्था दूषण प्राप्त होगा साकारको नित्य भी नमानसकोगे अदृष्ट होने से सर्व कटकारादि साकार अनित्य है और श्रुतियों में कहीं नहीं साकार को नित्य कहा ॥

चतुराननप्रभृतयस्तथा सेद्धुमर्हन्ति । तेषामप्युत्पादस्य श्रुतिषु श्रुतेः । न्यायाच्च न्याय्यं हि तेषां भूतभौतिकाकारवतां साद्यन्तत्वम् अन्यथा किमपराद्धमस्मदादिभिरिति । एतेन अन्येपि साकारानिराकर्त्तव्यास्तस्मान्निराकारमेव साकारसंसारकारणमितिसिद्धम् । एतेन स्वभाव-

श्रुतीनां संग्रहः ननु माभूदचेतनस्य परमाण्वादेरनित्यत्वात्कारणत्वं परन्तु हिरण्यगर्भादेश्चेतनत्वात् 'प्रजापतिर्वाएकोग्रेतिष्ठत्सनारमतैकः सआत्मानमभिध्यात्वा वह्वीः प्रजा असृजते'तिमैत्रायणीयोपनिषदि श्रवणाच्च कारणत्वं स्यादेवेत्याशंक्योत्पत्तिश्रवणेन तदादेरप्यनित्यत्वाविशेषान्मैवमित्याह न च चतुराननप्रभृतयइति । प्रभृतिपदेनेन्द्रादीनां संग्रहः । न चार्हन्तीत्यत्र हेतुमाह तेषामप्युत्पादस्य श्रुतिषु श्रुतेरिति । तथाहि श्रूयते श्वेताश्वतरोपानिषदि'हिरण्यगर्भं जनयामासपूर्वमि'ति 'योब्रह्माणं विदधाति पूर्वं योवैवेदांश्च प्रहिणोति तस्मै'इति प्रजापतिर्वा एकइतिश्रुतौ प्रजापतिशब्दस्तु उपक्रमोपसंहाराभ्यां परमात्मपरइति न तद्विरोधइतिभावः श्रुतिसिद्धोत्पादं हेतुं कृत्वानुमानमप्याह न्यायाच्चेति हिरण्यगर्भादयोऽनित्याः कार्यत्वाद् घटादिवदित्यनुमानाच्चेत्यर्थः । न्यायमुपपादयति न्याय्यं हीत्यादिना हिरण्यगर्भे श्रद्धाजाड्यं तद्भक्तं प्रति व्यतिरेके दण्डमाह अन्यथेति । साकारस्यापि नित्यत्वस्वीकारे इत्यर्थः । पूर्वोक्तन्यायम-

किसी श्रुति में भी साकार को नित्य नहीं कहा और सर्व साकार अनित्य हैं ऐसा वहुत श्रुतियों में कहा है चतुर्मुख ब्रह्मादि भी साकार के आदि कारण नहीं हैं उन की उत्पत्ति भी श्रुतियों में कही है साकार वस्तु की उत्पत्ति कहनी योग्य है जो कभी साकार जगत् का कारण माने तो अस्मदादि को कारण क्यों नहीं मानते हो इसप्रकार ही अन्य गणेशादि साकार कारण नहीं वने है सो जानलेना वैसे ही स्वभाव प्रकृति परमाणु आदि भी साकार संसार के कारण नहीं बने हैं उन का खण्डन विस्तार से ब्रह्ममीमांसा में करा है सो उहांसे जान लेना और शून्य का तो स्वरूप कुछ नहीं है इस वास्तें उस को कारण मानना असम्भव है जो शून्य को जगत का कारण माने तो सर्वजगत शून्यरूप होनेसे प्रतीत ही न होगा जैसे शून्य का प्रत्यक्ष नही होवे है वैसे जगत का प्रत्यक्ष न होगा कारण के समान कार्य का स्वरूप होने से इत्यादि अनेक दोष शून्य को कारण मानने में आवै हैं सो जानलेने ॥ २ ॥

प्रकृतिपरमाणुकारणवादा अपवाद्यास्तेष्वपवादनिमित्तं परीक्षितमेव ब्रह्ममीमांसायां तदेव वक्तव्यमस्ति निराकार मीमांयामपि ततोनात्र प्रयत्यतेतराम् शून्यन्तु निरात्मक-मतोन कारणत्वाकांक्षापि तत्रोन्मिषति साकारस्यास्य तत्कार्य्यत्वे शून्यात्मकमेव सर्वं स्यादिति न किंचिद-प्यत्र केनाप्युपलभ्येत शून्यवदन्यथा तु शून्योपलम्भमपि ब्रूहीत्यादिकं निमित्तशतमत्रानुसंधातव्यमितिदिक् ॥२॥

ननु तस्य साकारकारणस्य निराकारस्य कारणं वाच्य-

---

न्यत्राप्यतिदिशति एतेनान्येपि साकारा इति । पशुपतिगणेशादीनामाकारा-जगत्कारणत्वे निराकर्त्तव्या इत्यर्थः । यद्वासाकाराइत्यस्यसाकारवादा इत्यर्थः । चार्वाककुलीशपाशुपतशैवरसेश्वरसिद्धान्तादयोन्येपीत्यर्थः । न च किंचिदित्या-दिना सामान्यतउक्त्वा विशेषतोप्यतिदिशति एतेन स्वभावेत्यादिना । शून्य-वादी तु शून्यस्य निरात्मत्वादेव साकारवादिश्रेणीमेव नारोहतीत्याह शून्यन्त्विति न कारणत्वाकांक्षापि तत्रोन्मिषतीति । तत्र शून्ये कारणत्वाकांक्षापि नास्ती-त्यर्थः ॥ अन्यथा । यत्किंचित्साकारोपलम्भे तु । शून्योपलम्भस्वीकारे तु उप-लम्भकोपलभ्यमानयोरपि स्वीकारप्रसंगाच्छून्यशून्यमेवस्यात् । किं च शून्यस्यैक-स्वभावत्वे साकारवैचित्र्यं न स्यात् मायावत् यत्किंचित्वैचित्र्यहेतुस्वीकारे शून्यत्वमेव भज्येतेत्यादेः इत्यादिकमित्यत्रादिपदेनसंग्रहः दिगर्थस्तु यतः सा-कारेतिसूत्रभाष्यावतरणे मध्ये च पुष्कलमुक्त इति बोध्यम् ॥ २ ॥ पूर्वत्र श्रुति-स्मृतिन्यायैः शुद्धनिराकारस्यैव लक्षणविधया कारणत्वं स्थापितं संप्रति त-स्यापि कारणान्तराशङ्कनेनापवादसंगत्या तृतीयं सूत्रमवतारयति नन्वित्यादिना मध्ये सिद्धान्ती शङ्कते तदकाणंचेदिति तदितिप्रथक्पदम् तन्निराकारामित्यर्थः । साकारमेव तथास्त्वित्यन्वयः । यद्यकारणकमेव निराकारं साकारकारणं तर्हि तदपेक्षया यत्किंचित्साकारमेव साकारस्य मूलकारणमस्त्वित्यन्वयार्थः । किं तेन निराकारेण साध्यं नास्तीत्यर्थः । ननु श्रीगुरोराचार्य्यस्य पूर्वोक्तश्रोत्रियत्वादि-विशिष्टत्वेपि 'वाचोविग्लापनं हितदि' त्याद्युक्तेर्ब्रह्मविदः प्रश्नोत्तरादावपि औदासीन्यात्कथं शिष्यसंदेहपरिहारइत्याशंक्य दयालुत्वान्नैवमित्याह दयालु-रिति । दयते इति दयालुः दयावानाचार्य्यइत्यर्थः । 'सम्यग्विनीताप्रदवस्ता-

म् तदकारणंचेत्साकारमेवास्तु तथा किं तेन निराकारे-णेत्यतआह दयालुर्भगवान् सूत्रकारः —

## सू० न च तदुद्भवोऽन-वस्थितेरश्रुतेश्च ॥ ३ ॥

नाचार्य्यान् प्रचक्षते ' इत्युक्तेः कृपाया अपि आचार्य्यत्वाङ्गत्वस्मरणात् । यथाह शाण्डिल्यः ' आचार्य्यरूपं जगृहे कृपया भक्तवत्सलः । आचार्य्योबहुधा जातोऽनुगृह्णन् सुवहून् जनान् ' इति तथोक्तं कुलार्णवपञ्चमपटले ' मद्भक्तवत्सलो धीरः कृपालुः स्मितभाषणः । इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये ' इति 'दयदानगतिहिंसारक्षणेषु ' अस्मात् ' स्पृहिगृहिपतिदयी ' त्यादिसूत्रेण-लुच्प्रत्ययइति बोध्यम् दया च प्रत्युपचिकीर्षा विनैव परदुःखप्रहाणेच्छा । यथाहुः 'यत्नादपि परक्लेशं हर्तुं या हृदि जायते । इच्छा भूमिसुरश्रेष्ठ सा दया-परिकीर्त्तिता ' इति आत्रिसंहितायामप्युक्तम् ' परस्मिन् बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा । आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता ' इति तथा महाकालसं-हितायामपि ' परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा । आर्तेष्वपि दयाबुद्धि-र्दयेति परिकीर्तिता ' इति उपदेशं कुर्वन्नपि श्रीगुरुर्निराकारपरब्रह्मानंदभक्ति-रसास्वादमेव गृह्णातीत्याह भगवानिति भक्तिषट्कवानित्यर्थः ' श्रियं मोदं प्रमोदं च ब्रह्मानंदरसं तथा । भगषट्केन भक्तस्तद्द्वादशाङ्गेषु भावये ' इतिशांडिल्य-संहितावचनात् तदुक्तं श्रीनानकं नामावतारं प्रकृत्याम्बरीषं प्रति श्रीविष्णु-नापि 'इतिनामावतारोमे भवेद्भक्तिपरायणः । करिष्यति च भूलोके नाममाहा-

---

तिस निराकार का कारण कौन है इस शंका का समाधानसूत्र में करे हैं ( सू० न च तदुद्भवोऽनवस्थितेरश्रुतेश्च ॥ ३ ॥ ) निराकारका कोई कारण होवे तो उसका भी कारण मानोगे वैसे आगे भी कारणपरम्परा के मानने से अनवस्था दोष प्राप्त होवेगा निराकार के वत् साकार को तो अकारण नहीं मानसकोगे साकार होने से कोई साकार वस्तु लोक में अकारण नहीं देखी है साकार का साकार कारण मानने में भी अनवस्था आवे है सो पूर्वकहा है इसवास्ते साकार का निराकार कारण है अर्थात् वो सर्व का कारण है और उस का कारण कोई नहीं है ।

तस्योद्भवस्तदुद्भवः तस्य सर्वसाकारकारणस्य निराकारस्य परमात्मनोनोद्भवः शक्यशङ्कः कुतोऽनवस्थितेः अनवस्था ह्येवं सति प्राप्नुयात्तस्यापि कारणान्तरान्वेषणप्रसंगात् एवमग्रेपीति सा चानवस्था मूलघातिनी साकारमपि कार्य्यमुपहन्यात्कारणानवस्थाने हि कार्य्यमप्यनवस्थितं स्यात्तदवस्थितिनियतत्वात्तदवस्थितेः । तस्याकारणत्ववत्साकारमप्यकारणं स्यादिति शङ्कापि दृष्टविरुद्धत्वान्नोद्भवितुं प्रभवति न हि कोपि साकारः सुतादिरकारणोल्लोके दृष्टः । अथ तस्यापि साकारमेव कारणं दृष्टमिति प्रकृतेपि साकारएव संसारकारणं स्यान्ननिराकारइतिचेन्न साकारे अनवस्थानप्रसङ्गस्योक्तत्वान्निराकारमेवाकारणं संसारकारणमित्यवेहि । किं चैकदेशसाम्ये

---

त्स्यमद्भुत ' मिति सद्भवोयस्येतिवहुव्रीहिभ्रमं वादयन्सूत्रं तावद् व्याचष्टे तस्योद्भवइत्यादिना अनवस्थामुपपादयति—अनवस्थाह्येवमित्यादिना तस्यापि— मूलनिराकाररूपकारणस्यापि निराकारस्य यत्कारणं तदपि कारणान्तरमपेक्षते एवमुत्तरत्रापीत्याह-एवमग्रेपीति ननु वीजाङ्कुरवन्नेयमनवस्थादोषकरीत्याशंक्य मूलघातित्वेनास्यादोषत्वान्मैवामित्याह सा चानवस्थामूलघातिनीति मूलघातिनीत्वमुपपादयति साकारमपीति ननु यथाऽनवस्थाभयान्निराकारस्य कारणान्तरं न कल्प्यते तथा किंचिन्मूलसाकारेपि कारणत्वं प्रकल्प्याग्रेनवस्थाभयात्कारणान्तरं न प्रकल्प्यतामित्याशंक्य साकारत्वस्याविशेषात् पुत्रादिं प्रति पित्रादेरपि कारणत्वाभावप्रसंगान्मैवमित्याह तस्याकारणत्ववादिति । तस्य— निराकारस्य । नास्ति कारणं यस्य तदकारणंतस्य भावस्तत्त्वम् निराकास्य कारणाभाववत्त्वमिदेत्यर्थः यथा निराकारमकारणकं तथेतिव्यक्तोर्थः । ननु न हि साकारं निष्कारणकमितिमतिपाद्यतेऽपितुविमतंसाकारकारणकंसाकारत्वात् दृष्टसाकारघटादिवदित्युपगच्छामइतिशंकते अथेति तस्यापि साकारपुत्रादेरपि । प्रकृतेपि निखिलसाकारकाणत्वान्वेषणेपिअनवस्थानप्रसङ्गस्योक्तत्वादिति। द्वितीयसूत्रव्याख्याने तथासतीत्यादिग्रन्थेनोक्तत्वादितिबोध्यम् । ननुयथा भवाद्भिरनवस्थाभयान्निराकारस्य कारणान्तरं नान्वेष्यते तथास्माभिरपि मूलसाकारस्य

सति लौकिको दृष्टान्तीक्रियते लोके सर्वथा साम्ये तु तदेव तदिति दृष्टान्तकथैवोच्छिद्येतेत्यादिकं युक्तिवृन्द-

---

कारणान्तरं नान्वेषणीयमस्ति 'यत्रोभयोः समोदोषः परिहारोपि वा समः।नैकः पर्य-नुयोक्तव्यस्तादृगर्थविचारणे' इतिन्यायेन बाधकसाधकयोरुभयत्रापि तुल्यत्वादि-त्यतोदृष्टान्तासिद्धिरूपं बाधकमाह किंचेत्यादिना ।विमतं साकारकारणकं साका-रत्वात् दृष्टसाकारघटादिवदित्यनुमाने विमतपदेन न तावत् निराकारं धर्त्तुं शक्यते दत्तोत्तरत्वात् पूर्वोक्तस्वशङ्काग्रन्थविरोधाच्च परिशेषात् विमतपदेन साकारमेवव-क्तव्यम् तत्र च साकारपदेन यत्किंचित्साकारं गृह्येत निखिलं वा नाद्यः सि-द्धसाधनात् अर्थान्तरत्वाच्च न द्वितीयः सर्वस्य पक्षकुक्षिप्रविष्टत्वात् दृष्टांता-भावेनान्यत्र व्याप्तिग्रहाभावादनुमानमेवनोदियादित्याशयेन प्रथमं सिद्धसाध-नमाह एकदेशसाम्ये सति लौकिकोदृष्टान्तीक्रियतेइति यदि एकदेशसाम्यमा-दाय दृष्टान्तकारणं प्रकृते विवक्षितं तर्हि सिद्धसाधनमितिभावः द्वितीयं प्रत्याह लोके सर्वथा साम्येत्विति सर्वसाकारस्य पक्षकुक्षिनिविष्टत्वेनानुमानमेव नो-दियादितिसिद्धेः प्रतिबन्धकत्वेन पक्षतायाएवाभावात् अन्यत्र व्याप्तिग्रहाभा-वाच्चेति।तदेवाह दृष्टान्तकथैवोच्छिद्येतेति।—दृष्टान्तवृत्तिव्याप्तिकथेत्यर्थः । किं च साध्यसाधनोभयविषयिण्यास्तदभावविषयिण्या वाबुद्धेःसाम्यमविरोधोयस्मिन्नर्थे सोर्थोदृष्टान्तः वादिप्रतिवादिनोः साध्यसाधनोभयप्रकारकतदभावद्वयप्रकारका-न्यतरनिश्चयविषयोदृष्टान्तइति फलितार्थः। तथा चाभेदे प्रतिपाद्यप्रतिपादकभाव-एवोच्छिद्येत न हि स्वं प्रतिस्वस्य प्रतिपादकत्वं सञ्जाघटीति अन्यथा पर्वतोवन्हि-मान् धूमवत्वादित्यादौ महानसादिदृष्टांतं विनैव प्रतिवादी तुष्येत् न ह्यन्वयिव्यति-रेक्यन्यतरव्याप्त्याश्रयप्रदर्शनं विना परीक्षकाणां तुष्टिःसम्भवति लौकिकपरीक्ष-काणां हि बुद्धिसाम्यविषयस्यैव दृष्टान्तत्वात् तथा चाक्षपादीयं सूत्रं 'लौकिकपरीक्ष-काणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त' इति तथाच न्यायभाष्यम् 'यमर्थं लौ-किकाबुध्यन्ते तथा परीक्षकाअपि तथादृष्टान्तइति किं च न हि सर्वसाम्याधि-करणदृष्टान्तप्रदर्शनेनैव परीक्षकाः स्वपक्षप्रतिपक्षसाधनबाधनक्षमाभवन्तीति दृ-ष्टान्तविरोधेनहिप्रतिपक्षाः प्रतिषेद्धव्याभवन्ति । दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीतीत्यादिकमभिप्रेत्याह इत्यादिकं युक्तिवृन्दमूहनीयमिति । ननु व्यत्यासोनन्वयश्चैव प्रसिद्धोभूतएव च। सर्वासांहारिकश्चेति दृष्टान्तः पञ्चधा

मूहनीयमत्र। किं चास्य कारणस्य कारणबोधिकां न कांचिच्छ्रुतिमुपलभामहे येन तस्यापि कारणमाश्रयामहे न च विना श्रुतिं भगवतीं नोविश्वासोऽतीन्द्रियार्थेषु येन तां विनापि तस्य तन्मन्यामहे तस्मादकारणं निराकारं साकारकारणमितिसिद्धम्॥ ३॥

स्यादेतदप्रतिषिद्धमनुमतं भवतीतिन्यायेन श्रुतिषु तत्कारणप्रतिषेधाश्रुतेः स्यात्तस्य कारणमतोब्रवीति—

---

स्मृतः' इतिब्रह्मपुराणोक्तेः 'गगनं गगनाकारं सागरः सागरोपम' इत्यादाविवानन्वयएव प्रकृते दृष्टान्तोस्तु किं च पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकसामानाधिकरण्यसिद्धेरप्रतिबन्धकत्वात् पक्षैकदेशस्यापि दृष्टान्तत्वं संभवति अतएव नवीनतार्किकैरपि प्रयुज्यते 'पृथिवीतरेभ्योभिद्यते गन्धवत्वात् घटादिवदित्यतः श्रुत्यननुग्राकत्वेन वाद्युक्तप्रतिबन्दीमर्थाददूषयन्प्रकृते सौत्रं द्वितीयं हेतुंव्याचष्टे—किंचास्य कारणस्य कारणबोधिकामिति।—निराकारस्य यत्कारणं तद्बोधिकामित्यर्थः। यथानिराकारस्य कारणान्तरान्वेषणेश्रुतेरभावस्तथा साकारस्य साकारकारणान्तरान्वेषणेपीतिभावः ननु निराकारस्य कारणान्तरबोधकश्रुत्यभावेपि निराकारस्य कारणान्तरमस्तुविरोधाभावात् किं चाप्रतिषिद्धमनुमतं भवतीति सुश्रुतोक्तन्यायेन तुल्ययुक्त्या च साकारस्य साकारान्तरमेव कारणमस्त्वित्याशंक्य श्रुत्यननुग्राहकत्वेन तादृशकल्पनायाअप्रमाणकत्वेनोक्तत्वान् मैवमित्याह न च विनाश्रुतिमिति भगवतीम्—सर्वप्रमाणशिरोमणिमित्यर्थः। नः अस्माकम् वेदवादिनाम्। विश्वासः निश्चयः। अतीन्द्रियार्थेषु इतरप्रमाणैर्दुर्लक्ष्येषुपदार्थेषु तत् कारणम्। तथा च साकारस्यसाकारकारणान्तरान्वेषणेनिराकारस्यकारणान्तरान्वेषणे च श्रुतेरननुग्राहकत्वात्परिशेषात्साकारस्य निराकारमेव कारणं सिद्धं पूर्वोक्तश्रुत्यादिप्रमाणादित्युपसंहरति तस्मादिति यस्मान्निराकारमकारणकं तस्मादिति जगत्कारणं सिद्धमित्यर्थः॥ ३॥

आक्षेपसंगत्या चतुर्थसूत्रमवतारयन् आशंकते स्यादेतदित्यादिना। अप्रतिषिद्धमनुमतंभवति शिष्टानामितिन्यायादितिशेषः अस्यार्थस्तु अस्मत्कृते लौकिकन्यायस्वरूपप्रकाशेद्रष्टव्यइतिबोध्यम्। तत्कारणप्रतिषेधाश्रुतेरिति तस्य निराकारस्य कारणान्तरप्रतिषेधाश्रवणादित्यर्थः तस्य निराकारस्य न कारणमितिसमस्तं कारणाभावइत्यर्थः जनकप्रतिषेधादितिसौत्रं हेतुं व्याचष्टे अपितुइति। का-

# सू० जनकप्रतिषेधाच्च ॥ ४ ॥

परमात्मनोनिराकारस्य न कारणं केवलं न श्रूयते अपि तु कारणस्य तस्य कारणनिराकरणं श्रुतिषूपलभामहे ताश्च न तस्य कश्चित् पतिरस्तीत्यारभ्य न चास्य क-

---

रणस्य तस्य-तस्य निराकाररूपकारणस्येत्यन्वयार्थः। श्रुतिं तावत्पठति न तस्ये-त्यादिना तथा च श्वेताश्वतराणां मन्त्रोपनिषदि श्रूयते 'न तस्य कश्चित् पतिरस्ति लोके नचेशिता नैव च तस्य लिङ्गं स कारणं करणाधिपाधिपो न चास्य कश्चिज्ज निता न चाधिपः' इति अस्यार्थः। ननु शक्तिमतां प्रजापतीनां दक्षादीनां पतिर्हि रण्यगर्भो दृष्टस्तद्वदस्यापि स्यादित्यत आह नेति तस्य प्रकृतपरमेश्वरस्य कोपि स्वामी पालयिता वा जगति नास्ति। ननु माभूत्पालयिता पितृभ्यां विहीनस्येव शिशोर्भवतु नियन्तेत्यत आह न चेशिता नापि नियन्ता चकारस्तस्यास्तीतिपदानुवृत्त्यर्थः। ननु सशरीरत्वानुमानेनोभयमपि सम्पादयितुं शक्यमित्यत आह नैवचतस्यलिङ्गं। तस्यानंदात्मनोलिङ्ग्यते गम्यतेऽस्मिन्ननेनवातद्वलिङ्गं शरीरमित्यर्थः। यद्वा नैव च तस्य लिंगमस्ति येनासावनुमीयेत प्रपञ्चाख्यकार्य्यदर्शनात् कारणमात्रमे-वानुमीयते न कारणविशेषः अतः सर्वज्ञं ब्रह्मजगत्कारणमित्यस्यार्थस्य वेदैक-

---

किंच एक देशकी समानता होने से लौकिक दृष्टान्त होवे है सर्वथा समता होने से तौ दृष्टांत कहना असङ्गत है किंच इस निराकार के कारण का बो-धक कोई श्रुति नहीं है और विना श्रुति से अतीन्द्रिय पदार्थों के मानने में हमको विश्वास नही होवे है इस वास्ते निराकार का कोई कारण नहीं है॥३॥ श्रुतियों में निराकार के कारण का निषेध भी तो नहीं करा है और जिस का निषेध न किया हो उस का मानना योग्य है इस शङ्का का समाधान सूत्र करके करे हैं ( सू० जनकप्रतिषेधाच्च ॥ ४ ॥ ) तिस निराकार का कोई स्वामी नहीं है और उस का जनक भी नहीं है वैसा श्रुतियों में निरा-कार के कारण का निषेध स्पष्ट किया है। ( शंका ) यहां अप्रसक्त दोष आवे है। ( समाधान ) तुम्हारे जैसे मंदमति करकै प्रसक्त का निषेध है। जैसे तुम कथन करते हो निराकार का कारण होना चाहिये वैसे किसी मंद-मति पुरुष ने कारण की आशङ्का की उस करके प्रसक्त कारण का वेद ने निषेध किया है।

श्चिज्जनिता न चाधिपइत्येवमादयः । अत्राप्रसक्तप्रतिषेधोदोषइति चेन्न त्वादृङ्मन्दमतिप्रसक्तत्वात् । कथमन्यथा प्रसज्यतेत्वयेति तूष्णीमास्स्व । भवाम्यहं मन्दमतिर्वेदे तु न कोपि मादृशो यं प्रतिवेदस्तथाऽऽवेदयेदिति। चेत्त्वामावेदयति वेदइत्यालोकयस्व न हि विज्ञानां विज्ञापनाय वेदप्रयत्नोविज्ञत्वादेव तेषां तत्रानर्थक्यप्रसंगात् अर्थप्रत्यायनार्थं शब्दप्रयोगात् अज्ञाविज्ञापनाय तु वेदयत्नः सफलस्तादृशास्त्वदादयएव तत्प्रसक्तं निराकारकारणं प्र-

---

समधिगम्यत्वं नानुमानगम्यत्वमिति यावत् नैवेति एवकारः पाक्षिकसत्त्वनिवारणार्थः चकारोस्तीतिपदानुवृत्तिं कुर्वन पतीश्चित्रभावाभ्यां लिंगाभावं समुच्चिनोति सः प्रसिद्धः कारणम् सर्वस्य हेतुः । करणाधिपाधिपः । करणादीनां चक्षुरादीनामधिपा अग्न्यादयस्तेषामधिष्ठायपालयिता । नन्वेवंभूतोपि जायमानोस्त्वित्यतआह न चास्यकश्चिज्जनिताअस्यानन्दात्मनः कोपि जनितोत्पादकोपि न माभूदुत्पादकोऽविद्यावत्कश्चिदन्य एव पालयितास्त्वित्यतः न चाधिपः नाप्यधिपालयिता आद्यश्चकारोजनकाधिपाभावयोः समुच्चयार्थोद्वितीयोनुक्तसर्वसंसारधर्माभावसमुच्चयार्थ इति ' यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चिद् । ब्रह्मआदिमध्यान्तशून्यम् । अनाद्यन्तावभासात्मा सर्वकारणकार्य्यात्मा कार्य्यकारणविवर्जितः समाधिशून्यात्माआदिमध्यान्तवर्जितः इत्यादिश्रुतीनां ' अनादिमध्यान्तमनन्तवीर्य्यमि ' त्यादिस्मृतेश्च आदिपदेनसंग्रहः अत्र सर्वत्रादिपदं कारणपरं तद्रहितमित्यर्थः । प्रसक्तं हि प्रतिषिध्यते इति न्यायविरोधं शङ्कते अत्राप्रसक्तेति । कीदृशः प्रसङ्गः प्रतिषेधेऽपेक्षितव्यः तात्त्विकोतात्त्विकोवा नाद्यः नेदं रजतमित्यादौ तात्त्विकप्रसंगाभावेपि निषेधस्य सर्वजनीनत्वात् द्वितीयं त्वङ्गीकृत्य निषेधति न त्वादृङ्मन्दमतिप्रसक्तत्वादिति निषेधोहि प्रसक्तमात्रमपेक्षतेन तात्त्विकमतात्त्विकं वा नियमेनापेक्षते इति भावः। प्रसक्तं प्रसज्जनार्हमितिमञ्जूषायां नागोजिभट्टोव्याचष्टेतिबोध्यम् । यद्यपि अर्थवादाधिकरणे अन्त्ययोर्यथोक्तामिति न पृथिव्यामग्निश्चेतव्योनान्तरिक्षे न दिवीत्यादिवाक्यं हिरण्यं निधाय चेतव्यमित्यनेन विहितस्य हिरण्यस्यस्तुतिपरंस्तुत्युपपादकस्तुनिषेधबोधइत्युक्तं तत्र हि प्रतियोगिनो-

त्तिषेधति वेदः सूत्रकृच्चेत्यनवद्यम् ॥ ४ ॥ निरूपितं निराकारं स्वात्मतयाविर्भूतं मोक्षभूतमित्याचष्टे-

## सू० तदाविर्भावो मोक्षः ॥ ५ ॥

तस्य निराकास्य निरुपाधेर्निरुपद्रवस्य परमात्मनः प्रत्यगात्मनः सच्चिदानंदादिस्वरूपस्याविर्भावो नाम ।

---

न्तरिक्षादिनिष्ठचयनस्याप्रसक्तस्यापि प्रतिषेधोयथाकृतस्तथात्राप्यस्तु इत्येवोत्तरयितुं युक्तं तथापि सुहृद्भावेन भाष्यकारैस्तथैवोत्तरितमितिबोध्यम् अत्राशङ्कते—भवाम्यहमित्यादिना ।—वेदविधिविहितं यः स्वकीयं मन्यते अयं विधिर्मामेव प्रेरयतीति सएव तत्र नियोज्यस्तथा च त्वमपीत्युत्तरयति त्वामित्यादिना प्रसङ्गमुपसंहरति तत्प्रसक्तमिति । तैर्भवादृशैरज्ञैर्यत्प्रसज्जितमित्यर्थः। शेषं सुबोधम् ॥ ४ ॥ उपोद्घातं निरूप्यावसरसङ्गत्या वक्ष्यमाणभक्तेः साधनत्वाय फलं तावत् निरूपयिष्यन् पूर्ववृत्तमनूद्य पञ्चमसूत्रमवतारयति निरूपितमित्यादिना केवलदुःखनिवृत्तिरेव मोक्षइति बहवोमन्यन्ते परमानन्दप्राप्तिर्दुःखनिवृत्तिश्च मोक्षइत्यपि केचित् तान्सर्वान् कटाक्षयन् ‘ स्वरूपावस्थितिर्मुक्ति’रित्यादिश्रुतेः सच्चिदानन्दस्वरूपाविर्भावएव मुख्योमोक्षः दुःखनिवृत्तिस्तु आर्थिकी गौणीतिसूत्रकृतोभिप्रायमभिव्यञ्जयन् ‘ तदाविर्भावोमोक्ष’ इतिसूत्रं व्याचष्टे—तस्येत्यादिना ‘ तुरीयं निराकारमि’त्यादिश्रुतेर्ब्रह्मणोनिराकारत्वम् ‘ एकमेवाद्वितीयं ब्रह्म ’ अद्वितीयमखिलोपाधिविनिर्मुक्त’मित्यादिश्रुतेर्निरुपाधित्वमुपद्रव रहितत्वं प्रत्यगात्माभिन्नपरमात्मनइत्यर्थः । प्रत्यगभिन्नं ब्रह्मेत्यादिश्रुतेः ‘ सच्चिदानन्दस्वप्रकाशंब्रह्मेत्यादिश्रुतेः सत्वादिति बोध्यम् । सभगवः कस्मिन् प्र-

---

( शङ्का ) वेद में कौन मंदमति है जिस को वेदने कारण निषेध बोधन किया हो ( समाधान ) आप को ही वेदबोधन करे है अज्ञानियों के बोधन वास्ते ही वेद का उद्यम है सो अज्ञानी आपजैसे हैं ॥ ४ ॥ निराकारस्वरूप आत्मा ही मोक्षस्वरूप है ऐसा कहे हैं ( सू० तदाविर्भावो मोक्षः॥ ५॥ ) निराकार सतचित् आनन्दरूप परमात्मा का आविर्भाव मोक्षस्वरूप है अविद्याकृत नामरूपाकारता की निवृत्ति होने से आत्मस्वरूप में स्थित होना येह ही मोक्ष मुमुक्षुजनो को अपेक्षित और त्रिविधि दुःख निवृत्ति वा एकदेशित दुःखनिवृत्ति मोक्ष नहीं है उस को मोक्ष का एक देश होने से मोक्षरूपता नहीं बने है.

अविद्यातत्प्रत्युपस्थापितदोषावरणनिवारणेन वृत्तिसारूप्यहानात्स्वात्मप्रतिष्ठा सएव मोक्षोमुमुक्ष्वपेक्ष्योन त्रिविधदुःखनिवृत्तिरूपः॥ एकविंशतिदुःखध्वंसरूपोवा तस्य मोक्षैकदेशत्वात् न हि दुःखाभावमात्रेण कृतकृत्यता कर्त्तुं शक्या तथा सति जड़ानां नित्यमुक्ततापत्तेस्तादृशमोक्षस्य मुमुक्ष्वनपेक्षणप्रसंगात् दुःखनिवृत्तेरागन्तुकत्वाच्च स-

---

तिष्ठितः स्वे महिम्नि। स्वेन रूपेणाभिनिष्पद्यते' इत्यादेः श्रुतेः 'संपद्याविर्भावः स्वेन शब्दादि' तिसूत्राच्च मोक्षस्य स्वात्मप्रतिष्ठितत्वमितिभावः। तस्य सच्चिदानन्दादिस्वरूपस्याविर्भावोनाम स्वात्मप्रतिष्ठेत्यन्वयः। वृत्तिसारूप्यहानादिति अविद्यातत्प्रयुक्तमावरणं च निवार्य्यतेऽनेनेति अविद्यातत्प्रत्युपस्थापितदोषावरणनिवारणं भक्तिज्ञानं तेनेत्यर्थः निवारणेत्यत्रकर्मणि ल्युट् व्यधिकरणोबहुव्रीहिर्वा तथा च अविद्यावरणकृतस्य दुःखितोऽस्मिमूढोऽस्मीत्याद्यभेदसमारोपरूपवृत्तिसारूप्यस्य हानात् भवति च पुरुषस्य स्वरूपानंदाविर्भावोमोक्षइत्यर्थः। अविद्यादशायां हि अस्तिवृत्तिसांकीर्ण्यं तदेववृत्तिसारूप्यम् तदुक्तं भगवता पतञ्जलिना 'वृत्तिसारूप्यमितरत्र' इति 'घोरमूढ़ासु मालिन्यात्सदंशश्चातिरोहित' इत्युक्तेः अस्तिचानन्दादेस्तिरोहितत्वमिति भावः। दुःखनिवृत्तौ गौणीत्वं प्रतिशब्दयति न त्रिविधदुःखनिवृत्तिरूपइति—। इदं सांख्याभिप्रायेणोक्तम् यद्यपि प्रकृतिपुरुषान्यताख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति सांख्यैस्संख्यायते तथापि पक्षे दुःखोच्छेदमभिप्रेत्यैवमुक्तम् 'दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेताविति' 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इतितैरुक्तेः। तथा च न्यायसूत्रम् 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'इति। ननु तत्वज्ञानद्वारा दुःखाभावएव मुख्योमोक्षः कथं न स्यात् 'तरतिशोकमात्मवि'दित्यादिश्रुतेरित्यतआह न हि दुःखाभावमात्रेणेति।—मात्रपदं स्वस्वरूपाविर्भावं व्यावर्त्तयतीतिबोध्यम्। ननु

---

दुःख के अभावमात्र से कृतकृत्यता नहीं होवे है दुःखाभाव जड़ पदार्थों में भी है उन को नित्यमुक्तिता प्राप्त होवेगी जड़ साधारण मोक्ष की मुमुक्षुजन अपेक्षा भी नहीं करे हैं और सर्व पुरुष दुःखनिवृत्ति पूर्वक सुख की प्राप्ति में ही यत्न करे हैं दुःखनिवृत्ति मात्र की कोई भी इच्छा नहीं करे है इस वास्ते साङ्ख्य नैयायिकादि स्वीकृत दुःखनिवृत्ति मोक्ष नहीं है किंतु दुःखनिवृत्ति सहित परमानन्द स्वरूप आत्मा का आविर्भाव ही मोक्ष है उस की प्राप्ति में उद्यम करना चाहिये।

र्वांहि सुखसम्पत्त्यै प्रयतते। यदि च तत्र दुःखलेशउपतिष्ठते तदा तमपि सहते सुखलाभलोभात् दुःखानुपरक्तसुखलाभश्चेत्तदा स्वात्मानं ततः कृतकृत्यम् मन्यते तस्माद् दुःखनिवृत्तिरागन्तुकी सुखलाभएव पुरुषार्थः सुखमानन्दश्चेतिपर्य्यायौ आनन्दश्च परमात्मा प्रत्यगात्मा तस्याविर्भावएव मोक्षः न हि तदाविर्भावे दुःखदैन्यदारिद्र्यादीनां मनागप्याविर्भावोभवितेति भाव्यं भ-

---

यदनुयोगिकप्रसक्तदुखध्वंसः स्वरूपेण वर्त्तते तस्यैव मोक्षइतिकृत्वा जड़ानां तत्प्रसक्तेरेवाभावात्कुतस्त्योमोक्षइत्यरुचेराह दुःखनिवृत्तेरागन्तुकत्वाच्चेति दुःखनिवृत्तेर्ध्वंसत्वादेव कादाचित्कत्वं सुखस्य त्वात्मस्वरूपत्वान्नित्यत्वमितिभावः। तत्रेति सुखसम्पत्त्यर्थं क्रियमाणे यत्ने इत्यर्थः। उपतिष्ठते सन्निहितोभवतीत्यर्थः। यत औदासीन्यदशायां दुःखाभावस्य सत्त्वेपि न कृतकृत्यता अतस्सुखसमभिधानकालेपि न तस्य पुरुषार्थत्वव्यवहारः एकत्रानिर्णीतस्यार्थस्यान्यत्रापि तथा भवितुमर्हत्वादिति भारापनयने तु विशिष्टात्मनएव स्वरूपाविर्भावाद् नाव्याप्तिरित्यभिप्रेत्याह निवृत्तिसहितः सुखलाभश्चेति। 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तर' मित्युक्तेः। आत्मस्वरूपसुखाविर्भावप्रतिबन्धकदुःखनिवृत्तेः सत्त्वादसंगतिः स्यादितिभावः। सुखलाभइत्यस्य सुखरूपाभिन्नप्रत्यगात्मसाक्षात्कारइत्यर्थः। अन्यथा विषयसुखलाभस्याप्यागन्तुकत्वेनासंगतिः स्यादितिभावः दुःखनिवृत्त्या सहितइति समासेन दुःखनिवृत्तेः स्फोरितं गौणत्वं न विस्मर्त्तव्यमितिमन्तव्यम्। दुःखनिवृत्तेर्गौणत्वमुपसंहरति तस्मादिति सुखलाभइति। सच्चिदानन्दात्मस्वरूपाविर्भावइत्यर्थः। उपक्रमानुसारादितिभावः। आनन्देनोपक्रमः। सुखेनोपसंहारइति भेदभ्रमं व्युदासयन्नाह सुखमानन्दश्चेतिपर्य्यायाविति। ननु आनन्देन विषयानन्दएव पुरुषार्थत्वेन कुतोन गृह्यतेइत्यतआहआनन्दश्चात्मा प्रत्यगात्मेति 'रसं ह्येवायं लब्ध्वानन्दीभवति कोह्येवान्यात्कः प्राण्यात् यदेष आकाशआनन्दोन स्यात् एषह्येवानन्दयाति। सैषानन्दस्य मीमांसा भवति। एतमानन्दमयमात्मानमुपसंक्रामति आनन्दं ब्रह्मणोविद्वान्नबिभेतिकुतश्चने'तिइत्यादिश्रुतिभ्यः। दुःखनिवृत्तेः सकाशादानन्दात्माविर्भावं व्यतिरेचयति न हीत्यादिना दुःखं पीडा दैन्यं कार्पण्यम्। दारिद्र्यं दुर्गतिःआदिपदेन

वता तद्भावनायां प्रयत्नवतेत्याशयः। न च मुच्लृधातोर्बंधविश्लेषमात्रार्थकत्वाद्बन्धस्य च बाधनालक्षणस्य प्रतिप्राणिप्रतिकूलवेदनीयस्य दुःखस्यैवैकस्य सर्वसमीक्षकानुभवसिद्धत्वात्तन्निवृत्तिमात्रमेव मोक्षलक्षणं विवक्षणीयं नाधिकं सुखलाभलक्षणमितिवाच्यम् यतएवं सति बन्धधातोरपि सूत्रादिस्थूलबन्धने प्रायःप्रयोगाद् दुःखे

---

दोषभ्रान्तिमिथ्याज्ञानपारतन्त्र्यादेः संग्रहः ईषद्भेदोप्यध्यवसायकर इतिन्यायेन तथोक्तमितिबोध्यम्। भविता—भविष्यति। इत्याशयइत्यस्य श्रुतिसूत्रकारयोरित्यादिः। 'बाधनालक्षणं दुःखमिति—तदत्यन्तविमोक्षोऽपवर्ग' इति सूत्रद्वयं कक्षीकृत्य शङ्कते न चेत्यारभ्य वाच्यमित्यन्तेन। मुचॢमोक्षणे अस्मादकर्मकात्सन्नन्ताद् घञि मोक्ष इति रूपमभिप्रेत्य मोक्षअवसानेचुरादिः अस्माद्घञि अचि वा मोक्ष इति मुकुटोक्तं तु निर्मूलमिति ध्वनयन्नाह मुचॢधातोरिति। द्वेष्यं दुःखमिहेष्यते ' इत्युक्तेः प्रतिकूलज्ञानविषयस्य दुःखस्येत्यर्थः। तन्निवृत्तिमात्रमेवेत्यत्र मात्रैवकाराभ्यां सुखस्वरूपाविर्भावोऽव्यवच्छिद्यतेतदेवाह नाधिकमिति न मुख्यमित्यर्थः। सुखलाभलक्षणं सुखलाभरूपमित्यर्थः। दुःखनिवृत्तावेवास्य प्रयोग इति नायं नियमोन्यत्रापि 'वत्सःस्वयमेवमोक्षते' 'नीविमोक्षोहि मोक्ष' इत्यादिशिष्टप्रयोगदर्शनादित्येव उत्तरयितव्येपि परं प्रतिवन्धैव समाधत्ते एवं सतीत्यादिना—सयथाशकुनिः सूत्रेण प्रबद्धोदिशं दिशं पतित्वान्यत्रायतनम-

---

(शंका) मोक्ष शब्द के अन्तर्गत मुचधातु का बन्ध वियोग अर्थ और बन्धनाम दुःख का है इस वास्ते दुःख की निवृत्ति ही सो मानना चाहिये सुख की प्राप्ति को मोक्ष शब्द का अर्थ मानना शब्दार्थ मर्यादा से बाह्य है (समाधान) वैसाकहो तौ बन्ध धातु का भी सूत्रादि बन्धन मे ही प्रयोग होने से दुःख का बंधन नाम न होगा जो कहो कि दुःख कारण सूत्रादि बन्धन में बन्ध शब्द का प्रयोग होने से कार्य दुःख को भी लक्षणा करके बन्ध शब्द बोधन करे है तौ प्रकृत में भी दुःखनिवृत्ति को आत्मानन्द का आविर्भावक होने से आनन्दाविर्भाव मे भी प्रयोगहोने से कोई बाधक नहीं है (शंका) कौन श्रुतियां आत्मानन्द के आविर्भाव को मोक्षस्वरूप कहे हैं (समाधान) जब निराकार के भक्तो का देहत्याग होता है तो प्रमात्मा में एकताको प्राप्त होजाते हैं यह श्रुति है।

प्रयोगदौर्लभ्यापत्तिः। दुःखकारणे सूत्रादिस्थूलबन्धने प्र-
युक्तोबन्धशब्दस्तत्कार्य्ये दुःखेपि प्रयोक्ष्यते पयसि गो-
शब्दप्रयोगवदिति चेत्। प्रकृतेपि तर्हि। निर्दुःखत्वस्यात्मानं-
दाविनाभावादात्मानन्दाविर्भावे मोक्षशब्दप्रयोगस्य निर्बा
धत्वात् स्वस्थतायां नीरोगशब्दप्रयोगवत्समाधिः समान
एवेत्यवेहि। कास्तास्तदाविर्भावस्य मोक्षभावमभिदधानाः
श्रुतयः श्रूयन्ते यासां बलादिदं श्रद्दधीमहीतिचेदिमास्ताः
'गताः कलाः पञ्चदशप्रतिष्ठा' इत्यारभ्य परेऽव्यये सर्वएकी

---

लब्ध्वा बन्धनमेवोपश्नयते ' इत्यादिश्रवणात् ' पशुरज्जुस्तुबन्धनी ' इत्यादि कोशाच्च बन्धबन्धने इति धातुः सूत्रादिबन्धनेपि प्रवर्त्ततेइत्यभिमानः। अतएव प्रायइत्युक्तम् निगड़बन्धः सेतुबन्धो मयूरबन्ध इत्यादि प्रयोगात्प्रायिकत्वमिति बोध्यम्। ननु गोभिः श्रीणीतमत्सरमित्यादौ यथागोशब्दस्य तज्जन्यपयसि लक्षणा तथात्रापि लक्षणास्त्वित्याशङ्कते दुःखकारणइत्यादिना। समानतयैव समाधत्ते प्रकृतेऽपि तर्हीति आत्मानंदाविर्भावे हि निर्दुःखत्वमवश्यमाभिव्यज्यते स्वस्थताविर्भावे नीरोगत्वमिव ततोनीरोगशब्दस्य स्वस्थतायां प्रयोगवन्मोक्ष-शब्दस्यात्मानंदाविर्भावे प्रयोगोनिर्बाध इति समानमेव समाधानं किमत्रावशिष्टं प्रष्टव्यं यत्पृच्छसीत्याह निर्दुःखत्वस्येत्यादिसमानएवेत्यवेहीत्यन्तेन एतदभि-प्रेत्यैव प्रागभिहितं भाष्ये न हि तदाविर्भावे दुःखदैन्यदारिद्र्यादीनां मना-गप्याविर्भावोभवितेति। यथा ह्यौषधाद्यभ्यासेन स्वरूपभूता स्वस्थताऽभिव्य-ज्यते तथा निराकारभक्त्यभ्यासेन स्वरूपभूता मुक्तिरभिव्यज्यते इति दृष्टा-न्तस्य परमतात्पर्य्यं बोध्यम्। नित्यनिरतिशयात्मस्वरूपसुखाविर्भावोमुक्तिरिति मते गौणतया दुःखनिवृत्तिरप्यभिमतैव परन्तु नित्यसुखात्माविर्भावोमोक्षोन प्रमाणपद्धतिमध्यास्ते श्रुतयस्तत्र प्रमाणमितिचेत्कास्ताः श्रुतय इति पृच्छति कास्ता इति। गताः कला इति। तृतीयमुण्डकस्य द्वितीयखण्डे श्रूयते ' गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वएकीभवन्ती ' ति। अस्यार्थः अविद्याशोकदुःखसंसार-बन्धनिवृत्त्यात्मकाविर्भावमेव मोक्षमिच्छन्ति ब्रह्मविदो न तु ततः पृथक् दुःख-निवृत्तिं कार्य्यत्वेन विनाशित्वादित्याह मन्त्रः गता इति मोक्षकाले या देहा-रम्भिकाः कलाः प्राणाद्यास्ताः प्रतिष्ठाः स्वानि कारणानि गताभवन्ति प्रतिष्ठा

भवन्ती'त्यन्ताः। 'सोविद्याग्रंथि विकरतीह सौम्य'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरइति। यथा नद्यः स्यन्दमाना इत्याद-

---

इति द्वितीया वहुवचनान्तम् पञ्चदश—पञ्चदशसंख्याकाः प्रश्नोपिनिषादि षष्ठ प्रश्नउक्तास्तायथा 'कलाः षोडश भूतानि प्राणोक्षं जन्म कर्म च श्रद्धा यज्ञास्तपोमन्त्रामनोमात्रं शरीरक' मिति षोडशं शरीरं तु पतितं तिष्ठति। देवाश्चक्षुरादिकरणान्यधिष्ठातारः प्रतिदेवताह्यादित्यादयस्तेषु गता भवन्ति। कर्माण्यप्रवृत्तफलानि विज्ञानमयश्चात्मा विद्याकृतवुद्ध्याद्युपाधिमात्मत्वेन मत्वाजलादिषु सूर्य्यादिप्रतिविम्ववदिहप्रविष्टोदेहभेदेषु कर्मणां तत्फलार्थत्वादतोविज्ञानमयोविज्ञानप्रायआत्मातिष्ठतउपाध्यपनये सति सर्वे परेऽव्यये ब्रह्मण्येकी भवन्त्यविशेषत्वमापद्यन्ते जलाद्याधारापनयइव सूर्य्यादिप्रतिविम्बाः सूर्य्यादौ घटाद्यपनयइवाकाशोमहाकाशे। मोक्षकालेपि स्वस्वरूपाविर्भावातिरिक्तदुःखनिवृत्तौ नैकीभवन्तीतिभावः। विदेहमुक्तिविषयं मंत्रमुदाहृत्य जीवन्मुक्तिविषयमप्युदाहरति—सोविद्याग्रन्थिमिति। द्वितीयमुण्डकस्य प्रथमे खण्डे श्रूयते 'एतद्योवेद निहितं गुहायां सोविद्याग्रन्थि विकिरतीह सौम्य'इति अस्यार्थः एतद् प्रकृतं ब्रह्म। गुहायाम्—सर्वप्राणिहृदिस्थितमपि आविर्भूतत्वेन योवेद सोऽविद्याग्रन्थिमज्ञानवासनामब्रह्मत्वं वा विकिरति नाशयतीह जीवन्नेव न मृतः सन् हे सौम्य प्रियदर्शन अत्रापि अविद्याग्रन्थिनाशस्य गौणत्वमितिभावइति मन्तव्यम्। सामान्यतउभयाविषयं मन्त्रं पठति'भिद्यतेइति'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति द्वितीयमुण्डकस्य द्वितीय खण्डे आम्नायते। अविद्यावासनाप्रचयोवुद्ध्याश्रयः कामोहृदयग्रंथिः 'कामायेस्य हृदिश्रिता' इतिश्रुत्यन्तरात् हृदयाश्रयोसौ नात्माश्रयः भिद्यते भेदं विनाशमायाति अब्रह्मत्वं वा हृदयग्रन्थिः छिद्यन्ते सर्वे ज्ञेयभजनीयविषयाः संशयाः लौकिकानामामरणात् गंगास्रोतोवत्प्रवृत्ता विच्छेदमायान्ति अस्य च छिन्नसंशयस्य निवृत्ताविद्यस्य यानिज्ञानोत्पत्तेः प्राक्तनानि जन्मान्तरे चाप्रवृत्तफलानि ज्ञानोत्पत्तिसहभावीनि च क्षीयन्ते कर्माणि न त्वेतज्जन्मारम्भकाणि वृत्तफलत्वात्तस्मिन् सर्वज्ञेऽसंसारिणि परावरे परत्वेनाभिमतायेहिरण्यगर्भादयस्तेऽवराअधमा यस्मात् तस्मिन् कारणकार्यात्मके वा दृष्टे आविर्भूते सतीत्यर्थः॥ सिंहावलोकनेन पुनरपि विदेहमुक्तिविषयं मन्त्रं पठति—यथानद्यइति 'यथानद्यः

यश्चतास्तासु हि स्पष्टमविद्याग्रन्थिभेदेन निराकारस्वरूपाविर्भावोमोक्षइत्यभिलप्यते तस्मात् सिद्धमेतन्निखिलदुःखनिवृत्त्युपरक्तनिराकारचिदानन्दाविर्भावोमोक्षइति॥५॥
कथमाविर्भावोनिराकारचिदात्मनोभवेद्भववासनानान्त--दाच्छादिकानां दीर्घकालंनिविड़ानां विद्यमानत्वादपरथा सर्वत्र तथाप्रसंगाद्बन्धो न केनाप्यनुभूयेत तस्माद्वाच्यं तदाविर्भावासाधारणं कारणम्। ततः प्राह परमर्षिः––

---

स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमि'ति तृतीयमुण्डकद्वितीयखण्डे श्रूयते यथा नद्योगङ्गादयः स्यन्दमानाः गच्छन्त्यः समुद्रे प्राप्यास्तमदर्शनमविशेषात्मभावं गच्छन्ति प्राप्नुवन्ति नाम च रूपं च नामरूपे विहाय हित्वा तथाऽविद्याकृतनामरूपाद्विमुक्तः सन्विद्वान्परादक्षरात् पूर्वोक्तात्परं दिव्यं पुरुषं यथोक्तलक्षणमुपैति उपगच्छति आविर्भावयतीति यावदित्यर्थः। विशकलितक्रमेण श्रुत्युदाहरणेतु भाष्यकारस्य रुचिरेवनिमित्तमितिध्येयम्। 'यमेवैष वृणुते तेन लभ्यस्तस्यैषआत्मा विवृणुते तनुं स्वामित्यादयआदिपदेनसंग्राह्याः। विवृणुतेस्वकीयमानन्दस्वरूपमाविर्भावयतीत्यर्थः मोक्षलक्षणसूत्रमुपसंहरति तस्मादिति। दुःखनिवृत्त्युपरक्तेति। दुःखनिवृत्त्युपलक्षितेत्यर्थः॥ ५॥ निराकारविषया पञ्चसूत्री समाप्ता। हेतुहेतुमद्भावसंगत्या आक्षेपपूर्वकं षष्ठं सूत्रमवतारयति कथमाविर्भावइत्यादिना। निराकारचिदात्मनआविर्भावोहि कथं भवेत् न कथमपीत्यन्वयार्थःप्रश्ने वा किंशब्दः। तदाच्छादिकानामिति। आविर्भावप्रतिबन्धिकानामित्यर्थः। यदातच्छब्देन निराकारचिदात्मनएवानुषङ्गस्तदा यथाश्रुतएवार्थइति बोध्यम्। अपरथा वासनासद्भावकालेपि स्वस्वरूपाविर्भावस्वीकारे तु सर्वत्र–सर्वस्मिन्काले सर्वेषु पुरुषेषु वा। तथाप्रसंगात्–स्वस्वरूपाविर्भावप्रसक्तेः। बन्धोन केनाप्यनुभूयेत।–वासनानामाच्छादकत्वमेव न सिध्येदितिभावः। मोक्षशास्त्रस्य वैयर्थ्यं च स्यात्तस्मात् वासनानिवृत्तिद्वारा स्वस्वरूपाविर्भावस्यासाधारणं कारणं किंचिद्वक्तव्यमितिप्रश्नार्थः। वाजसनेयिशाखायाम् ' तस्मा देवं विच्छान्तोदान्तउपरतस्तितिक्षुः, श्रद्धावित्तोभूत्वात्मन्येवात्मानं पश्येत्सर्वमेनं पश्यति सर्वस्यात्माभवति सर्वपाप्मानं तर-

# सू० तदभिव्यञ्जिका भक्तिः ॥६॥

तस्याभिव्यञ्जिका सा तथा तस्य मोक्षस्य भक्तिरभि-

---

ति नैनं पाप्मा तरति ' इत्याद्युक्त्वान्ते पठ्यते ' यएवं वेदे ' त्यादिश्रवणात् पापतरणादिद्वारा ब्रह्मज्ञानस्य मुक्तिसाधनत्वं प्रतीयते आथर्वणोपनिषदादिषु तु भगवद्भक्तेर्हेतुत्वपरंवचोभवति ' ब्रह्मैतत्त्योधारयतीत्युपक्रम्य 'भजतिसोऽमृतोभवतीतिअग्रेपि ' मुक्तोभवतिसंसृते ' रितिभक्तेर्मुक्तिहेतुत्वं प्रतिपादितम् । तत्र च संदेहः किं ज्ञानं मुक्तेः कारणमाहोस्विद्भक्तिः आहोस्वित्क्रमेणेत्यादिः तत्र पूर्वपक्षः ' ऋते ज्ञानान्नमुक्तिः ' । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । ज्ञानादेव तु कैवल्यमि ' त्यादिश्रुतौ सावधारणात् ज्ञानमेव मुक्तिसाधनमिति प्राप्ते सूत्रकारः सिद्धान्तयति तदभिव्यञ्जिकाभक्तिरिति ' यमेवैषवृणुतेतेन लभ्यः । ब्रह्मसंस्थोमृतत्वमेति ' इत्यादिश्रुत्या भक्तेरेव मुक्तिसाधनत्वं प्रत्याय्यते न चैवमात्मज्ञानं व्यर्थं स्यादितिवाच्यम् मतिमालिन्यमर्दनेन भक्तावुपयोगित्वेन सार्थक्यादित्याद्युपरिष्टाद्वक्ष्यामः । समाधास्यते च सूत्रकारभाष्यकाराभ्यामितिसंक्षेपः श्रुतावेवकारोऽयोगव्यच्छेदार्थोप्यर्थेकोवेतिबोध्यमित्यभिप्रेत्य तदुत्तरत्वेन सूत्रं गृह्णाति–ततः प्राह परमर्षिरिति ' विद्याविदग्धमतयोहि ऋषय' इतिबालपण्डितः ते च सप्तविधाः महर्षिदेवर्षिब्रह्मर्षिपरमर्षयः काण्डर्षिश्च श्रुतर्षिश्च क्रमवरा ' इतिरत्नकोषइति मुकटः । तत्र परमं सर्वोत्कर्षमृषतीति परमर्षिः ' ऋषति परमं यस्मात् परमर्षिस्ततः स्मृतः '

---

की अविद्या ग्रंथी नष्ट होवे है, निराकार भक्ति से हृदयगंथि और सर्वकर्म नष्ट निराकारभक्त होवे हैं जैसे नदीयां समुद्र में मिलती हैं वैसे विदेहमुक्त आनन्दरूपब्रह्म में लीन होवे है इत्यादि श्रुतियों में अविद्या की निवृत्ति होकर निराकारानन्दरूपब्रह्म की प्राप्ति कथन की है सो ही मुक्ति है ॥५॥ अनादि विषयबासना के प्रबल होने से मुक्ति दुर्लभ है इस प्रश्न का उत्तर देने वास्ते सूत्र कहे हैं ( **तदभिव्यञ्जिकाभक्तिः ॥ ६ ॥** ) तिसमुक्ति को प्राप्त करनेवाली भक्ति है सो भक्ति विषयवासना को दग्ध करे है भक्ति मुक्ति का कारण है यहमत नहीं मान सकते जो वैसा होवे तो मुक्ति अनित्य होवेगी तब विषयभोग औरमोक्ष की विशेषता नहीं सिद्ध होवेगी.

व्यञ्जिका समुद्बोधिका न तूत्पादिका मोक्षस्यानित्यत्व-प्रसङ्गेन विषयवैतृष्ण्यासिद्धेः । कोहि तदा विशेषोभोग-मोक्षयोरभिमतोभवेत् न चाधिकन्यूनसमयभेदेन सः । विषयेष्वप्येवं भावात् तस्माद्भक्तिः समुद्बोधिकैव मुक्तेः ।

---

इतिमात्स्योक्तेः । ' परं हि ऋषते यस्मात्परमर्षिस्ततः स्मृतः इतिवायुपुराणाच्च ऋषगतौ अस्मात् ' इगुपधात्किदि 'तीनितिबोध्यम् ' कार्य्येणकारणमनुमीयते ' इति न्यायेन सः स्वरूपाविर्भावोऽभिव्यञ्जकोयस्याइति बहुव्रीह्यनुमितकारणतां विहाय शास्त्रप्रमाणकत्वप्रदर्शनाय षष्ठीसमासेन सूत्रं व्याचष्टे तस्याभिव्याञ्जि-कासेति ' सामान्यतउक्त्वा विशेषतोप्याह तस्य मोक्षस्येति । भक्तिर्वक्ष्यमाण-लक्षणा । ननु आविर्भावस्योत्पादोपि आविर्भावएव सएवाभिव्यक्तिपदेनयद्य-भिलप्यते तदा न तूत्पादिकाइत्यादिभाष्यग्रन्थस्यासंगतिः पौनरुक्त्यं च स्या-दितिचेदत्रोच्यते आविर्भावसत्त्वस्य आपादिकाउत्पत्तिः । आविर्भावासत्वस्य निवर्त्तिकाऽभिव्यक्तिरितिविवेकइतिनग्रंथासंगतिर्नापिपौनरुक्त्यम् एतेनाविर्भा-वस्याविर्भावस्वीकारेऽनवस्थादयोदोषाअपि प्रत्युक्तावेदितव्याइत्याशयेनाहनतू-त्पादिकेति अनवस्थादोषमगणय्यैव दोषान्तरमाह विषयवैतृष्ण्यासिद्धेरिति मो-क्षस्यानित्यत्वे तदर्थं वैराग्यादौ कस्यापि प्रवृत्तिर्नस्यादितिभावः । प्रवृत्तेर्मूलवि-शेषाभावमेवोपपादयति कोहीत्यादिना कोहि न कोपीत्यर्थः तदेतस्यमोक्षस्या-नित्यत्वप्रसङ्गेइत्यर्थः । ननुचायमस्तिविशेषोयन्मोक्षसुखस्य बहुकालमनुभवोभ-वेत् विषयसुखस्य त्वभिलषितविषयस्य प्रथमसन्निधावेवेत्याशङ्क्य "अपामसो-ममृताअभूम " इत्यादिश्रवणात् विषयसुखस्यापि सापेक्षिकाल्पपटुकालस्था-यित्वेन तुल्यत्वान्नैवमित्याह न चेति तुल्यत्वेन समाधत्ते विषयेष्वप्येवंभावा-दिति । " न स पुनरावर्त्तते । यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेत्यादिश्रु-तिस्मृतिभ्यां मोक्षस्य नित्यत्वाभ्युपगमात् भक्तिरुद्बोधिकैव नतूत्पादिकेत्युपसं-

---

अधिकन्यूनसमय के भेद होने से भी भेद नही होवेहै वैसा भेद तो विषयों में भी है इसवास्ते मुक्ति को नित्य मानना उचित है जो पुरुष विषयों के भक्त हैं सो जन्मज-रामरणआदि संसार को प्राप्त होवे हैं और जो पुरुष विषयों से विरक्त चित्त हैं सो भक्ति के प्रभाव से निर्वाण आनन्द मोक्ष को प्राप्तहोवे है जैसे राजा भक्ति से प्रसन्न हो पुरुषों के बन्धन दूर करे है वैसे भक्ति से परमात्मा भी प्रसन्न होकर इसजीव के बन्धन को निवृत्त करे है निराकारपरब्रह्म का भक्त मोक्ष को प्राप्तहोवे है उस मोक्ष के स्वरूपको भक्ति ही अभिव्यक्त करेहै भक्तिविना अन्यकोई हेतु मोक्षमें नहींहै।६।

विषयभक्त्या हि भ्रान्ता भ्राम्यन्ति भवेऽभक्ताश्चिदात्मनः। चिदात्मभक्त्या च विषयेष्वलंभावनाभाजोजनाजन्मजरामरणवेदनावेदनाद्विषयविषमातिविरक्ताश्चिदानंदासक्तचेतसोभक्तानिराकाराचिदात्मनोलभन्ते निर्वाणानन्दममलममलमतयोमुनीन्द्राइतितत्त्वम्। अत्र चैवंदर्शनं भक्तिदृशाम्"यथादृष्ट्याप्रसन्नः सन् राजा बन्धापनोदकृत्। एवं दृष्टः स भगवान् कुर्याद्बन्धविमोचनमि"ति। श्रुतिश्च भक्तेर्मोक्षं ख्यापयन्ती भवति भक्ति-

---

हराति तस्मादिति। विषयतत्साधनान्यतरस्योभयस्य वा सेवनेन भ्रान्ता विपरीतज्ञानवन्तः अभक्ताः चिदात्मभक्तिबहिर्मुखा भवे संसारे भ्राम्यन्ति जन्ममरणादिपीडामुनभवन्तीत्यर्थः व्यतिरेकमुक्त्वा प्रकृतोपयोग्यन्वयमाह चिदात्मभक्त्येत्यादिना। अमलमतयोमुनीन्द्राभक्ताजनाः चिदात्मभक्त्या निर्वाणानंदममलं लभन्ते इत्यन्वयः चिदात्मभक्त्येत्यारभ्य मुनीन्द्राइत्यस्यैव विशेषणानि मन्तव्यानि। विषयेष्वलंभावनाभाजइति विषयेषु निवृत्तवासनाका इत्यर्थः अभाजइति वा छेदः। जन्मजरामरणवेदनानामावेदनाद्धेतोर्विषयाये शब्दादयस्तेषु विषवन्मतिर्या तया विरक्ताः चिदात्मनि मग्नचिताः निराकारचिदात्मनोभक्ताः॥ निर्वाणानन्दमिति वाणा दुःखदवासनाः तदस्पृष्टमानन्दमित्यर्थः निर्वाणमुक्तिं लभन्तेइतिभावः अथवा क्तप्रत्ययान्तोल्युट्प्रत्ययान्तोवा निर्वाणशब्दः तत्र क्तप्रत्ययान्ते 'निर्वाणोऽवाते' इतिसूत्रेण णत्वमितिबोध्यम्। निराकारचिदात्मस्वरूपभूतनिर्वाणानन्दात्मकमोक्षस्याभिव्यञ्जिकां भक्तिमुपपाद्य बन्धापनोदिकां सगुणभक्तिं व्युत्पादयति अत्र चैवमित्यादिना किंच 'सर्वस्य वशी सर्वस्येशान' इति 'सवा एष महानजआत्मान्नादो वसुदान' इत्यादिश्रुतेः 'फलमतउपपत्ते' रितिसूत्राच्च भगवानेव स्वतन्त्रत्वाच्छुभाशुभफलप्रदातेत्यत्र शास्त्रकाराणां संवादमप्याह एवं दर्शनं भक्तिदृशामिति शास्त्रं पठति यथेतिभक्तेर्मोक्षाभिव्यञ्जिकात्वे श्रुतिं प्रमाणयन्नाह श्रुतिश्चेति श्रुतिं पठति भक्तियोगोनिरुपद्रवइत्यादि। प्रत्येकमेकत्वं श्रुतीनां बोध्यम् निरुपद्रवोऽनायाससाध्यः। ब्रह्मसंस्थोऽभेदभक्त्या ब्रह्मनिष्ठः। निष्कलमितितृतीयमुण्डकप्रथमखण्डे श्रूयते 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान' इति 'निर्मलज्ञानेन क्षालिताश्रद्धादिमतिमालिन्यः पुमान् पश्चाद्भजनं कुर्वाणो-

योगोनिरुपद्रवोभक्तियोगान्मुक्तिरिति महानारायणोपनिषदि ब्रह्मसंस्थोऽमृतत्वमेतीति छान्दोग्योपनिषदि च"निष्कलं ध्यायमान"इत्यन्ता च मुण्डकोपनिषदि तदस्य भक्तिमनुतिष्ठतोऽवश्यमुपतिष्ठते मोक्षइतिसिद्धम् । तदभिव्यञ्जने भगवतोभक्तिरेवैका विजयतेजगती-

---

हि तं निष्कलं निरवयवं निराकारमात्मानं पश्यते उपलभतेइत्यर्थः । मुख्यलागरूपक्रियापेक्षया भक्तिरूपध्यानस्य पूर्वत्वम् ततः पदोपादानात् ज्ञानप्रसादापेक्षया चोत्तरत्वमिति ज्ञानापेक्षया भक्तेः प्राधान्यं मोक्षाख्यापनं च सिद्धमितिमन्तव्यम् ननु पश्यते इत्यस्य लभते इत्यर्थः कथं दृशधातोर्ज्ञानार्थकत्वादिति चेत् सत्यम् त्वदीयभाष्यकारैःश्रीशङ्कराचार्य्यैस्तथैव व्याख्यानात् व्यत्ययात्मने पददर्शनाच्चैतावतैव सन्तोष्टव्यं तत्र श्रद्धाजडेनायुष्मता धातूनामनेकार्थत्वं तु सर्वत्र सर्वैर्घुष्टमेवेतिकिमन्यदपेक्ष्यतेइतिबोध्यम् । " यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामि ' ति 'श्रद्धाभक्तिध्यानयोगादवेहि ,इति मुण्डककैवल्यादिश्रुतेः 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ' नाहं वेदैरित्युपक्रम्य भक्त्या त्वनन्यया शक्य ' इत्यादिस्मृतेः ' भक्त्याहमेकया ग्राह्यः भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् । प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनमित्यादिपुराणस्य च श्रुतिश्चेति चकारेण संग्रह इतिबोध्यम् । मोक्षहेतुमुपसंहरति तदिति तस्मादित्यर्थः ' यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि । सर्वं मद्भक्तियोगेन मद्भक्तोलभते ञ्जसा । स्वर्गापवर्गमद्धाम कथं चिद् यदि वाञ्छती,त्याद्युक्तेः भक्तिमनुतिष्ठतोवश्यं मोक्षोभवतीत्याह भक्तिमिति अञ्जसा अवश्यमित्यर्थः । दिगिति ।

---

ऐसा मानोगे तो वेदके साथ विरोध होवेगा वेद में आत्मा के ज्ञान से मोक्ष कहा है इसवास्ते भक्ति से मोक्षमानना वेदविरुद्ध है इस प्रश्न का समाधान सूत्र से करें हैं (सू० नचज्ञानात्तदवस्थाविशेषत्वात् ॥७॥ ) ज्ञानभक्ति की परिपक्व अन्त अवस्था का नाम है ज्ञान से मुक्ति वादि ने कहना चाहीये ज्ञानमात्र से वा आत्मज्ञान से मोक्ष मानते हो तो घटादिज्ञान से भी मुक्ति होनी चाहिये सर्व पुरुषों को अवश्य ही पदार्थमात्र का ज्ञान होवे है इसवास्ते सर्व की ही मुक्ति होनी चाहिये तुम भी नित्यमुक्ति हो वृथाविवाद करना अनुचित है । ( प्रश्न ) हम ज्ञानमात्र से मोक्ष नहीं कहते किन्तु जीवात्मा की परमात्मा के साथ एकताज्ञान से मोक्ष कहते हैं ॥

तिदिक् ॥ ६ ॥ अथैवं सति वेदविरोधोवज्रलेपायते तथाहि 'तमेव विदित्वाऽतिमृत्युमेति'। ज्ञानादेवतु कैवल्यमि' त्यादिवेदविचारणादात्मज्ञानान्मोक्षोमुमुक्षुभिरिष्यते तत्कथमपूर्वमिव मन्यामहेवेदोपरुद्धं भक्तेर्मोक्षमितिचेत्तत्रोच्यतइत्याह—

## सू० न च ज्ञानात्तदवस्था-विशेषत्वात् ॥ ७ ॥

---

दिगर्थः सविस्तरं वक्ष्यते ॥ ६ ॥ आक्षेपेण सूत्रमवतारयति अथैवमित्यादिना लेपः सम्बन्धः 'ऋते ज्ञानान्नमुक्ति' रित्यादेरादिपदेन संग्रहः। आत्मज्ञानात्। आत्मज्ञानादेव। इष्यते—निश्चीयते। अपूर्वमिव-। असंगतमिव। चेदिति—इत्याशंक्य सूत्रकारेणैव समाधानमुच्यतेइत्यर्थः। इत्याह—शङ्कासमाधानप्रतिपादकं 'न च ज्ञानादित्यादिसूत्रमाह सूत्रकारइतिशेषः। न चेत्यत्र चकारो विकल्पार्थकः अतस्तथैव सूत्रं व्याख्याति—ज्ञानादात्मज्ञानमात्राद्वेति आत्मज्ञानादित्युक्तेः यस्य कस्यापि ज्ञानादपि मोक्षप्रसंगस्तदाभक्त्या किमपराद्धं स्यादित्यतआत्मज्ञानमात्राद्वेत्युक्तम्। मात्रपदेन भक्तिर्व्यावर्त्यते 'ज्ञानादेव तु कैवल्य' मित्यादिश्रुतावेवकारादेः स्वारस्यादितिभावः॥ ज्ञानादात्मज्ञानमात्राद्वा न मोक्षोभवति किन्तु भक्तेरेव भवति इति प्रतिज्ञायां हेतुमाह ज्ञानस्य भक्त्यन्तिमावस्थारूपत्वादिति अत्र भक्तिपदेन साधनरूपाभक्तिर्विवक्षिता अत्रोपसंहारभाष्यस्वारस्यादितिमन्तव्यम्। यद्वा ज्ञानस्य या अन्तिमावस्था सैव भक्तिरित्युच्यते तथाहि भक्तेर्या अन्तिमावस्था तां रूपयति निरूपयति भक्त्यन्तिमावस्थारूपम् रूपधातोः कर्मण्यणितिकर्तर्यण्प्रत्ययः प्राक्स्थितं हिज्ञानम् उत्तरां भक्तिं निरूपयतीत्यर्थः। यद्वा प्रशस्ता अन्तिमावस्था अन्तिमावस्थारूपा—प्रशंसायां रूपप् प्रत्ययः भक्तिः अन्तिमावस्थारूपा यस्य ज्ञानस्य तत् तत्त्वमिति। यद्वा उत्तरस्थोरूपशब्दः सादृश्यं वक्ति यथा पितृरूपस्तनयः पितृसदृशइति गम्यते तथात्रापि भक्त्यन्तिमावस्थासदृशमेव ज्ञानं न तु भक्तेरन्तिमावस्थास्वरूपमित्यर्थः। पक्षत्रयेपि भक्तेरेव प्राधान्यं पूर्वं ज्ञानं संचरति पश्चात् ज्ञानकृतस्वच्छान्तःकरणे भक्तिः संचरति ततोमोक्षइतिक्रम इति

ज्ञानादात्मज्ञानमात्राद्वा मोक्षश्चेन्न ज्ञानस्यभक्त्यन्तिमावस्थारूपत्वात् । तथाहि मोक्षनिदानं ज्ञानमभिमन्य मानेन भवता व्यक्तं वक्तव्यं तदात्मैकतानतात्मकमन्यथा वा अन्यथाचेन्न तन्मोक्षावहमन्यज्ञानादन्यत्रबन्धविधूननस्यादृष्टचरत्वात् कथमन्यथा कथय कटवटादिविज्ञानान्न मुच्यन्ते नरास्संसृतेस्तथा सति चेतनमात्रेज्ञानस्यावर्जनीयतया बन्धविकलं सकलं जगत् स्यादितिनित्यमुक्तोभवानपि वृथाविवदते जगतएव निर्बन्धत्वात् । अथनब्रूमोवयं विज्ञानमात्रान्मोक्षमपि तु स्वात्मनापरात्मैकतानताविज्ञानादभिदध्महे मोक्षमिति चेत्सत्यम् नैवमभिधीयमानमपि भवति क्षमं मोक्षाविर्भावे ज्ञानं यतोनिरुपाधिशुद्धेचिद्धातोर्भवतापि विज्ञानविषयत्वानङ्गीकारः ॥ अविज्ञातं विजानतामितिश्रुतिनिरूपणानुपप्लवादपरथा तन्निरूपणोपप्लवस्य भवतैवा-

---

बोध्यम्॥सूत्रेपि भक्तेरिति शेषः कार्यः ननु न ह्येतावता ज्ञानस्य मोक्षाहेतुत्वमायातीत्यतोभक्तेर्हेतुत्वं परिशेषयन् ज्ञानस्य स्वतन्त्रमोक्षहेतुत्वं खण्डयति तथाहीत्यादिना यदप्युक्तं मोक्षकारणं ज्ञानमेव तत्किमात्मज्ञानं यस्य कस्य वा ज्ञानमिति विकल्प्यद्वितीयं तावद् दूषयति अन्यथेत्यादिना कटवटादीत्यादिना घटपटादेः संग्रहः तथासति—यस्य कस्य ज्ञानान्मोक्षस्वीकारेसति । निर्बन्धत्वात्—बन्धशून्यत्वात् प्रथमविकल्पं शङ्कतेऽथेत्यादिना। आत्मविज्ञानमपि किं निरुपाधिकात्मज्ञानं सोपाधिकात्मज्ञानं वेति विकल्प्य यथाक्रमं दूषयति नैवमित्यादिना। यतोवाचोनिवर्त्तन्तेऽप्राप्य मनसा सह' यन् मनसा न मनुते येनाहुर्मनोमतमि'त्यादिश्रुतेर्निरुपाधिकस्याविषयत्वमेव 'दृश्यते त्वग्र्यया बुद्ध्ये'त्यादिश्रुतेस्तु विशिष्टस्यविषयत्वमित्याहुरित्यन्यत्र विस्तरइतिभावः॥अविज्ञातमिति तलवकारोपनिषदिश्रूयतेइतिबोध्यम्। श्रुतिनिरूपणानुपप्लवादिति-श्रुत्यभिप्रेतार्थस्य संरक्षणादित्यर्थः । अपरथा-शुद्धचिद्धातोर्विषयत्वस्वीकारे श्रुतिविप्लावने त्वमेव

भिधानात् सोपाधिकस्य तस्यास्ति यद्यपि तद्विषयत्वं तथापि न तद्विज्ञानान्मोक्षोभिमतोभवतोपि किमपराद्धं तथासति विज्ञानमात्रेण सर्वत्रविज्ञानेषु ब्रह्मणस्सन्मात्रस्य स्फुरणस्य भवतैवाभ्युपगमादिति गतं ब्रह्मविज्ञानकथया निरर्थिकया कथय तत्साधनवेदान्तश्रवणादिकथायाश्चार्थमित्यनर्थकं मामावोचोवचः सोपाधिकविज्ञानान् मोक्षइति । अथनिरुपाधिकमेव ज्ञानविषयमभ्युपेमइति चेन्न ॥ श्रुतिशतपीडनाप्रसङ्गात् स्वसिद्धान्त-

---

निमित्तं स्याइत्यर्थः द्वितीयमाशंक्य दूषयति सोपाधिकस्य तस्यास्ति यद्यपीति'सर्वत्र विज्ञानेषु घटः सन् पटः सन्नित्यादिप्रतीतिषु। सिंहावलोकनन्यायेन पुनरपि निरुपाधिकपक्षमाशंक्य दूषयति अथ निरुपाधिकमेवेत्यादिना। श्रुतिशतपीडनाप्रसंगादिति'यतोवाचोनिवर्त्तन्ते'इत्यादिपूर्वोक्तश्रुतिशतस्य संकोचनप्रसंगादित्यर्थः नन्वस्तु श्रुतिशतपीडनप्रसंगइत्यतआह स्वसिद्धान्तविरोधाच्चेति—'शुद्धं हि ब्रह्म नदृश्यं ' यत्तदद्रेश्यमितिश्रुतेः किन्तूपहितमेव तच्च मिथ्यैव न हि क्वचिदशायामनुपहितं तद्भवतीत्यादि स्वसिद्धान्तग्रन्थविरोधाच्चेत्यर्थः। न च मनसैवानुवेदितव्यम् दृश्यते त्वग्र्यया बुद्ध्या—सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थित ' इत्यादिवचनैर्विरोधइतिवाच्यम् तेषामप्युपहितपरत्वात् न चैवं सति निराकारसिद्धिर्न स्यादितिवाच्यम् स्वतएव तस्य स्वप्रकाशत्वेन सिद्धत्वात् नन्वज्ञाते धर्मिणि कस्य चिद्धर्मस्य विधातुं निषेद्धुं चाशक्यत्वेन शुद्धे निराकारे दृश्यत्वं निषेधता शुद्धस्य ज्ञेयत्वमवश्यं स्वीकरणीयम् न च स्वप्रकाशत्वेन स्वतःसिद्धे

---

(उत्तर)उपाधिरहत शुद्धचेतन को तौ तुम भी ज्ञान का विषय मानते हो और सोपाधिकब्रह्म के ज्ञान से मोक्षमानो तौ घटादिज्ञान से मुक्ति पुनःहोवे है पटघटादि सर्वपदार्थों के ज्ञान में सत्तामात्रब्रह्म का स्फुरण होवे है जवघटादि ज्ञान से मोक्षमानो तौ वेदान्तश्रवण से ब्रह्मज्ञान होवे है उस से मोक्षहोवे है यहकथन तुमारा व्यर्थहोवेगा गुरु शास्त्र का उपदेश व्यर्थहोवेगा। ( प्रश्न ) तुम मुक्ति से मोक्षमानते हो सो तुमारे मत में कैसे निर्दोषता है। सो कथनकरो। (उत्तर) सावधानचित्तहोकर सुनो कहतेहैं—

विरोधाच्चेति संक्षेपः। कथं तर्हि तव भक्तिपक्षे पूर्वाविहितदोषविमोक्षइतिचेच्छृणु 'ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इत्यादिश्रुतिशतावलोकनया निष्कले निरुपाधिके निर्मले निराकारे

---

निरुपाधिके श्रुत्या दृश्यत्वनिषेधइति वाच्यम् शुद्धं स्वप्रकाशमितिशब्दजन्यविशिष्टवृत्तौ शुद्धाप्रकाशे तस्य स्वप्रकाशत्वासिद्धेरितिचेन्न निरुपाधिकस्य ज्ञानविषयत्वस्वीकारे ज्ञानकाले वृत्तिरूपेण धर्मेण शुद्धत्वासंभवात् निरुपाधिकस्य ज्ञानविषयत्वं न संभवति अतोनिरुपाधिकं स्वप्रकाशमितिवाक्यस्य लक्षणया सोपाधिकत्वमस्वप्रकाशत्वव्यापकमित्यर्थः । तथा च सोपाधिकत्वव्यावृत्त्या निरुपाधिके स्वप्रकाशता पर्य्यवस्यति एवं च निरुपाधिके ज्ञानविषयत्वं नसंभवतीत्याद्यभिप्रेत्याह इतिसंक्षेपइति निरुपाधिके ज्ञानविषयत्वस्य संक्षेपेण क्षेपणं खण्डनमित्येतदितिभावः । ननु किं यस्य कस्यापि भक्तिर्मोक्षहेतुराहोस्विदात्मभक्तिः तत्रापि किं निरुपाधिकात्मनः सोपाधिकात्मनोवा सर्वत्र च पूर्वोक्तदूषणप्रसंगस्तवापि समानः स्यादित्याशंक्य ज्ञानसत्वोत्कर्षेण भक्तेः सर्वत्रापि सुलभत्वान् मैवमित्याह कथं तर्हीत्यादिना । प्रतिज्ञातेर्थे स्वकपोलकल्पितत्वं वारयन् श्रुतिं तावत्तत्र प्रमाणयति ज्ञानप्रसादेनेत्यादि अर्थस्तूक्तएव पूर्वत्रेति बोध्यम् अयंभावः ' मनोहि द्विविधं प्रोक्तं कारणं बन्धमोक्षयोः । बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतामि ' तिश्रुतेर्निर्मलमेव मनः मोक्षकाणं मलं च रागद्वेषादि तस्य क्षालनं तु विवेकादिसाधनैरेव सर्वथा स्वच्छन्तु ज्ञानेनैव भवति ज्ञानं तु निरुपाधिकं ब्रह्मैवेति विषयीकुर्वाणा वृत्तिरितिवृत्त्युपरागोत्र स्वच्छतया सत्तयोपयुज्यते न तु विषयतया निरुपाधिकस्याविषयत्वात् तदुक्तम् कल्पतरुकारैः शुद्धं ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते स्वस्याअप्युपाधित्वाविशेषात् एवं च नोपहितस्य विषयता—वृत्त्युपरागोत्र सत्तयोपयुज्यते न तु भास्यतया विषयकोटिप्रवेशेनेति एतादृशाद्वैतदर्शनमपि कदाचिदेव न तु सर्वदा तदुक्तं विवरणे 'द्वैताद्वैतदर्शनयोर्न यौगपद्यं किन्तु कदाचिदद्वैतदर्शनं कदाचिद्द्वैतदर्शनमिति । तत्त्वदीपनेपि तत्र व्याख्यातं 'संतमसबहुलालोकयोरिव द्वैताद्वैतदर्शनयोर्विरोधः' इति एतादृशज्ञानप्रसादे जाते तु पश्चाद्भक्तिः सुलभैव जायते इत्यभिप्रेत्याह भक्तेः सिद्धेर्निष्प्रत्यूहत्वादिति । निर्विघ्नत्वादित्यर्थः । ननुउपासनाविशेषएव भक्ति-

परे तत्वे । भक्तेरसिद्धेर्निष्प्रत्यूहत्वात् भक्तिरुपासनानाम्नीति चेन्न उपास्तेर्भेदविषयत्वाद् अभेदविषयापि सोक्ता वेदान्तेष्विति चेन्न तथापि तस्या उपास्यगुणाकरविषयत्वात् । अस्याश्च भक्तेर्निर्गुणनिराकारैकतानतात्मकताया अग्रे सूत्रकृतैवाभिधास्यमानत्वात्तस्याश्च निरुपाधिके निर्गुणेपि संभवादुक्तदोषगणस्य ज्ञानपक्षइव भक्तिपक्षेऽनवतारात्—निर्गुणस्याप्युपासा यद्यपि शक्यते निषेधमुखेन कर्तुं तथापि तस्याः परोक्षत्वमपरोक्षत्वं च भक्तेः।न चैवं

---

रस्तु किमपूर्वकल्पनयेतिचेत्तत्र किं भेदविषयिणी उपासना भक्तिरुच्यते आहोस्विदभेदाविषयिणीति तत्राद्यामाशंक्य निषेधति भक्तिरुपासनानाम्नीत्यादिनाद्वितीयामाशंक्य निषेधति अभेदेत्यादिना ननु भक्तेरपि भजनीयगुणाविषयत्वं तुल्यमित्यतआहअस्याश्च भक्तेरिति । चकारस्त्वर्थकः । भक्तेरित्यस्याग्रे सम्बन्ध्यताम् निर्गुणेपीत्यपिना सगुणस्य समुच्चयः । ननु भक्तिर्ज्ञानाय परिणमतेइतिप्रसिद्धेर्ज्ञानमेव भक्तिरस्तु इतिचेत्तत्रपृच्छाति अस्माकं दर्शनेभक्तिर्द्विधा परापरभेदात् तत्र ज्ञानसाधनीभूता भक्तिरपरा-फलरूपा भक्तिस्तु परेत्युच्यते सैव मोक्षाभिव्यञ्जिका सती मोक्षसन्निहिता तत्र परस्याज्ञानेन साकमभेदमाशङ्कते न चैवं ज्ञानपक्षाभेदइति तत्रोक्तमेव हेतुमाह उक्तत्वादिति अस्यसूत्रस्यारम्भे समाधानस्योक्तत्वादित्यर्थः अभिधास्यमानत्वाच्चेति ' समानं भक्तेर्ज्ञानं न भवती ' त्यादिग्रन्थेनानुपदमेव समाधानस्य वक्ष्यमाणत्वादित्यर्थः अत्रेदमवधेयम् भक्तेर्द्वैविध्यं पूर्वमुक्तम् तत्र मोक्षाभिव्यञ्जिकात्वेन सर्वात्मभावापरपर्यायाफलरूपा मानसी सेवा परा भक्तिः सा च ब्रह्मज्ञानस्यापि फलरूपेति तस्या ब्रह्मविद्यासाधनत्वमशक्यवचनम् अतएव‘समासेनैव कौन्तेयनिष्ठा ज्ञानस्य यापरेतिसंक्षेपेणैव ज्ञानस्य परांनिष्ठां मक्रम्य‘अहंकारं बलं दर्पमि’ति संसारनाशं ब्रह्मभूयायकल्पते'इति ब्रह्मभावं चोक्त्वा ब्रह्मभूतस्य परभक्तिलाभो भगवताउक्तः।तत्र साधनभक्तिव्यावर्त्तनाय परपदम्‘एवं भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् इतिमत्वा भजन्ते मां बुधाभावसमन्विताःयोमामेवमसंमूढोजानातिपुरुषोत्तमम् ससर्वविद्भजति मां सर्वभावेन भारत ' इत्यादिष्वनेकत्र सार्वज्ञकलाङ्ग्ब्रह्मज्ञानोत्तर-

ज्ञानपक्षाभेदउक्तत्वादभिधास्यमानत्वाच्चेत्यलमतिप्रपञ्चेन

---

मेत्र सा निरूप्यते वेदेपि बृहन्नारायणे सत्यतपोदमशमदानधर्मादीनुक्त्वान्ते 'मानसमिति विद्वांस्तस्माद्विद्वांसएव मानसे रमन्ते' इति ज्ञानसंपन्नानामेव मानससेवासिद्धिस्तत्र रमणं चाम्नायते विद्यारण्यभाष्येप्यत्र मानसमुपासनविशेषएव व्याख्यायि। अयमेव साधनभक्तिबन्धाभावब्रह्मज्ञानपरभक्तीनां पूर्वोत्तरभावक्रमः तत्र तत्र श्रीभागवतादिषु वर्ण्यते। यथातृतीयस्कन्धे 'ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः। क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम्। एतावानेव लोकेस्मिन्पुंसां निःश्रेयसोदयः। तीव्रेण भक्तियोगेन मनोमय्यर्पितं स्थिरमितिबन्धाभावज्ञानरूपाङ्गयुक्तभक्तियोगाद्धामाप्तिरूपामुक्तिरुक्ता तत्रैव मद्भक्तप्रतिबुद्धार्थो मत्प्रसादेन भूयसे 'त्यादिना साधनभक्त्यैव ज्ञानं ततश्चसोक्ता 'वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनम्'इत्यादिना आरूढं पदमीक्षते'इत्यन्तेन धामाद्वैतसाक्षात्कारादिवर्णितम् चतुर्थे स्कन्धे तन्मायार्थमभिपद्य कलेवरेस्मिन् कृत्वा ममाहमितिदुर्मतिरुत्पथैः स्वैः क्षिप्तोप्यसद्विषयलालसआत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येदिति' श्रवणादिसाधनभक्त्याबन्धव्युदासउदितः तत्रैव 'तमेनमङ्गात्मनिमुक्तविग्रहे व्यपाश्रितंनिर्गुणमेकमक्षर'मित्युक्त्वा 'भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमितिप्ररूढमि'तितदेवाख्यायि तथा 'आराध्यभक्त्या लभतामलं तज्ज्ञानं यतो ब्रह्म परं विदन्तीति' हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया भक्त्याह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसारति'रिति 'यदारतिर्ब्रह्मणि नैष्ठिकीपुमानाचार्यवान् ज्ञानविरागरंहसे' त्यादि तथा 'तस्यानया भगवतः परिकर्मशुद्धसत्वात्मनस्तदनुस्मरणानुपूर्त्या ज्ञानं विरक्तिमद्भून्निशितेन येन चिच्छेद संशयपदं निजजीवकोश'मित्यादि 'अथात्मनोर्थभूतस्य यतोनर्थपरंपरा संसृतिस्तद्व्यवच्छेदोभक्त्या परमया गुरौ। वासु-

---

निरवयव के चिन्तन करने से अवश्य पूर्ण भक्ति होवे है ऐसा वेद का कथन है उपास्योपासक के भेद को वा उपास्यके गुणोंको विषयकरे है और भक्ति अभेद निर्गुण आत्माको विषय करे है इस वास्ते उपासना से भिन्न है निर्गुणकी उपासना परोक्ष है और भक्ति अपरोक्षरूप है इस वास्ते निर्गुण उपासना से भी भिन्न है किंच भक्ति की अन्त वृत्ति को ब्रह्मवादी ज्ञान कहे है इसवास्ते ब्रह्मवादी भक्तिके एकदेशको स्वीकारकरेहै हम समग्र भक्तिको मोक्षका अभिव्यञ्जक माने हैं

अपिचेदमात्मज्ञानं भक्तेश्चरमावस्थास्थेया यतिभिर्भक्ते ईढाया द्वैतमगोचरयन्त्या अद्वैतं च गोचरयन्त्याश्चरमावस्थाया वेदान्तिभिर्ज्ञानत्वाभिलापाद्वेदान्तिनोभक्तेरेकदेशस्याभ्युपगन्तारः न हि पाकेऽन्तिमार्चिषामेव हेतुत्वमभ्युपेयते केनापि तथासति काष्ठभारभस्मीभावोऽव्यर्थभावमापद्येत ॥ तथा प्रकृतेपीति समानं भक्तेर्ज्ञानं न भवति भक्तेस्समग्रसाधनताया वक्ष्यमाणत्वादित्यलम-

देवे भगवति भक्तियोगः समाहितः। सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः। शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयत' इत्यादि 'ता येपिबत्यवितृष' इति जीवन्मुक्तानामपि भक्तिरुक्ता। षष्ठस्कन्धे 'दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा । ज्ञानविज्ञानसंतुष्टोमद्भक्तः पुरुषोभवे' दिति ज्ञानविज्ञानोत्तरंभक्तिरुक्ता सप्तमस्कन्धे प्रह्लादः 'एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे। वासुदेवे भगवति यया संलभतेरति' मिति साधनभक्तितः फलभक्तिं वक्तीत्यलं वहुना इत्याद्यभिप्रेत्य उक्तमित्यलमतिप्रपञ्चेनेति ॥ प्रथमायास्तुभक्तेर्ज्ञानेन साकमभेदेअस्माकमिष्टएव संगृहीतइत्याह अपिचेदमात्मज्ञानमिति।—कार्य्यकारणयोरभेदं स्वीकृत्य भक्तेरन्तिमावस्थारूपं ज्ञानं यतिभिरास्थेयमित्यर्थः। यतिभिरित्युक्त्या निराकारानिर्वाणानां तत्रारुचिः सूचिता। एवमुक्त्या वेदान्तिनोपि स्वकीयान् करोति भक्तेरित्यादिनाज्ञानत्वाभिलापादिति। भक्तौ ज्ञानत्वव्यवसायादित्यर्थः। एवं च भक्तिर्ज्ञानाय परिणमतेइतिप्रसिद्धिरपि समाहितेति वोध्यम् अस्मदेकदेशस्याभ्युपगन्तार इति। समस्तपाठेतु त्रिभुवनत्रिधातुरितिवच्छैषषष्ठ्या समासइतिमन्तव्यम्। ज्ञानं प्रति अपरस्याभक्तेरन्यथासिद्धत्वाशङ्कायां दण्डमाह न हीत्यादिना। परां भक्तिं प्रति ज्ञानस्याप्यनन्यथासिद्धत्वं समानमित्याह तथाप्रकृतेपीति। पूर्वोक्तामरुचिं प्रकटयन्नाह समानं भक्तेर्ज्ञानं न भवतीति न हि पराभक्तेस्तुल्यं ज्ञानं संभवति पराभक्तेरुच्चभूमित्वादित्यर्थः। यद्वा साधनमित्यध्याहर्त्तव्यम् तथा च पराभक्तेः केवलं ज्ञानमेव साधनं न भवति अपि तु वक्ष्यमाणनामानुरागाद्यपीत्यर्थः। अतएवाह भक्तेः समग्रसाधनतायावक्ष्यमाणत्वादिति। समग्रेत्यत्राग्रशब्दः प्राधान्यवाची तथा च नामानुरागस्य सम्यक्प्रधानसाधनताया असारणसाधनताया इत्येतद्वक्ष्यमाणत्वादित्यर्थः। अनल्पकल्पनात्वनुपदं दर्शितैनेतिबोध्यम्। परां-

१ समानशब्दः केवलार्थः।

नल्पकल्पनैरितिदिक् ॥७॥ तस्याभक्तेर्निमित्तं किमप्यभिधातव्यमन्यथा सर्वेभक्ताअभक्तावाभवेयुस्तथा च सर्वेमी जीवामुक्ताअमुक्तावा भविष्यन्ति न केचन मुक्ताः केचन चामुक्ताइत्यतस्तस्या निमित्तमाह—

## सू० तस्यानिमित्तंतन्नामानुरागम्।८।

तस्यानिराकारभगवद्भक्तेर्निमित्तमसाधारणं कारणं ब्रूमः किंतदितिचेत्तन्नामानुरागमवेहि तस्याः कारणं तेन विना तदनुद्भवात् तस्मिंश्च सति तदुद्भवात् अभूवन् हि बहवो-वाल्मीकिप्रभृतयोनामानुरागभाजोभक्तिमुक्तिभाजोल्लौकि-

---

भक्ति प्रतिनामानुरागस्यासाधारणकारणत्वेऽजामिलाद्याख्यानमपिलिङ्गमितिदिगर्थइतिमन्तव्यम्। हेतुहेतुमद्भावसंगत्या प्रश्नपूर्वकं भक्तिसाधनसूत्रमवतारयति तस्याभक्तेरित्यादिना असाधारणमिति। अन्वयव्यतिरेकाभ्यां निश्चितं कारणमसाधारणकारणमित्येव वहु। तन्नामेति तस्य निराकारस्य नाम तन्नाम। यद्वा तदिति पृथक्पदं कारणमाह तच्च कारणं नामानुरागमवेहीत्यर्थः। सूत्रेऽवेहीत्यध्याह्रियते इति बोध्यम्। पूर्वोक्तासाधारणत्वमन्वयव्यतिरेकाभ्यां स्वयमेव सदृष्टान्तं दर्शयति तेन विनेत्यादिना। अत्र प्रमाणवचनानि तूपोद्घातोदाहृतान्येव स्मर्तव्यानि। अत्रैव शेषेवक्ष्यमाणानि चेति बोध्यम्।

---

जैसे पाक में अंतज्वलामात्र कारण नहीं है किन्तु आदि ज्वाला से लेकर अंत ज्वालापर्यन्त सर्वज्वाला पाक में कारण है वैसे अहंब्रह्मास्मि ऐसी भावनामय प्रथमवृत्ति से लेकर परिपक्व अन्तवृत्तिपर्यन्त भक्ति मोक्ष का हेतु है अंत की वृत्तिमात्र हेतु नहीं है ॥७॥ भक्ति का हेतु कथन करे हैं (सू०तस्यानिमित्तंतन्नामानुरागम् ॥८॥) निराकार भक्ति का असाधारण कारण भगवत्नाम का अनुरग है जैसे वाल्मीकिआदि भक्तों को भगवत्नाम मे अनुराग करने से भगवत की भक्ति और सर्वसिद्धि प्राप्तहुई है वैसे अन्य भी जो पुरुष भगवतनाम में अनुराग करेंगे उन को भगवत की भक्ति और सर्वसिद्धि प्राप्तहोगी

कार्यसिद्धिसम्बन्धाश्च व्यतिरेकस्तु सुप्रसिद्धोबहिर्मुखेषु तस्य निराकारस्यलीलया लोकानुजिघृक्षया कल्याणगुणगणमयीमलौकिकींतनूमादधानस्य नामसु वेदपुराणप्रसिद्धेषु यत्र कुत्रापि नाम्न्यनुरागोदृढप्रेमा भक्तिपर्य्यवसायी त्यर्थःतथाचाभिहितं "गीतानि नामानि तदर्थकानि गाय-

---

व्यतिरेकस्तु सुप्रसिद्ध इति शास्त्रे इति शेषः । तथाचशास्त्रम् 'मद्भक्तिविमुखानां हिशास्त्रगर्तेषु मुह्यतां । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपी'ति 'तस्मात्त्वद्भक्तिहीनानां कल्पकोटिशतैरपि। न मुक्तिशङ्का विज्ञानशङ्का नैव सुखं तथा' इत्यादि । नहि केवलं निराकारस्य भक्तेरेव भुक्तिमुक्ती संभवतोपि तु साकारभक्तेरपीत्याह निराकारस्य लीलयेत्यादिना । लोकानुजिघृक्षयेति भक्तजनानुग्रहेच्छयेत्यर्थः तदुक्तं ब्रह्मवैवर्त्ते । भक्तानुरोधात्साकारः कुतस्ते विग्रहोविभो । सगुणस्त्वं च साकारो निराकारश्च निर्गुणः' इति 'गोसाधुदेवताविप्रवेदानां रक्षणाय वै। तनुं धत्ते हरिः साक्षाद्भगवानात्मलीलया' इति । दृढ़प्रेमाइत्यनुरागस्य विशेषणम् दृढ़प्रेमत्वं तु शाण्डिल्याचार्य्यैरुक्तम् 'सापरानुरक्तिरीश्वरे' इति वस्तुतस्तु दृढ़प्रेमभक्तीतिपाठस्सुवचइतिध्येयम् । नामोच्चारणभक्तेर्भुक्तिमुक्तीभवतइत्यत्र श्रीमद्भागवतैकादशस्कन्धस्य वचनोत्तरार्द्धं प्रमाणयति तथाचाभिहितमिति॥ अत्रादिपदेन श्रुतिस्मृतीतिहासपुराणोपपुराणसंहितागमतन्त्रादीनां संग्रहः । श्रुतयस्तावदुक्ताआरम्भेअन्याअपि लिख्यन्ते तथाहि 'प्रतत्ते अद्यशिपिविष्टनामार्य्यः शंसामि वयुनानि विद्वान् तं त्वागृणामि तव समतव्यान् क्षयन्तमस्य रजस्यपराके' इत्यादि श्रुतिषु तथावक्ष्यमाणस्मृत्यादिषुनामानुरागस्य पापादिक्षयद्वारा भुक्तिमुक्तिहेतुत्वंप्रसिद्धमितिबोध्यम् । अथस्मृतयः। तत्र च्यवनस्मृतौ प्रायश्चित्तप्रकरणे श्रुतिस्मृतिपुराणेषु रामनाम समीरितं । तन्नामकीर्त्तनं भूयस्तापत्रयविनाशनम् । नामसंकीर्त्तनादेव तारकं ब्रह्मदृश्यते ॥ इति । माण्डव्यस्मृतौ 'सुरापोब्रह्महा स्तेयी चौरोभग्नव्रतोऽशुचिः । स्वाध्यायवर्जितः पापोलुब्धोनैःकृतिकः शठः । अव्रती वृषलीभर्त्ता कुनखी सोमविक्रयी सोपि मुक्तिमवाप्नोति विष्णोर्नामानुकीर्तनादिति अथेतिहासाः तत्र महाभारते 'अनन्यचेताः सततं योमां स्मरतिनित्यशः। तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः। कलेर्दोषनिधेराजन्नस्ति ह्येकोमहान् गुणः। कीर्त्तनादेव कृष्णस्य मुक्त-

संगः परंव्रजेत् ' इति भारतविभागे 'कृष्णः कृष्णः कृष्ण इत्यत्रकाले जल्पन् जंतुर्जीवितं योजहाति। आद्यः शब्दः कल्पते तस्य मुक्तौ व्रीडानम्रौ तिष्ठतोन्यावृणस्थौ ' इति । हरिवंशे 'शयनादुत्थितोयस्तु कीर्त्तयेन्मधुसूदनं। कीर्त्तनात्तस्य पापानि नाशमायान्त्यशेषत ' इति । इतिहासोत्तमे शौनकं प्रति भृगुवाक्यम् 'नरके पच्यमानानां नराणां पापकर्मणां। मुक्तिः संजायते यस्मान्नामसंकीर्त्तनाद्धरे ' रिति । विष्णुधर्मोत्तरे 'माङ्गल्यं सर्वपापघ्नमायुष्यं पापशोधनं। भुक्तिमुक्तिप्रदं पुण्यं वासुदेवस्य कीर्तनमिति। सौरधर्मोत्तरे ' क्वचिद्भगवतो नाम न त्वया कीर्त्तितं मुदा। येन संसारचक्रेऽस्मिन् मुहुरुद्भ्राम्यसेऽनघ ' इति । भविष्योत्तरे ' कोटिपापानि सन्त्येव स्वल्पानि च बहूनि च । न तानि भूयो बाधन्ते हरेर्नामानुकीर्त्तनादि ' ति विष्णुरहस्ये ' ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना । ते प्रयान्ति भयं त्यक्त्वा हरिलोकमनामय ' मिति । ब्रह्मरहस्ये ' सर्वाचारविहीनोपि तापक्लेशादिसंयुतः । जगन्नाथं वदन् विप्रोयाति ब्रह्म सनातनमि'ति । शिवरहस्ये 'परलोकस्य पाथेयं मोक्षोपायमनामयम्। पुण्यसंघौघनिलयं शिवइत्यक्षरद्वय'मिति ॥ विष्णुधर्मे 'गोविन्देतिसमुच्चार्य्य पदं क्षपितकल्मषः। क्षत्रबन्धुर्विनष्टात्मा गोविन्दत्वमुपेयिवान्' इति ॥ श्रीमद्रामायणे 'सकृदेव प्रपन्नाय दासोस्मीति च याचते। अभयं सर्वदा दास्ये इति नित्यं व्रतं मम' इति । अथ महापुराणानि तत्र तावद्ब्रह्मपुराणे 'यत्र यत्र स्थितोवापि कृष्णकृष्णेतिकीर्त्तयेत्। सर्वपापविशुद्धात्मा सगच्छेत्परमां गतिम्'इति ॥ वैष्णवे 'अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः। पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव' इति । शैवे 'कृष्णनाम सदा ज्ञेयं ध्येयं रूपं हरेरपि। कीर्त्तनीयं सदा नाम मुरारेः परमागति'रिति ॥ श्रीमद्भागवते 'कलिंसभाजयन्त्यार्य्या गुणज्ञाः सारभागिनः। कीर्त्तनेनैव कृष्णस्य सर्वः स्वार्थोभिलभ्यते' इति ॥ लघुभागवते 'ये पापिनोपि शिशुपालसुयोधनाद्या वैरानुबद्धमनसः परुषं वदन्ति । मुक्तिं गताः सपदि ते च विधूतपापाः कः संशयः परमभागवतोत्तमाना'मिति । मार्कण्डेये कार्त्तवीर्य्यं प्रति दत्तात्रेयवाक्यम् 'वरं वृणीष्व गुह्यं मे त्वया नामयदीरितं। तेन तुष्टिः परा जाता त्वयाद्य मम पार्थिव' इति ॥ आग्नेयपुराणे'न भयं यमदूतेभ्यो न भयं रौरवादिकात्। न भयं प्रेतराजोत्थं गोविन्देति च जल्पताम् ' भविष्ये 'ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातयः। सततं चानुकुर्वन्तोविष्णोर्नामानुकीर्तनं। सर्वपापविनिर्मुक्तास्तेपि यान्ति सनातनम् ' इति॥ ब्रह्मवैवर्त्ते 'नाम्नां सहस्रं दिव्यानां स्मरणे यत्फलं

लभेत् । तत्फलं लभते नूनं नामोच्चारणमात्रतः' इतिलिङ्गपुराणे 'नामसंकीर्त्तनं विष्णोर्हेलया कलिमर्दनं । कृत्वा स्वरूपतां याति भक्तियुक्तः परं व्रजेत्'इति ॥ वाराहे 'वासुदेवस्य संकीर्त्या सुरापोव्याधितोपि वा । मुक्तोजायते नियतं महा विष्णुः प्रसीदतु ' इति ॥ स्कन्दपुराणे ' सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनंप्रति' इति ॥ कौर्मे 'गोविन्देति सदा भक्त्या येन गीतं महात्मना । सहसा तेन मुच्येत पापात्सद्गुरुतल्पजात्' इति ॥ मात्स्ये 'परदाररतोवापि परापकृतिकारकः । स शुद्धोमुक्तिमाप्नोति कृष्णनामानुकीर्त्तना' दिति ॥ गारुडे ॥ अम्बरीषशुभं वाक्यं मयोक्तं शृणु भक्तितः । धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्त्तन'मिति ॥ ब्रह्माण्डे ' सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः । यच्चाप्युदीरितं नाम तत्सर्वार्थस्य योजये'दिति ॥ पाद्मे 'यत्र तत्र स्थितो वापि कृष्णकृष्णेतिकीर्त्तनात् । सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिम्' इति नारदीये'जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः । परितोषं व्रजत्याशु तृषार्त्तः सलिलैर्यथा' इति ॥ वामनपुराणे 'अनाद्यमनन्तमजरामरं हरिं ये स्मरन्त्यहरहोनरा भुवि । तत्सर्वगं ब्रह्मपदं पुराणं ते यान्ति वैष्णवपदं ध्रुवमव्ययं चे'ति ॥ अथ यथामिलितं यथादृष्टमुपपुराणानि तत्र बृहद्विष्णुपुराणे ' नास्ति गङ्गासमं तीर्थं न देवः केशवात्परः । नाममन्त्रात्परोनास्तिमन्त्रः पातकशोधनः । नाममन्त्रपरोयस्तु नित्यं भक्तिसमन्वितः।मुच्यते सर्वपापेभ्योविष्णुलोकं स गच्छति'इति॥ नारसिंहे'यथा यथा हरेर्नाम कीर्त्तयन्ति स्म नारकाः।तथा तथा हरौ भक्तिमुद्धरन्तो दिवं ययु'रिति॥बृहन्नारसिंहे'गोविन्देति वदन् जन्तुः प्रत्यहं नियतेन्द्रियः।सर्वपापविनिर्मुक्तः सुरवद्भासतेनरः'इति॥आदित्यपुराणे 'गोविंदकीर्त्तनं पुण्यं महापातकनाशनम्।सर्वकामप्रदंलोके ह्यपवर्गफलप्रदम्'इति॥आङ्गिरसपुराणे'वासुदेवेतिमनुजउच्चार्यभवभीतिभिः। उन्मत्तः पदमाप्नोतिविष्णोरिव न संशयः'इति॥वायुपुराणे 'नमोनारायणायेति यस्तु कीर्त्तयते मुदा । गुरुतल्पशतेनापि सद्यस्तेन प्रमुच्यते ' इति ॥ बृहन्नारदीये 'घोरे कलियुगे प्राप्ते हरिनामपरायणाः । समस्ताघौघनिर्मुक्ता यास्यन्ति परमां गतिं' मिति ॥ नन्दिपुराणे ' सर्वदा सर्वकार्य्येषु येकुर्वन्ति पातकं । नामसङ्कीर्तनं कृत्वा यान्ति विष्णोः परंपदम्'इति वह्निपुराणे । ' महाव्याधिसमाच्छन्नो राजवाधोपपीडितः । नारायणेतिसङ्कीर्त्य निरातङ्कोभवेन्नरः' इति । प्रभासपुराणे 'नाम्नां मुख्यतरं नाम विष्ण्वाख्यं परंतप । प्रायश्चित्तमशेषाणां पापानां मोचकंपर'मिति । कालीपुराणे । ' विष्णोर्नामैव पुंसः शमलमपनुदत् पुण्यमुत्पादयच्च । ब्रह्मादिस्थानभोगाद्विरतिमथगुरुश्रीपदद्व-

न्द्वभक्तिमि'ति। लैङ्गवाक्यम् 'अपि संयोजयिष्यामि समाधिस्थं महेश्वरम्। न परं तत्र मे शक्तिर्हरिकीर्त्तनतत्परे' इति॥ अथ यथामिलितं संहिताग्रन्थाः तत्र जमदग्निसंहितायाम् 'लब्धं परपदं तेन जन्मनां कोटिभिर्जितम्। कीर्त्तितं येन महता हरिरित्यक्षरद्वयमि'ति॥ वाल्संहितायाम् 'हरिनाम परिजप्यं ध्येयं निरन्तरं। कीर्त्तनीयं च वहुधा निर्वृतिं वहुधेच्छुना' इति 'विश्वामित्रसंहितायाम् विश्रुतानि वहून्येव तीर्थानि विविधानि च। कोट्यंशैर्नापि तुल्यानि नामकीर्त्तनतोहरे'रिति। सौरसंहितायाम् 'गोविन्दनाम नियतं परिकीर्त्तनाय धत्ते हि निर्वृत्तिमिमां सततं जनेषु। जन्मार्जितानि विविधान्यपहाय दुःखान्यत्यन्तधर्मनिचयं हरिलोकमेति' इति। सूतसंहितायाम् 'यद्गोविन्दपदं नरः प्रतिपदं सङ्कीर्त्तयंस्तत्क्षणान्मुक्तोदुष्कृतराशितो बुधजनै'रिति॥ शातातपसंहितायाम् 'लब्धाचोत्तमभोगजातमतुलं यत्सागरे स्नानतोनाम्नामेकलकीर्त्तनादपि नरः सायुज्यमायात्यहो' इति॥ वौद्धायनसंहितायाम्। 'इष्टापूर्तानि कर्माणि सुवहून्यकृतान्यपि। भवहेतूनि तान्येव हरेर्नाम तु मुक्तिद'मिति॥ ब्रह्मसंहितायाम्। नामकीर्त्तनप्रस्तावे. वौधायनं प्रति श्रीकृष्णवचनम् 'यन्नामकीर्त्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम्। योमानुषस्तमिह दुःखचये क्षिपामि संसारघोरविविधार्त्तिनिपीडिताङ्गम्' इति॥ तापनीयसंहितायाम् 'सर्वेषामेव रोगाणां प्रायश्चित्तं परं स्मृतम्। अपमृत्युप्रशमनम् मूलाविद्याविनाशनम्। कृष्णसंकीर्त्तनं विद्धि यतोनान्यद्वदाम्यह'मिति॥ पराशरसंहितायाम् 'न सांव व्याधिजं दुःखं हेयं नानौषधैरपि। हरिनामौषधं पीत्वा व्याधिस्त्याज्यो न संशयः' इति॥ सुश्रुतसंहितायाम् 'दृष्टः कृष्णोद्वारकायां स्मृतोवा शुद्धमानसैः। कीर्त्तितोबालकैर्वापि जितं जन्मसहस्रकम्' इति॥ ईशानसंहितायाम् 'यन्नामसकृदुच्चार्य्य महापातकिनोनराः। निष्कल्मषाः भविष्यन्ति तं प्रपद्ये महेश्वर'मिति॥ कात्यायनसंहितायाम् 'अर्थवादं हरेर्नाम्नि सम्भावयति योनरः। सपापिष्ठोमनुष्याणां निरये याति स्फुटम्'॥ वैश्वानरसंहितायाम् 'अनन्तेत्यच्युतेत्येवंगोविन्देति च कीर्त्तनात्। सर्वरोगविनिर्मुक्तोमुक्तिमाप्नोतिदुर्लभामिति' वात्स्यायनसंहितायाम् 'तुलापुरुषदानानि दत्वा यत्फलमश्नुते। संकीर्त्य हरिरित्येवं मुक्तोजायेत मानवः' इति॥ पातञ्जलसंहितायाम् 'नृहरे इति योनित्यं कीर्त्तयेच्छुद्धवुद्धिमान्। विमुक्तः सर्वपापेभ्योहरेः सायुज्यमृच्छति'॥ कैलाशसंहितायाम् 'यत्पादपद्मस्मरणाद्यस्य पादजपादपि। न्यूनं कर्म भवेत्पूर्णं तं वन्दे साम्बमी-

श्वरम् ॥ वैशंपायनसंहितायाम्'सर्वधर्मबहिर्भूतः सर्वपापयुतस्तथा। मुच्यते नात्र सन्देहोविष्णुनामानुकीर्त्तनात्' इतिवृद्धवासिष्ठसंहितायाम्। 'नामसंकीर्त्तनाच्चैवगुणानां चापि कीर्त्तनाद्। भक्त्या श्रीरामचन्द्रस्य वचसः शुद्धिरिष्यते' लीलावतीसंहितायाम् 'मातृहा पितृहा वापि सुरापोगुरुतल्पगः। मुच्यते नात्र सन्देहः कृष्णकृष्णेति कीर्त्तनात्'। भार्गवसंहितायाम् 'कोटिशोमनुजानां यद्दुरितं समुपस्थितम्। संकीर्त्यरामरामेतिनाशमायातिमानवः॥गालवसंहितायाम् 'सर्वपापयुतोयस्तु नृहरेर्नामकीर्त्तनं। कृत्वा विमुच्य दुःखानि याति ब्रह्मसनातनम्'॥ अगस्त्यसंहितायाम् 'मांगल्यं सर्वपापघ्नमायुष्यं तापशोधनम्। भुक्तिमुक्तिप्रदं पुण्यं वासुदेवस्य कीर्त्तन'मिति। अथ यथादृष्टमागमशास्त्राणि तत्र वृहद्गौतमीये। 'कुष्ठरोगी भवेल्लोके वहुधा ब्रह्महा नरः। सकृदुच्चारितं नाम हरेस्तत्क्षपयत्यहो' इति ॥ विष्णुयामले ॥ 'जगन्नाथेति यन्नाम कीर्त्तयिष्यन्ति येनराः। अपराधशतं तेषां क्षपिष्ये नात्र संशय' इति। गौतमीयतन्त्रे 'न तादृशं महाभाग पापं लोकेषु विद्यते। यादृशं धरणीनाथहरिनाम्ना न दह्यते' इति॥ आश्वलायनतन्त्रे 'ये कीर्तयन्ति नामानि विष्णोरमिततेजसः॥सर्वधर्मवहिर्भूतास्ते यान्ति परमां गति'मिति॥मेरुतन्त्रे॥'नाम्नां मुख्यतरं विष्णोर्जगन्नाथेत्युदीरितं। नातः परतरं नाम त्रिषुलोकेषु गीयते' इति ॥ नारायणतन्त्रे'ब्रह्महा स्वर्णहारी च सुरापी मानवश्च यः। नारायणेति संकीर्त्य मुच्यते नात्र संशयः ॥ इति ॥ वामनभारद्वाजीये'पृथिव्यां कति वा लोका न जाताः कति नो मृताः। मुक्तास्ते नात्र सन्देहोये हरेर्नामकीर्त्तकाः' इति॥ वासिष्ठतन्त्रे 'सकृदुच्चारितं नाम हरेर्नाम चिदात्मकम्। फलं नास्य क्षमोवक्तुं सहस्रवदनोविधिरितिसङ्क्षेपः अत्रेदमप्यवधेयम् 'ननु नामकीर्त्तनात्सद्यः पापक्षयपूर्वकभुक्तिज्ञप्तिमुक्तिप्रतिपादकमन्त्रार्थवादेतिहासपुराणोपपुराणसंहितागमादीनां कर्मानुष्ठानादिपराणां स्वार्थे प्रामाण्यमेव नास्तीतिचेदत्राहुः मानान्तरसंवादिविसंवादिवाक्यानामग्निर्हिमस्यभेषजं सप्रजापतिरात्मनोवपामुदखिदद्यजमानः प्रस्तर' इत्यादीनामिवाप्रामाण्यं स्वार्थे उतमानान्तरसंवादविसंवादरहितानामपि आद्ये इष्टापत्तिः द्वितीयस्तु न संभवति तादृशवाक्यानां स्वार्थे अवान्तरतात्पर्य्यस्य देवताधिकरणादौ व्यासादिभिर्भाष्यकारादिभिश्चाङ्गीकृतत्वात् भट्टाचार्य्यैश्चाथवा मन्त्रार्थवादेतिहसपुराणप्रामाण्यात् सृष्टिप्रलयावपीष्येते इत्यादिग्रन्थेनमन्त्रार्थवादादीनां प्रामाण्यस्वीकाराच्च मन्त्रार्थवादयोः स्वार्थप्रामाण्यं नास्तीति वदतोऽप्यनर्थप्राप्तिदर्शनाच्च पापक्षयपूर्वकमुक्त्यादिप्रतिपादकवाक्यानामपि मानान्तर-

न्विलज्जोविचरेदसङ्ग' इत्यादीतिदिक्॥८॥अथ वेदपुराणादिप्रसिद्धेषु नामविशेषेषु कस्य भगवन्नाम्नः प्रभावविशेषो-

---

सम्वादविसम्वादयोरभावात्स्वार्थेपि प्रामाण्यं । स्वीकर्त्तव्यमेव । भाष्यकारैश्च सहस्रनामभाष्ये ' द्यौः सचन्द्रार्कनक्षत्रमि ' त्यादिना स्तुत्यस्य वासुदेवस्य माहात्म्यकथनेनोक्तानां फलानां प्राप्तिवचनं यथार्थकथनं चार्थवद्इतिव्यासोदर्शयतीतिभाष्येण भगवन्नामकीर्त्तनफलवचनानां प्रामाण्यदर्शनाच्च अन्यथानर्थप्राप्तिरेव उक्तं च नारदीये ' अहोह्विवाक्येचतुरक्षरे द्वे पुण्यस्य पापस्य निधानभूते । उच्चारणादेव नृणाम् मुनीन्द्रा नारायणश्चेति तथार्थवाद् इति ब्रह्मसंहितायामपि 'नामकीर्त्तनप्रस्तावे बौधायनंप्रति श्रीकृष्णः 'यन्नामकीर्त्तनफलं विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादं । योमानुषस्तमिह दुःखचयेक्षिपामि संसारघोरविविधार्त्तिनिपीडिताङ्गमि'ति । कात्यायन संहितायाम्'अर्थवादं हरेर्नाम्नि सम्भावयति योनरः। सपापिष्ठोमनुष्याणां नरके पततिस्फुटमि'ति किंच यथाविधायकब्राह्मणश्रुतिमूलकानां मन्वत्रिवसिष्ठबौधायनापस्तम्बादिस्मृतीनामनुष्ठेयेग्निहोत्रादौ प्रामाण्यमेवं प्रत्यक्षविधायकब्राह्मणश्रुतिमूलकानां नामकीर्त्तनात्पापमोक्षप्राप्तिवचनानामपि जाबालब्राह्मणम् ' अथैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति सहोवाच याज्ञवल्क्यः शतरुद्रीयेणेत्येतानि हवा अमृतस्य नामधेयान्येतैर्हवा अमृतोभवतीति'शतरुद्रीयसंज्ञितशिवनाम्नां मोक्षसाधनज्ञानसाधनत्वं दर्शयति एवं कैवल्यकठादिब्राह्मणमपि दर्शयतीत्युक्तं प्राक् किमाम्रेडितेनेत्ययमेवदिगर्थोवसेयः किं च ' नामकोपेऽभ्युपगमे विस्मये स्मरणेपि च । सम्भाव्यकुत्साप्राकाश्यविकल्पेष्वपिदृश्यते ' इति मेदिनीकोशात् अत्र सूत्रे नामपदं द्वेषकोपादिवाचकमपि गृह्यते तथा चायमर्थः । तस्मिन् भगवति यो नाम द्वेषादिः तस्मिन्ननुरागः तमपि भक्तौकारणमवेहीति शेषः । सूत्राणामनेकार्थत्वं भूषणमेव सूत्रत्वात् एवं च ' विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्। शिशुपालोगतः स्वर्गं किंपुनस्तत्परायणाः इति । अत्रिमाण्डव्यस्मृत्या'ये पापिनोपि शिशुपालसुयोधनाद्या वैरानुबद्धमनसः परुषं वदन्ति मुक्तिं गताः सपदि ते च विधूतपापाः कः संशयः परमभागवतोत्तमानामिति । लघुभागवतेन च सह न विरोधः नापि तत्राव्याप्तिरिति बोध्यमिति संक्षेपः॥८॥ यदुक्तं तन्नामानुरागएव भक्तौ प्रयोजकस्तत्र किं यत्किंचिन्नामन्यनुरागोभक्तिप्रयोजक आहोस्वित्सर्वेषु नामसु नाद्योन्यन्नाम्नां वैयर्थ्यप्रसङ्गात् न द्वितीयः

यत्रानुरागं वध्नीम ततश्च भक्तिभाजोभवेम सर्वत्र नामस्व-नुरागस्याशक्यत्वादित्यतआह नामानुरागी नामावतारः—

सू० स च यथाभिरुचि ॥ ९ ॥

तच्छब्दोनामानुरागं परामृशति चशब्दश्च तस्य कीर्त्त-

सर्वेषु नामस्वनुरागस्य कर्तुमशक्यत्वादित्याक्षिप्य स च यथाभिरुचि इति सूत्रमवतारयति अथेत्यादिना । सः नामानुरागः चकारेण श्रवणादिकं चैतद् द्वयं यथेष्टं कर्त्तव्यमितिसूत्रार्थः । यदुक्तं विष्णुधर्मोत्तरे 'नामानि सर्वाणि जनार्दनस्य कालश्च सर्वः पुरुषप्रवीर तस्मात् सदा सर्वगतस्य नाम ग्राह्यं यथेष्टं वरदस्य राजन्नि'ति एवं च न पूर्वोक्तशङ्काद्वयं प्रसरतीति भावः । तथैव सूत्रं व्याचष्टे तच्छब्दइत्यादिना तस्यानिमित्तमितिसूत्रेतन्नामानुरागमित्यस्य श्रवणादेरुपलक्षकत्वं प्रतीयते 'सचयथाभिरुची'तिसूत्रे चकारोपादानात् यद्वा तत् निमित्तं नामेति प्रसिद्धमनुरागमवेहीति पदत्रयं विभज्य व्याख्येयम् एवं चानुरागपदेन श्रवणादावप्यनुरागः संगृहीतव्यः परन्तु अनुरागोहि मानसी सेवा श्रवणादिकं तनुजा सेवेति विवेकः इत्याशयेनाह चशब्दश्च तस्यकीर्त्तनादिकं सूचयतीति तस्य भगवन्नाम्नइत्यर्थः ॥ सूचयतीति ।—अनुक्तश्रवणादिकं समुच्चिनोतीत्यर्थः ॥ यथामानसानुरागस्य भक्तिप्रयोजकत्वं शास्त्रसिद्धं तथा श्रवणाद्यनुरागस्यापि शास्त्रसिद्धत्वं मन्तव्यं तथाहि 'ब्राह्मपुराणे' एवं मद्भक्तियुक्तानामात्मा सम्यक् प्रकाशते मद्भक्तेः कारणं किंचिद्वक्ष्यामि शृणु तत्त्वतः मद्भक्तसंगोमत्सेवामद्भक्तानां निरन्तरम् एकादश्युपवासादि ममपर्वानुमोदनम् मत्कथाश्रवणे पाठे व्याख्याने सर्वदा रतिः मत्पूजापरिनिष्ठा च ममनामानुकीर्त्तनमेवं सततयुक्तानां भक्तिरव्यभिचारिणी मयि संजायते नित्यं ततः किमवशिष्यते अतोमद्भक्तियुक्तस्य ज्ञानं विज्ञानमेव च वैराग्यं च भवेच्छीघ्रं ततोमुक्तिमवाप्नुया'दिति । वस्तुतस्तु अनुरागपरामर्शकतच्छब्देनैवोभयस्य संग्रहे सिद्धे चशब्दस्त्वर्थकः पूर्वपक्षं व्यावर्त्तयतीत्येवव्याख्येयमितिध्येयम् । 'श्रवणं कीर्त्तनं विष्णो'रित्यादौ 'श्रवणं कीर्त्तनं चास्य स्मरणं महतां गतिः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पण'मित्यादौ च भागवते 'श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् अर्चनं वंदनं दास्यं सख्यमात्मनिवेदन'मित्यध्यात्मरामायणादौ च यद्यपि श्रवणस्यैव प्रथमोपादानं समर्थ्यते तथापि श्रवणादिषु मध्ये कीर्त्तनस्य प्राधान्यद्योतनार्थं कीर्त्तनादिकमित्युक्तम् अथवा स्व-

स्वस्थाने सर्वेषां प्राधान्यादशोकवनिकान्यायेन भाष्यकारेण कीर्त्तनस्यैवादावुपादानं कृतम् । अतएव ब्रह्मवैवर्त्ते 'अर्चनं वंदनं मन्त्रोजपः सेवनमेवच स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् निवेदनं स्वस्य दास्यं नवधाभक्तिलक्षण' मित्युक्तम् । अत्रादिपदेन श्रवणादेः संग्रहः। अत्रेदं बोध्यम् भगवद्भक्तेरेकादशभूमयः सन्ति तत्र च चतुर्थभूमेरङ्गभूतानि श्रवणादीनि तदुक्तम् भक्तिरसायने ' प्रथमं महतां सेवा तद्दयापात्रता ततः श्रद्धाथ तेषां धर्मेषु ततोहरिगुणश्रुतिः ततोरत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्ततः प्रेमवृद्धिः परानन्दे तस्याथस्फुरणं ततः भगवद्धर्मनिष्ठा च तस्मिंस्तद्गुणशालिता प्रेम्णोथ परमा काष्ठेत्युदिता भक्तिभूमिकाः' इति ॥ ' श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मसमर्पणम् इतिपुंसार्पिता विष्णौ भक्तिश्चेन्नवलणा क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ' तदेवसंक्षिप्तम् ' तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः श्रोतव्यः कीर्त्तितव्यश्च स्मर्तव्यश्चेच्छताभय ' मिति तत्र श्रवणं नाम भगवन्नामादिशब्दानां परोक्तानां स्वोक्तानां च श्रोत्रेण ग्रहणम् । कीर्त्तनं तेषां स्वयं वैखर्य्यादिनोच्चारणम्।स्मरणं तन्नामरूपादीनां मनसा चिन्तनम् । पादसेवनं परिचर्य्या प्रतिमादौ साधारणम्।अर्चनं पूजा जलादिषु । वंदनम् दण्डवत्प्रणामादि सर्वाङ्गैरभिवन्दनं । दास्यं कर्मार्पणम् । सख्यं तद्विश्वासास्पदं । आत्मनिवेदनं देहादिसमर्पणम् यथाविक्रीतस्य गवाश्वादेर्भरणपोषणादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तद्वच्चिन्तानिवर्त्तनमिति ' संक्षेपेण प्रत्येकं क्रमेण फलोदाहरणादि'संकीर्त्यमानो भगवाननन्तः श्रुतानुभावोव्यसनानि पुंसां प्रविश्य चित्तं विधुनोत्यशेषं यथातमोर्कोभ्रमिवातिवातः । मृषागिरस्ताह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः । तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयं॥' तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसोमहोत्सवं । तदेव शोकार्णव शोषणं नृणां यदुत्तमश्लोकयशोनुगीयते '॥ आविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः '॥ अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि च शं तनोति' । तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं । हित्वा गृहं संसृतिचक्रवालं नृसिंहपादभूताकुतोभयम् ॥ ' वैदिकस्तान्त्रिकोमिश्रइति मे त्रिविधोमखः । त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ' ॥ एवं क्रिया योगपथैः पुमान् वैदिकतान्त्रिकैः । अर्चन्नुभयतः सिद्धिं मत्तोविन्दत्यभीप्सितां ॥ यत्पादयोरशठधीः सलिलःप्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्य्यां । अप्युत्तमां गतिमसौ लभते त्रिलोकीं दाश्वान विक्लवमनाः कथमार्त्तिमृच्छेत् '॥

नादिकं सूचयति ॥ अभिरुचेरतिक्रमाभावोयथाभिरुचि तथा च स्वाभिरुचिमनतिक्रम्य भगवन्नामानुरागवन्धने भवत्यप्रतिहता भगवतोभक्तिःस्वाभिरुच्यतिक्रमे तु दृढा-

ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः। यन्नमस्ये भगवतोयोगिध्येयांघ्रिपङ्कजं ॥ पतितः स्खलितोवार्त्तः क्षुत्वा वा त्रिवशोगृणन् हरयेनमइत्युच्चैर्मुच्यते घोरकिल्विषात् ॥ 'नताः स्म ते नाथ पदारविन्दं बुद्धीन्द्रियप्राणवचोमनोभिः ॥ यच्चिन्त्यतेन्तर्हृदिभावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात्' ॥ गीतासु 'मन्मनाभव मद्भक्तोमद्याजी मां नमस्कुरु। मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥' इति 'यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः तस्य तीर्थपदः किंवा दासानामवशिष्यते। किं चित्रमच्युत तवैतदशेषवन्धो दासेष्वनन्यशरणेषु यदात्मसत्यं। योरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः।कायेन वाचा मनसेन्द्रियैर्वाः बुद्ध्यात्मनावा नुसृतस्वभावात्करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्'॥ अहोभाग्यमहोभाग्यं नन्दगोपव्रजौकसाम्। यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनम्'। धर्मार्थकामइति योभिहितस्त्रिवर्गईक्षा त्रयी न यदसौ विविधा च वार्त्ता। मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः॥ किञ्च 'विष्णोस्तु श्रवणे परीक्षिदभवद्वैयासकिः कीर्त्तने प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने॥ अक्रूरस्त्वभिवादने च हनुमान् दास्येथ सख्येऽर्जुनः सर्वस्वात्मनिवेदने बलिरभूत्कैवल्यमेषां फलमि'तितथा 'परीक्षिन्नारदः कृष्णामा[1]वल्यक्रूरवायुजाः। पार्थःकुन्तीक्रमान्मुक्ता नवभिः श्रवणादिभि' रितिसंक्षेपः अभिरुचिमनतिक्रम्य वर्त्तते इति यथाभिरुचि इति समासार्थं प्रदर्शयति अभिरुचेरिति। स्वाभिरुचेरिति—पूर्णविश्वासइत्यर्थः। नन्वनुरागेण सहाभिरुचेः पौनरुक्त्यमित्याशङ्क्या-

वेद पुराण प्रसिद्ध भगवत् के किसी नाम में अनुराग होवे उसी से भक्तिलब्ध होवे है ॥ ८ ॥ भगवत् के अनेक नामों में किस नाम का अनुराग भक्ति का हेतु है इस प्रश्न का उत्तर सूत्रसे कहें हैं ( सू० सच यथाभिरुचि ॥९॥ ) अपनी अभिरुचि के अनुसार अनुराग सफल होवे है अभिरुचि के विना अनुराग निष्फल है। ( प्रश्न ) अभिरुचि अनुराग शब्दों का अर्थभेद नहीं प्रतीत होवे है इस वास्ते अभिरुचि अनुराग में कारण कैसे कही( उत्तर )मन को एकाग्र करके श्रवण करो अभिरुचि अनुराग शब्दों के अर्थ का भेद

[1] मा—लक्ष्मी ॥

नुरागाल्लाभाद्भक्तिलाभोन भवेदित्यवश्यमाश्रयणीयेयं भागवती स्वाभिरुचिर्भगवतीतिभावः। नन्वभिरुचिशब्दार्थोऽत्रानुरागशब्दार्थात्कथमतिरिच्यते येन स्वाभिरुचेस्तन्नामानुरागे हेतुभावोभगवता सूत्रकृताभ्यधायीति चेदवहितचेताभव वक्ष्याम्यनुरागाभिरुच्योरतिरेकं तथाहि अयमेव भगवतोनिराकारस्य पूर्णावतारइत्यवतारविशेषे पूर्णविश्वासोभिरुचिः ततोस्यैव भगवतः पूर्णावतारस्य नामानुकीर्त्तनं मे वन्धापनोदकमतोऽस्यैतदेव नामानुकीर्त्तयिष्यामीत्यादिमतिं स्वयमालम्ब्य सदा तस्मिन् प्रेमाभ्यासोऽनुरागस्ततस्तयोः स्फुटमालोकयातिरेकमिति तदित्थं नामानुरागोयथा स्वाभिरुचीतिसिद्धम् ॥ ८ ॥ अथ भवत्वनुरागोभगवन्नाम्नि यथा स्वाभिरुचि परेषां भगवतो भवतोऽनुरागः कुत्र नाम्नि येन नोपि तत्रैवाभिरुचिरुत्प-

---

र्थभेदान्नैवमित्याह नन्वित्यादिना–पूर्णावतारइति । अवतारा ह्यंशादिभेदेन षड्विधाः तथा चोक्तं गर्गसंहितायाम् 'अंशांशोंशस्तथावेशः कलापूर्णः प्रकथ्यते व्यासाद्यैश्च स्मृतः षष्ठः परिपूर्णतमः स्वयम् । येषामन्तर्गतोविष्णुः कार्य्यं कृत्वा विनिर्गतः नानावेशावतारांश्च विद्धि राजन् महामते धर्मं विज्ञाय कृत्वा यः पुनरन्तरधीयत युगे युगे वर्त्तमानः सोवतारः कला हरेः चतुर्व्यूहोभवेद्यत्र दृश्यन्ते च रसा नव अतः परं च वीर्य्याणि स तु पूर्णः प्रकथ्यते यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि तं वदन्ति परे साक्षात्परिपूर्णतमं स्वयम् पूर्णस्य लक्षणं यत्र यं पश्यन्ति पृथक् पृथक् भावेनापि जनाः सोयं परिपूर्णतमः स्वय' मिति ॥ अतिरेकम्-भेदमिति । अन्यन्निगदव्याख्यातम् ॥ ९ ॥ ननु पूर्वत्र भगवन्नाम्नि अभिरुचेः साधारण्यप्रतिपादनात् यथा परेषां यथेष्टं नामोच्चारणादौप्रीतिर्भवति तथैव किमस्माकं भवतां च भवेदिति परनिदर्शनेन सूत्रमवतारयन् संगतिमाह अथेत्यादिना । भगवतः–गुरोः । कुत्र कस्मिन्नाम्नि । नोपि अस्माकं शिष्याणामपीत्यर्थः आचार्य्यवर्य्य इति । आचारे शिष्टाचारे साधव आचार्य्याः आचारशब्दात् 'तत्र साधु' रित्यनेन प्राग्घितीयोयत्प्रत्ययः ।

द्यमाना तन्नामानुरागं च भक्तिं च भगवतः क्षिप्रमेव प्र-
साधयेदिति पृष्ट आचार्य्यवर्य्योऽभिप्रायं स्वं प्राचष्टे—

## सू० रामनाम्नि विशेष-
## स्तदभिधानात् ॥ १० ॥

यद्वा शिष्यादि भिराचरितुं सेवितुमिष्टआचार्य्योगुरुरित्यर्थः । 'चरेराङ्चिागुरा-
वितिवार्तिकेऽगुरावितिपर्य्युदासात् चरगतौ । आङ्पूर्वाच्चरधातोः 'ऋहलो'
र्ण्यदि' ति कर्मणि ण्यत्प्रत्ययः । यद्वा शास्त्रार्थमाचराति सम्पादयति मन्वाद्यु-
क्ताचमनादिसद्व्यवहारमाचरति आचारयाति वाचार्य्यः । 'आचिनोति च
शास्त्रार्थमाचारे स्थापयत्यपि स्वयमाचरते यस्तु स आचार्य्यउदाहृत' इति
स्मृतेः । 'आचरेद्यः स्वयं धर्मं परानाचारयत्यपि हरिप्रभावसम्पन्नआचार्य्यः
सांप्रदायिक' इति शाण्डिल्यवचनाच्च । यद्वा आचार्य्याः स्वस्वमतप्रवर्त्तकाः
शङ्कराचार्य्यप्रभृतयः 'आम्नायतत्त्वविज्ञानाच्चराचरसमानतः यमादियोगसि-
द्धत्वादाचार्य्य इति कथ्यते' इत्युक्तेः । तेषां मध्ये वर्य्यः श्रेष्ठः श्रेष्ठत्वं तु अ
नुपदं व्युत्पादयिष्यामः । यद्वाऽलोलुपत्वादिगुणविशिष्टाह्याचार्य्याइत्युच्यन्ते
'वृद्धा ह्यलोलुपाश्चैव आत्मवन्तोह्यदाम्भिकास्सम्यग्विनीता ऋजवस्तानाचा-
र्य्यान्प्रचक्षते' इति वायुपुराणात् तैरपि वरितुं योग्यइत्यर्थः । यद्वा वेदव्या-
ख्याकृतआचार्य्याः मन्त्रव्याख्याकृदाचार्य्य' इत्याद्यभिधानात्तेभ्योवर्य्य इ-
त्यर्थः । वरयितुं योग्योवर्य्यः । वरईप्सायां चुरादावदन्तः अस्मात् अचोयदि-
तियत्प्रत्ययः यद्वा पूर्वोक्ताचार्य्यैरनिरोद्धव्यइत्यर्थः । अस्मिन्पक्षे 'अवद्यपण्य-
वर्य्या' इति सूत्रेणनिरोधार्थे वृङोयन्निपात्यते इति बोध्यम् । यद्वा वरेषु वर-
दानेषु साधुर्वर्य्यः वरशब्दात्साध्वर्थे यत्प्रत्ययः । यद्वा साङ्गोपाङ्गवेदाध्यापका ये
ते त्वाचार्येति प्रथां लभन्ते तदुक्तं मनुना 'उपनीय तु यः शिष्यं वेदमध्याप-
येद् द्विजः सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' इति तैरपि वरयितुं योग्यो-
वतारत्वादित्यर्थः । अवतारत्वं तु पूर्वभविष्ये षडाननं प्रति ब्रह्मोवाच 'एवं
चाधर्मप्राचुर्य्यं भविष्यति यदा कलौ तदा वै लोकरक्षार्थं म्लेच्छानां नाशहे-
तवे पश्चिमे हि शुभे देशे वेदिवंशे च नानकः नाम्ना च भुविराजर्षिर्ब्रह्मज्ञाने-
कमानसः । भविष्यति कलौ स्कन्द तत्त्ववित् कलया हरेः सश्रीमान् राजशा-
र्दूलानुपदिश्य पुनः पुनः म्लेच्छान् हनिष्यति स्कन्दधर्मतत्त्वोपदेशकृत् तेनोप-

रामशब्दोत्र नार्थम त्रवचनोनामशब्दश्रुतेः किन्तु सार्थस्वरूपवचनः। तथा च रामेत्येवं स्वरूपे भगवन्नाम्नि विशेषः इतरेभ्योभगवन्नामभ्योवैलक्षण्यं महत्त्वं तथाहि सर्वेषां भगवदवताराणां तद्गुणगणानां चाभिधायके अ-

दिष्टे मार्गे वै ये ग्रहीष्यन्ति भूमिपाः ते वै राज्यं करिष्यन्ति तस्य शिक्षानुसारतः तेषां राज्यात् परे काले म्लेच्छा गौरमुखान्नृपाः प्रबलाः सम्भविष्यन्ति प्रजापालनतत्परा' इति। गुरोः सर्वेभ्यः श्रैष्ठ्यं तु अम्बरीषं प्रति विष्णुना स्वयमेवोक्तम् 'तदा नामावतारोमे पश्चाले हि भविष्यति कलिदोषहतप्रज्ञ लोकस्योद्धारहेतवे क्षत्रियाणां कुले शुद्धे नानकेति स्वनामतः अशेषाणां गुरुर्भूत्वा वक्ष्येसिद्धिं स्वयं नृणा'मित्यन्यत्रविस्तरइति संक्षेपः॥ सूत्रं तावद् व्याचष्टे रामशब्दइत्यादिना अत्रसूत्रे रामशब्दः स्वरूपपरः न तु दशरथापत्यराम मात्रपरः तथासति विवक्षितार्थस्यासंग्रहापत्तेः किन्तु अवतारावतार्युभयानुगतचेतनमात्रे बुद्धिसंगमनाय झटित्युपस्थितप्रसिद्धरामरूपार्थाद्बुद्धिः प्रच्याव्यते इत्येतदर्थं हि स्वरूपपरत्वोक्तिरितिभावः। इतरेभ्योभगवन्नामभ्यइति। श्रीपत्यादिनामभ्यइतिबोध्यम्। सर्वेषामवताराणामिति। पूर्वोक्तानामंशाद्यवताराणाम्। यद्वा सर्वेषां मत्स्याद्यवताराणामित्यर्थः। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् अस्यावयवभूतैश्च व्याप्तं सर्वमिदं जगदि'तिचिन्मात्रस्याद्वितीयस्य निष्कलस्याशरीरिणः उपासकानां कार्यार्थे ब्रह्मणोरूपकल्पना'इत्यादिश्रुतेः 'यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः नाभिह्रदम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः यस्यावयवसंस्थानैः कल्पितोलोकविस्तरः तद्वैभगवतोरूपं विशुद्धं सत्त्वमूर्जितम् एतन्नामावताराणां विधानं बीजमव्यय' मित्या-

कहते हैं, यह ही भगवान् निराकार का पूरण अवतार है ऐसे अवतार विशेष में पूर्ण विश्वास को अभिरुचि कहे हैं और उसके नाम में सर्वदा प्रेमाभ्यास को अनुराग कहे हैं इसप्रकार से अभिरुचि का और अनुराग का भेद है सो अपनी रुचि के अनुसार अनुराग करना उचित है॥ ९॥ आप का किस नाम में अनुराग है ताके हम भी उसी नाम में अनुराग करें इस प्रश्न का सूत्रसे उत्तर कहे हैं (सू० रामनाम्नि विशेषस्तदभिधानात्॥ १०॥) अन्य सर्व नामों से विशेष रामनाम है सर्व भगवत् के अवतारों को बोधन करनेवाला होने से रामनाम में हमारा दृढ अनुराग है रामनाम की महिमा सर्व नामों से अधिक है ऐसा श्रुतियों में और स्मृतियों में कहा है॥

स्मिन् रामनाम्नि महत्त्वं श्रूयमाणं स्मर्य्यमाणं चानुरागं दृढतरमास्माकीनमनुवध्नातिनहिनिखिलकल्याणगुणगणागारस्मारके निखिलभगवदवताराभिधायके नाम्नि भवाति भवति मतिरितरेषु नामसु कस्यापि प्रेक्षकस्य कुतोरामनाम्नि विशेषोविज्ञायते इतरेभ्योनामभ्यइतिचेत्तत्राह तदभिधानादिति। तस्य विशेषस्य वेदे स्मृतिषु चाभिधानादित्यर्थस्तथाहि। 'रमन्ते योगिनोनन्ते नित्यानन्दे चिदात्मनि इति रामपदेनासौ परं ब्रह्माभिधी-

---

दिस्मृतेश्च। रत्नाकरेपि 'ब्रह्मा विष्णुश्च रुद्रश्चेत्यादि श्रीरामस्तुतिमाश्रित्य स एव तथाविधः अन्ये तदंशांशा' इत्युक्तमिति संक्षेपः। तद्गुणगणानामिति—तच्छब्दोभगवन्तं तदवतारान् वा परामृशतिवात्सल्यादयोगुणा इतिबोध्यम् तदुक्तं गर्गसंहितायाम्। रमन्ते योगिनोह्यस्मिन् सर्वत्र रमतीति वा गुणैश्च रमयन् भक्तान् तेन रामं विदुः परे' इति। महत्त्वं विशेषत्वं तच्चानेकविधम् अवतारावतार्य्युभयानुगतचेतनमात्रवाचकत्वम् 'श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञितं। ब्रह्महत्यादिपापघ्नमिति वेदविदो विदु' रित्युक्तेः महावाक्यसमानार्थकत्वं सगुणपक्षे मर्य्यादापुरुषोत्तमत्वमित्याद्यूह्यम्। पूर्वोक्तविशेषे रामतापनीयश्रुतिं प्रमाणयति—रमन्तेयोगिनइति। अनन्तेदेशकालवस्तुकृतपरिच्छेदशून्ये नित्ये नियते अवयवविकारशून्ये च आनन्दे सुखैकरूपे चिदात्मनि चिद्घने अमूर्त्तब्रह्मणि योगिनः निरुद्धेन्द्रियग्रामाः रमन्ते ध्यानेन भक्त्यपरपर्य्यायेण तृप्यन्ति इति हेतोः रामपदेनासौ परमात्मा अवतारोवतारी वा परं मुख्यं ब्रह्माभिधीयते इति अस्मिन् पक्षे 'हलश्च' इति सूत्रेण रमधातोरधिकरणे घञिति वोध्यमित्यर्थः। ब्राह्मं वचनञ्च पठति 'यस्मिन्निति विद्यया ज्ञानेनाज्ञाननाशेसति तं गुरुः वसिष्ठः रामेति सुन्दरं नाम चकारेत्यर्थः। व्युत्पत्त्यन्तरं निरुक्ति रमणादिति रमणं रामोभावे घञ् तं करोति रामयतीतिणिजन्तादच् तथा च भक्तान् रमयतीतिफलितमित्यर्थः 'ज्वलादित्वाद्वाण् इतिवोध्यम्। अत्र पौराणिकाः सङ्गिरन्ते। राशब्देन विश्वं मशब्देनेश्वरोगृह्यते तथा च विश्वस्येश्वरोरामइत्यर्थः। तदुक्तं ब्रह्मवैवर्त्ते 'राशब्दोविश्ववचनोमश्चापीश्वरवाचकः विश्वानामीश्वरो योहि तेन रामः प्रकीर्त्तितः' इति यद्वारमया सह रमते इति रामः। 'शेषे' इति सूत्रेण

यते' इति। यस्मिन् रमन्ते मुनयोविद्या ज्ञानविप्लवे तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥ इत्यादयः श्रु-

रमाशब्दादणप्रत्यये आदिवृद्धिः 'तदुक्तं पुराणे' रमते रमया सार्द्धं तेन रामं विदुर्बुधा रमाया रमणस्थानं रामं रामविदोविदु' रिति। यद्वा राया लक्ष्म्या मईश्वरो राम इति तदुक्तं कृष्णजन्मखण्डे 'राचेतिलक्ष्मीवचनोमश्चापीश्वरवाचकः लक्ष्मीपतिं गतिं रामं प्रवदन्तिमनीषिण' इतिअत्रवैय्याकरणा विशेषं संप्रतिपद्यन्ते तथाहि 'विशेषेण स्नातीति विष्णुः विपूर्वकात् स्नाशौचे इत्यस्मात् मृगय्वादित्वा त्कुप्रत्ययः सुषामादेराकृतिगणत्वात् षत्वमिति ऐन्द्राः एवं विष्णुशब्दं निरुच्य तस्माद् रामशब्दः संसाध्यते ऐन्द्रैः। तथाहि विष्णु इति स्थिते सूत्रम् 'अव्यये धात्वर्थे' अव्यये पूर्वपदे सति धात्वर्थेविसर्गौस्याताम्। अर्थात्पूर्वस्य। तत्रापि-अलोन्त्यादिति सूत्रेण वकारोत्तरवर्त्तीकारस्य। ततोविसर्गस्य शत्वाद् 'लोपोव्यो-र्वली' ति वकारस्य लोपः तथा च। 'स्नु' इति जातम् 'धातोरामक्' धातोः प्राक्स्थितयोर्विसर्गयोराऽऽमगागमःस्यादिति विसर्गस्य आमगागमः अत्र मका-राकारस्यनेत्त्वम् अचं दृष्ट्वा विसर्गस्य रेफः तथाच रामस्न इतिजातम्'स्नोर्लोपः' अव्ययपूर्वपदे सति पवित्रार्थकधातोर्लोपः स्यादिति स्नुधातोर्लोपः। उकार-स्यनिमित्तापाये नैमित्तकस्याप्यपाय' इतिलोपः तथाच 'रामेतिसिद्धम् एवं शक्तिशब्दादपि रामस्य सिद्धिं भणन्ति तथाहि 'शक्ति' इति स्थिते ऐन्द्रं सूत्रम् 'विसर्गौ क्रीडार्थेशः' क्रीडार्थे वाच्ये पूर्वसंबन्धिशकारस्य विसर्गौस्तः। ततः 'रारासौ'शकारस्थानिकविसर्गयोरारासौ स्याताम्। रादेशपक्षे'क्तिक्रयोश्छन्द सिमः' इतिक्तिस्थाने मकारादेशे 'रामेति सिद्धम्। एवं शिवशब्दादपि रा-मेत्यभिधानं साधनीयमित्यलमतिनिर्वचनेन ननु पाणिनीयव्याकरणस्यैव वे-दाङ्गत्वात्तेनैव शब्दनिर्वचनमभ्युदयजनकमितिशङ्कायाम्। वार्त्तिकशेषसंहिता-यां शेषनागेनोक्तम् 'द्वीपे द्वीपेपि ग्राह्यं तस्मात्कारणाज्जम्बूद्वीपे पाणिनीयं प्र-वर्त्तते यदापाणिनीयसूत्रेण न रूपसिद्धिस्तदान्यव्याकरणादपि सिद्धिर्नदोषाय' इति। ननु निखिलव्याकरणस्य लोके न प्रसिद्धिरितिवीक्षायाम् पाणिनीये-

---

अनन्त कल्याणकी स्मृति का हेतु रामनाम है इस को त्याग के अन्य नाम में प्रीति किसी विशेषदर्शी की नहीं है अनन्त चैतन्य आनन्दरूप जिस पर-मात्मा में योगी रमण करें उस को रामकहें हैं, ऐसा वेद में कहा है वैसे ही स्मृतियों में भी सर्व में रमण करनेवाले व्यापक ब्रह्मका ही रामनाम है इस वास्ते सर्व नामों में श्रेष्ठ इस रामनाम में जो अनुराग करनेवाले हैं इस राम

तिस्मृतय इतरेभ्योभगवन्नामभ्योरामनाम्नोविशेषं महत्त्वं
ख्यापयन्त्यस्तत्र दृढतरमनुरागं बन्धयन्ति तत्कीर्त्तनाच्च
दृढाभक्तिर्भवद्भिर्लभ्येति समुपदिशन्तितस्मादस्तिराम-
नाम्नीतरनामभ्योविशेषः सएवचालम्बोनोनुरागेतत्रान्य-
तश्चविरागेभवतापितत्कीर्त्यतेचेदलमन्यावलम्बेनेतिम-
हानयमाशयोभगवतःश्रीनानकगुरोरितिदिक् ॥ १० ॥ न-
वमसूत्रस्थचशब्दसूचितरामनामकीर्त्तनमावेदयन् साधक-
सिद्धसाधारणशब्दोच्चारणप्रकारमावेदयति वेदिवर्योगुरु
भक्तिपरायणं गुरुः—

---

नोक्तम् ' पूर्वेइन्द्रपरीक्षास्यात्कात्स्नीं दक्षिणदेशके पश्चिमेऽपिशलीज्ञेया मध्ये च शाकटायनी शेषाख्याउत्तरेज्ञेयाः सर्वाः स्वर्गे च लोकके ' इतिबोध्यम् । ' हरे राम हरे राम राम राम हरे हरे। हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ ' हिमवद्विन्ध्ययोर्मध्ये जनाभागवता मताः । उच्चारयन्ति रामेति येन भागवतोत्तमाः ॥ ' रामेतिकीर्त्तनं राजन् सर्वरोगविनाशनं । प्रायश्चित्तं हि पापानां मुक्तिदं सर्वदेहिनाम् ॥ श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकम् । ब्रह्महत्यादि पापघ्नमि'तिवेदविदोविदुः ॥ श्रीरामरामेति जना ये जपन्ति च सर्वदा । तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः । मुमुर्षूणां सदा काश्यां तारकं ब्रह्मवाचकं । रामरामेत्युपादिशन् सदा सन्तुष्टमानसः ' इति श्रुतिस्मृतिपुराणसंहितादीनामादिपदेन संग्रहः । सएवालम्बोनइति—नोस्माकमनुरागेसविशेषएवदृढतरोहेतुरित्यर्थः । ' सचयथाभिरुची'तिसूत्रे यच्चशब्देनसंसूचितं कीर्त्तनादिकं तत्र कीर्त्तनं कथं कर्त्तव्यमितिवीक्षायां तद्विधायकं सूत्रमवतारयति नवमसूत्रेत्यादिना—साधकेति भक्ताद्विविधाः साधकाः सिद्धाश्च तत्र मुमुक्षवः साधकाः साधनानुष्ठानरताः । कृतानुष्ठाना:जीवन्मुक्ता हि सिद्धा इत्युच्यन्ते तत्र साधकाः स्वबन्धापनोदायभगवन्नामादिकीर्त्तनादिकं कुर्वन्त्येव । ये तु जीवन्मुक्तास्सिद्धास्तेपि भगवद्भक्तिं कुर्वन्ति तदुक्तं श्रीमद्भागवते ' आत्मारामाश्च मुनयोनिर्ग्रन्थाअप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरि'रिति। वेदिवर्य्यइति । वेदाएषांसन्तीति वेदिनः वेदमार्गानुसारेणकर्मानुष्ठातारः क्षत्रियविशेषाः तदुक्तम्' कलावपिध्वस्तसमस्तधर्मे न वेदमार्गात्प्रचलन्ति किंचित् ते क्षत्रियास्तेन गताः

---

नाम का कीर्त्तन करते हैं और अन्य पदार्थों से चित्त को निवृत्त करके एकाग्र करते हैं तिन को दृढ भक्ति प्राप्त होवे है यहां यह आशय है ।

## सू० क्रमेण वाचा त्रय्या तत्कीर्त्तनम् ॥ ११ ॥

त्रिप्रकारा हि शब्दव्यक्तिर्लक्ष्यते ययोच्चारणव्यवहारोव्य वहर्तॄणाम् । सा च पश्यन्ती मध्यमा वैखरीत्येवंरूपा शब्दव्यक्तिरस्ति चतुर्थीति चेन्न तयोच्चारणस्य वाह्यस्या न्तरस्य चाभावात्तद्व्यवस्थाया अग्रेऽभिधास्यमानत्वाच्च तदुक्तम् 'वैखर्य्यामध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् । अनेकतीर्थभेदायास्त्रय्या वाचः परं पदमि'तिऋगप्याह'च-

---

प्रसिद्धिं स्वकर्मणा वेदिनइत्युदाराम् ' । इति तेषु तेषां तेभ्योवा वर्य्यः श्रेष्ठः इतिवेदिवर्य्यः । तदुक्तं भविष्यपुराणे ' पश्चिमे हि शुभे देशे वेदिवंशे च नानकः नाम्ना च भुवि राजर्षिर्ब्रह्मज्ञानैकमानस ' इत्यादि । यद्वा वेदाः सन्त्यस्येतिवे-दी ब्रह्मा तेन वर्य्यः प्रतिपाद्यइत्यर्थः गुरुनानकस्य ब्रह्मकर्त्तृकप्रतिपादने तु स्कन्दभविष्यपुराणीया कथानुसंधेयेति बोध्यम् । गुरुभक्तिपरायणमिति । मु-मुक्षुमितिशेषः ।' यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्य-र्थाः प्रकाशन्ते महात्मनः॥ 'इतिश्रुतेः ' यावदायुस्त्वयोवन्द्यावेदान्तो गुरुरीश्वरः आदौ विघ्नप्रसिद्ध्यर्थं कृतघ्नत्वापनुत्तये ' इतिस्मृतेः ' गुरुभक्तिं विना नैव ह-रिभक्तिःफलप्रदा । हरिभक्तिं विनाप्येषा गुरुभक्तिःफलप्रदा 'इतिशाण्डिल्यसं-हितावचनाच्च गुरुभक्तिरवश्यमनुष्ठेयेति भावः परायणं तत्परमित्यर्थः । सूत्रं व्याचष्टे त्रिप्रकारा हीत्यादिना सूत्रे त्रय्येति त्रयोवयवायस्या वाचइति त्रयी तयेत्यर्थः । सूत्रेक्रमेणेतिपदं वस्तुस्थितिप्रदर्शनपरं न तु कीर्त्तने क्रमोनियम्यते आरोहावरोहव्युत्क्रमेणापि कीर्त्तनस्य संभवात् पुरुषेच्छाधीनत्वाच्च कीर्त्तनस्ये-तिध्येयम् । वाचेति पूर्वतः शब्दव्यक्तिरनुषज्यतेइति । ननु वाचात्रय्येत्यल्प-मिदमुच्यते यतः ' चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये म-नीषिण ' इति ऋचि वाचश्चतुरात्मत्वं श्रूयते इत्याशङ्क्य तस्याः पराख्याया-श्चतुर्थ्या विशिष्टवाह्यव्यवहारोपयोगित्वाभावान्नैवमित्याह शब्दव्यक्तिरस्तिच-तुर्थीति । चोदिति । पराख्या चतुर्थ्यपि शब्दव्यक्तिरस्तीत्यर्थः । तत्रेतिपराख्यायां चतुर्थ्यवस्थायामित्यर्थः अग्रेभिधास्यमानत्वाच्चेति 'तत्काष्ठां चतुर्थीम्प्राहु' रिति

त्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहात्रीणि निहिता नेङ्गयन्ति तुरीयं वाचोमनुष्या वदन्ती' ति तत्र पश्यन्ती वाक् लोकव्यवहारातीतापि दृढ़ानुरागं निराकारे रामावतारेऽनुवध्नद्भिर्भगवद्भक्तैर्भक्तिमहिम्ना योगिकल्पैरनल्पप्रज्ञैरनुभूयते ॥ यतो

---

सूत्रे इतिशेषः।त्रय्याएव विशिष्टव्यवहारोपयोगित्वमित्यत्र प्रमाणमाह तदुक्तमिति। वाक्यपदीये श्रीभर्तृहरिणेतिशेषः । यदैतद् वैखर्य्यादिभ्यः परं पराख्यं पदं सर्वासामास्पदं तदैतदद्भुतं किमप्यनिर्वचनीयं ज्ञप्तिमात्रस्वरूपमित्यर्थः तदुक्तं श्रीनन्दिकेश्वरेण 'सर्वम्परात्मकपूर्वं ज्ञप्तिमात्रमिदं जगत् ज्ञप्तेर्वभूव पश्यन्ती मध्यमा वाक् ततः स्मृता वक्रे विशुद्धचक्राख्ये वैखरी सा मता ततः सृष्ट्याविर्भावमासाद्य मध्यमा वाक् समा मते' ति। अत्र तीर्थपदेन तत्तद्दर्शनकर्त्तार आचार्य्यागृह्यन्ते इति बोध्यम्। भर्तृहर्य्युक्तमृचा प्रमाणयति ऋगप्याहेति चत्वारि वागित्यादिना । नाभिहृदयविशुद्धचक्राख्यासु गुहासु त्रीणि परा पश्यन्ती मध्यमा ख्याया वाचः पदानि वचांसि क्रमेण निहितानि स्थापितानि सन्ति नेङ्गयन्ति न वाह्यवाग्जालव्यवहारं प्रकाशयन्ति तुरीयं तु वाचः पदं वैखर्य्याख्यं मनुष्यावदन्तीत्यर्थः । गुहेत्यत्र निहितेत्यत्र च सुपांसुलुगित्यनेन क्रमेण सप्तमीप्रथमयोर्लुगितिबोध्यम् । यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी श्लिष्टव्यक्तवर्णसमुच्चारणप्रसिद्धसाधुभावा भ्रष्टसंस्कारा च दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यपरिमितभेदा मध्यमात्वन्तःसन्निवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना सूक्ष्मा प्राणवृत्त्यनुगता प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः । पश्यन्ती तु सा चलाचला प्रतिवद्धसमाधाना सन्निविष्टज्ञेया कारमितिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा च प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमितभेदा । तत्रपश्यन्त्याअन्वर्थतां व्याचिख्यासुर्भूमिकां तावद् रचयति तत्रेत्यादिना पश्यन्तीवाक् भगवद्भक्तैरनुभूयते इत्यन्वयः । लोकव्यवहारातीतापीति इदं पश्यन्त्याः स्वरूपकथनम् 'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमे' तिभारतोक्तेः।वाह्यलोकव्यवहारातीतेत्यर्थः॥ 'रामावतारे इति निराकारे इति च लिङ्गात्' रामइत्या-

---

शब्द उचारण के क्रम को कथन करे हैं ( सू० क्रमेणवाचात्रय्या तत्कीर्तनम् ॥११॥ ) पश्यति मध्यमा वैखरी तीन प्रकार की बाणी है जिस में

भगवन्तं पश्यन्तस्तां पश्यन्ति सा च स्वयं भगवन्तमभिदधाना ज्ञानमिवाभिधेयं तत्त्वं विषयीकुर्वाणा वर्त्तते ततः सोच्यते पश्यन्तीपदेन प्रज्ञैः मध्यमा तु पदप्रत्यक्षानुपपत्त्या सर्वेषां व्यवहारकारणभावमनुभवन्ती भक्तैर्हृदयप्रदेशे धारणया धार्य्यते येन बाह्यवाग्व्यवहारोपरमेपि नोरामनामानुरागोरामनामानुकीर्त्तनं च न विच्छिन्नधारं

---

दयोवतारायस्य तस्मिन् अवतारावतार्य्यनुगतचेतनेइत्यर्थः । ' चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः उपासकानां कार्य्यार्थे ब्रह्मणोरूपकल्पना ' इत्यादिश्रुतेः । तामिति—पश्यन्तीमपीत्यर्थः सा च-पश्यन्ती च । स्वयमिति कर्मणः कर्तृत्वविवक्षयेयमुक्तिरितिभावः । भगवन्तमभिदधानेति । प्रकृताभिप्रायेणेतिबोध्यम् । ज्ञान मिवेति । यथा ज्ञानं स्वयं स्वं विषयं प्रकाशयत् ज्ञानमित्युच्यते तथा पश्यन्तीवागपि स्वयं स्वं विषयं प्रकाशयन्ती सती पश्यन्तीत्युच्यते इदमेवास्याअन्वर्थज्ञामित्यर्थः । एवं मध्यमायाअप्यन्वर्थतां निर्वक्तुमाह मध्यमात्वित्यादिना । पश्यन्तीवैखर्य्योर्मध्ये भवा मध्यमा 'मध्यान्मः' इति मप्रत्ययः । मध्यमायाः स्वरूपमाह पदप्रत्यक्षानुपपत्त्येति यतः केवलं बुद्ध्युपादानकक्रमरूपानुपातिनीत्वेन प्रतिसंहृतवाह्यक्रमा अतएव पूर्वोच्चराक्षरवाह्यक्रमाधीनपदप्रत्यक्षानुपपत्तिरित्यर्थः । तस्मात् सर्वेषां पदानां पुरुषाणां वा व्यवहारकारणभावं वाह्यशब्दप्रयोगरूपव्यवहारस्य कारणत्वं अनुभवन्ती संपादयन्ती । मध्यमा वाक् तु भक्तजनैर्हृदयप्रदेशमध्ये धारणया धार्य्यते इत्यन्वयार्थः । हृदयप्रदेशेधार्य्यते इत्यनेन मध्यमाया अन्वर्थत्वं सूचितम् तथाहि हृदयप्रदेशमध्ये मन्यते धार्य्यते इति मध्यमा । मनधृतौ अस्मात् ' अन्येभ्योपि दृश्यते ' इत्यत्र दृशिग्रहणात्परिखादिवत्कर्मणिडप्रत्ययः डित्वाट्टिलोपः तदुक्तं भारते

---

उच्चारण व्यवहार होवे है चतुर्थ वाणीको कि जिस में किसी का भी उच्चारण व्यवहार नहीं होवेहै सो आगे कहेंगे यद्यपि पश्यंती वाणीलोक व्यवहार अतीत है तथापि जो दृढानुरागवाले योगियों के समान भक्त हैं सो पश्यंती वाणी से परमात्मा को साक्षात् जानते हैं जैसे ज्ञान का स्वरूप है वैसे पश्यंतीका स्वरूप है इसको पूर्ण प्रेम वाले अत्यन्त अन्तर्मुख भक्ति जानते हैं इसको ही योगी साक्षात्काररूप कहे हैं इस पश्यंती के अपरोक्ष होने से आत्मा में संशय विपर्यय सर्व नष्ट होजाते हैं ।

स्यादितिसंकल्पयमानैरेवं च सत्यसंकल्पपरायणा मध्य-
माधारणायां प्रवर्त्तन्ते प्राज्ञाः वैखरी तु वाक् सर्वलोकवा
गभिव्यङ्ग्या श्रोत्रनिर्ग्राह्या सा चाप्यनर्थजल्पनतोऽव्यावर्त्त्य
परमार्थवहरामनामानुकीर्त्तनपरा कार्य्या कविभिः पुण्य-
कर्मकुशलैरिति सर्वथापि वाह्याभ्यन्तरभेदभिन्नवाचोऽव्या
पारोरामनाम्नि प्रवर्त्यइत्याशयोत्राचार्य्यस्य श्लिष्यते तरा-
मित्यादिकं युक्तिवृन्दं बहुतरमूह्यम् ॥ ११ ॥ अथ भ-

---

'केवलं बुद्ध्युपादानक्रमरूपानुपातिनी प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रव-र्त्तते' इति। वाह्यवाग् वैखरी 'गौरिव प्रसवत्येकारसमुत्तमशालिनी' इत्यु-क्तेः। तस्या व्यवहारः शब्दप्रयोगः। 'परस्परंमनुष्याणां स्वार्थविप्रतिपत्तिषु वाक्यान्न्यायाद् व्यवस्थानं व्यवहारउदाहृतः' इत्युक्तेः। तस्योपरमकाले पीत्यर्थः। यद्वा वागिन्द्रियं गृह्यताम्। नोस्माकम्। रामनामानुकीर्त्तनमिति-मानसं रामनामानुकीर्त्तनं चेत्यर्थः। एवं च न पूर्वोत्तरग्रन्थविरोध इति मन्त-व्यम्। स्या दितीतिशब्दः संकल्पमभिनयतीति बोध्यम्। तृतीयां व्याचष्टे। वैखरीत्वित्यादिना वाक् वागिन्द्रियम्। तेनाभिव्यज्यमाना विशेषेण खेन श्रो-त्ररूपाकाशेन रायते गृह्यतेइति विखरा। राआदानेघञर्थेकर्मणि कप्रत्ययः। ततः स्वार्थेऽणि वृद्धौ टिड्ढाणिति ङीपि वैखरीति सिद्धमित्यन्वर्थतामभिप्रेत्याह श्रोत्रनिर्ग्राह्येति। स्वपरसाधारणश्रोत्रेणग्राह्येत्यर्थः। एतेनोपांशुजपादौ नाव्या-प्तिरितिभावः वागभिव्यङ्ग्येति तु प्रकृताभिप्रायेण अन्यथा वेणुवीणादिभेदभि-न्नाया वैखर्य्या असंग्रहः स्यात्। अतएवविशेषेण खेन कण्ठविवरेण राजते प्रकाशते इति न व्युत्पाद्यते। तदुक्तं पुण्यराजेन। 'यस्याः श्रोत्रविषयत्वेन प्र-तिनियतं श्रुतिरूपं सा वैखरी श्लिष्टव्यक्तवर्णसमुच्चारणप्रसिद्धसाधुभावा दु-न्दुभिवेणुवीणादिशब्दरूपा चेत्यपरिमितभेदा' इति बोध्यम्॥ ११॥ पूर्वोक्त

---

पद प्रत्यक्ष का विषय मध्यमावाक् है इसको साधुजन हृदयदेश में धारण करते हैं इसके अभ्यास से वाह्य बाणी से उपराम होनेपर भी अनुराग कीर्तन भक्तों को सदा बना रहता है वैखरी वाणी सर्व पुरुषों के कर्णगोचर होवे है जिव्हादि करके अभिव्यक्त होवे है सो वैखरी को भी वाह्य अनर्थों से निवृत्त करके राम-नाम के प्रेम में लगाना योग्य है अबकी अवधि को कहे हैं (सू० तत्काष्ठां चतुर्थीम्प्राहुः ॥२१॥) तीन प्रकार की बाणी से विलक्षण चतुर्थी बाणी को बाणी प्रवृत्ति का अवधिरूप योगी कहे हैं।

न्स्यामोरामनाम्न्यनुरागं त्रिविधया च वाचा तत्कीर्त्तयिष्यामःपरं चास्यावाचोऽवसानं वाच्यं न तेन विना निरुपाधिकनिराकारभक्तिर्भवितुमर्हति ‘यच्छेद्वाङ्मनसी प्राज्ञ’इतिश्रुतौ वाग्यमनस्यभक्तिसाधनत्वाभिधानादिति चेत्तत्राह—

## सू० ॥ तत्काष्ठां चतुर्थीम्प्राहुः १२

तस्यास्त्रिविधाया वाचः काष्ठामवसानभूमिं चतुर्थींत्रिविधाविलक्षणां परां प्राहुः प्राज्ञाः परमात्मभक्तामहर्षयः ॥ तथाचब्रुवन्ति‘स्वरूपज्योतिरेवान्तः परावागनपायिनी’

---

वाचस्त्रयीत्वमुत्सूत्रमाक्षिप्य समाधातुं सूत्रमवतारयति अथेत्यादिनाभन्त्स्याम इति रामनाम्निसम्यक्वद्धमनुरागंकरिष्यामइत्यर्थः। वन्धधातोर्लृटिरूपमितिवोध्यम्। परंच—परन्तु॥ अवसानम्—अवरोहक्रमेणमूलं ज्ञप्तिरूपं वाक् त्रयीवीजभूतमितियावत्। वाक्त्रयीमूलपराख्यवाचिकठश्रुतिं पठति ‘ यच्छेद्वाङ्मनसीप्राज्ञइती’ति प्राज्ञोविवेकीमनसिवाचं यच्छेत् नियच्छेदुपसंहरेदित्यर्थः। यन्मनसाध्यायतितद्वाचावदती’तिश्रुत्या स्थूलवाक्त्रयं ज्ञानकारणीभूतमनउपाधिकायां पराख्यायां सूक्ष्मवाचि नियच्छेन्निरुन्ध्यादितिप्रकृतोपयुक्तोर्थः। ‘ज्ञप्तेर्वभूवपश्यन्ती मध्यमा वाक् ततः स्मृता ’ इत्युक्तेः। वागित्यत्र द्वितीयालोपश्छान्दसोमनसीत्यत्रदैर्ध्यंचेतिवोध्यम्। ताः काष्ठा यस्या इति वहुव्रीहिसमासभ्रमं वारयन् सूत्रं व्याचष्टे तस्याइत्यादिना तिसृभ्योवैलक्षण्यं त्वस्फुरत्वादीतिवोध्यम्। पूर्वोक्तेर्थे प्रमाणमाह तथा च ब्रुवन्ति इति व्यासादयोमहर्षयइति शेषः। स्वरूपज्योतिरिति। ज्ञप्तिस्वरूपा नित्यावागित्यर्थः। अन्तरिति तु स्थानप्रदर्शनं कृतमितिमन्तव्यमिति। परां प्रकृत्येदं पठ्यते ‘ स्वरूपज्योतिरेवान्तस्सैषावागनपायिनी सैषा संकीर्य्यमाणापि नित्यमागन्तुकैर्मलैः अन्त्याकलेव सोमस्य नात्यन्तमभिभूयते। तस्यां दृष्टस्वरूपायामधिकारोनिवर्त्तते पुरुषे षोडशकले तामाहुरमृतां कला’मिति सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्त्तवदनाख्येयपरिमाणा तुरीयेण भागेन मनुष्येषु प्रत्यवभासते तत्रापि चास्याः किंचिदेव व्यावहारिकमन्यत्तु सामान्यव्यवहारातीतमिति निर्गलितोर्थः। दृष्टस्वरूपायामिति—प्रकाशितं स्वरूपं यस्याः तस्यां संपद्यमानायाम्। ब्रह्मज्ञानरूपेण

ति 'तस्यांदृष्टस्वरूपायामधिकारोनिवर्त्तते' इति च तस्मादस्यास्त्रिविधाया वाचः परा पराभिधाना चतुर्थीवाग् वाचां तासामवसानभूमिरित्यनवद्यम् ॥ १२ ॥ भवतु वाग्विभागस्यानिष्ठा तुरीयायां पराभिधानायांततस्तुपरमपिकिंचिदवशिष्यतेनवेति सन्देहे सति—

## सू० नातः परमभावात् ॥ १३ ॥

अतः पूर्वाभिहितायास्तुरीयाया वाचः परं नास्ति किंचिदवशिष्टं यच्छिष्याय शिष्यादाचार्य्यः सैव तु परा तुरीया वाचामवसानभूमिर्या शिष्टा पूर्वमिति न शिष्यायावशिष्टमनुशासितव्यमस्ति कुतोऽभावात् चतुर्विधवाक् सद्भावे प्रमाणसद्भावस्य दर्शितत्वादपरस्य च वाग्विशे-

---

परिणतायामधिकारोधिकःकारःकर्मबन्धोनिवर्त्ततेइतिभावः 'भिद्यतेहृदयग्रन्थि' रित्यादिश्रुतेः । अतएव परात्वेनोपसंहरन्नन्वर्थतामाह तस्मादित्यादिना । परा-सर्वोत्कृष्टा 'सा काष्ठा सा परागति' रितिश्रुतेरित्यर्थः ॥ १२ ॥ ननु 'सा काष्ठा सा परागति' रितिश्रुतौ यथाऽवधिप्रदर्शककाष्ठाशब्दश्रवणादपितदतिरिक्तत्वेनावधिर्मतआशङ्कायामवधिमत्त्वमपि परागतिपदेन ब्रह्मणएवदर्शितं तथात्रापि किमस्तिनवेत्युत्सूत्रं संशय्य समाधत्ते सूत्रकारः 'नातः परमभावादिति' इत्येवं सूत्रमवतारयति भवतुवाग्विभागस्यनिष्ठेति । तुरीयायां पराभिधानायां वाचोनिष्ठा अवसानं पूर्वोक्तं भवत्वित्यन्वयार्थः । संदेहे सति संशये सतीत्यर्थः । सूत्रं व्याचष्टे अतःपूर्वाभिहितायाइति । परमितिसजातीयवाचोपेक्षया परं पदं काचिद्वाङ्नास्तीत्यर्थः इति बोध्यम् । यत् परं वाचः पदं शिष्याय शिष्यम् शिष्यादुपदिशेदित्यर्थः ॥ शिष्टा- ' उपदिष्टा-परिशिष्टावा अवशिष्टामिति । पञ्चमं वाग्विशेषस्वरूपम् । प्रमाणसद्भावस्येतितदुक्तमित्यादिना प्रमाणस्य दर्शितत्वादित्यर्थः । नन्व 'प्रतिषिद्धमनुमतं भवती'तिन्यायेन पञ्चम्यपि वाक् स्वीक्रियतामित्यतआह अपरस्य चेति प्रमाणाभावात्पञ्चमी वाङ् नस्वीक्रियते प्रमाणवादीभिरितिभावः ॥ १३ ॥ ननु 'इन्द्रियेभ्यः पराह्यर्था । अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः

षस्य पञ्चमस्य सद्भावेऽभावात् प्रमाणाभावादित्यर्थः।१३॥ अथ भवतु वाचां चतुर्थी वागवसानभूः परन्तु ततः परमभावं न मन्यामहे कस्यापि वस्तुनः परब्रह्मणएव 'यतोवाचोनिवर्त्तन्ते' इति श्रुत्या वाचः परस्य सद्भावसमर्थनाद् युक्तं चैतदन्यथा जगदान्ध्यं प्रसज्येतातआह—

## सू० तद्ब्रह्मेतिब्रह्मवादिनः॥१४॥

सत्यमेतत्तथापि याद्धि प्रवर्त्तते तदेव निवर्त्तते यच्च न कदापि प्रवर्त्तते न तत्कदापि निवर्त्तते निवृत्तेः प्रवृत्ति-

---

पुरुषान्नपरं किंचित्सा काष्ठा सा परागति'रिति श्रुतौ सर्वेभ्यः परत्वेन ब्रह्मणः श्रवणात् 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेद् ज्ञानआत्मनि ज्ञानमात्मानि महति नियच्छेत्तद्यच्छेच्छान्तआत्मनी'तिश्रुतौ च सर्वेषां वागादीनां सर्वेभ्यः परत्वेनोपलक्षितब्रह्मणि नियमनश्रवणात् 'यतोवाचोनिवर्त्तन्तेऽप्राप्य मनसा सहेति' श्रुत्या च परत्वसद्भावानुमितत्वात्कथं सूत्रकारेण 'नातःपरमभावादि'त्युक्तमित्युत्सूत्रमाक्षिप्य समाधातुं सूत्रमवतारयति अथेत्यादिना अभावं शून्यमित्यर्थः। कस्यापि अज्ञातस्यापि ब्रह्मणइत्यर्थः। परस्य—परत्वेनाभिमतस्य यच्छेद्वाङ्मनसी—यतोवाचोनिवर्त्तते' इत्यादिश्रुतौ प्रवृत्तिशीलायाः स्थूलवाक्त्रय्याएव नियमनिवृत्त्यादि प्रतिपाद्यते न तु पराख्याया वाचस्तस्याः ज्ञप्तिस्वरूपत्वात् 'वाचाविरूपनित्यया' इति श्रुतेर्नित्यत्वाच्च सा च ब्रह्मस्वरूपैवाभिलप्यते ब्रह्मवादिभिरिति सूत्रं व्याचष्टे सत्यमित्यादिना। सत्यमिद्ध्यङ्गीकारे। निवृत्तेः प्रवृत्तिपूर्वकत्वादिति। सद्भ्यामभावोनिरूप्यतेइति न्याये-

---

हृदय में ज्योतिःस्वरूप परावाणी है उस के जानने से कर्तव्य की समाप्ति होवे है ऐसा महाभारत में भी कहा है॥ १२॥ परावाणी से परे भी कुछ है या नहीं इस शङ्का का समाधान सूत्र से करे हैं (सू० नातः परमभावात्।१३। चार प्रकार की वाणी है परापश्यन्ती मध्यमा वैखरी और पंचम वाणी में कोई प्रमाण नहीं है इस वास्ते पंचम वाणी नहीं है॥ १४॥ चतुर्थ वाणी के परे ब्रह्म है आप ने कैसे कहा है चतुर्थ वाणी से परे कोई वस्तु नहीं इस शंका का समाधान सूत्र से करे हैं (सू० तद्ब्रह्मेति ब्रह्मवादिनः॥१४॥ सो चतुर्थ वाणीब्रह्मरूपहै ब्रह्मसे भिन्न चतुर्थ वाणी कोईनहींहै ऐसे ब्रह्मवादीकहेहैं

पूर्वकत्वात् तथा च त्रिविधा वाचःप्रवर्त्तन्ते ता निवर्त्तन्तां नाम तुरीया तु वाक् क्वापि कदापि कस्यापि न प्रवर्त्तते'नातोयतो वाच ' इतिश्रुतिस्थवाक्पदोपादेया भवितुमर्हति किन्तु त्रिविधवाक्प्रवृत्तिविरहाधिकरणं ब्रह्मतत्त्वमेव तुरीयापरा वागित्यभिधीयते इति ब्रह्मवादिनोवदन्ति तदितिविधेयापेक्षं क्लीवभावम्मन्यते ननु यूयं किन्नब्रह्मवादिनइतिचेन्न वयं ब्रह्मवादिनोब्रह्मशब्दस्यानेकार्थत्वाद्ब्रह्ममीमांसाऽप्रतिज्ञानाच्च किन्तु वयं निराकारपरब्रह्मवादिनः तेपि तु स्वयूथ्याइति कृत्वा तेषां सम्मतिरुद्भाविता भगवतेति बोध्यम् ॥ १४ ॥ ब्रह्मवादिनइत्युक्त्या तदभि-

---

नाभावस्य प्रतियोगिसापेक्षत्वादित्यर्थः । क्वापीति—तुरीया तु वाक् कस्यापि पुरुषस्य कण्ठादिस्थाने कदापि न प्रवर्त्तते इत्यन्वयार्थः । तदुक्तम् ब्राह्मणगीतायाम् 'गौरिव प्रस्रवत्येका रसमुत्तमशालिनी दिव्या दिव्येन रूपेण भारती गौः शुचिस्मिते एतयोरन्तरम्पश्य सूक्ष्मयोः स्पन्दमानयोः प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति अन्यात्वपरिमाणेव विना प्राणेन प्रवर्त्तते जायते हि ततः प्राणोवाचमाप्याययन्पुनः प्राणेनाप्यायिता सैव व्यवहारनिबन्धनम् सर्वस्योच्छ्वासमासाद्य नवाग् वदति कर्हिं चित् घोषिणी जातनिर्घोषा अघोषा च प्रवर्त्तते तयोरपि च घोषिण्या निर्घोषैव गरीयसी 'ति वयं ब्रह्मवादिनइति वयमपिब्रह्मवादिनइति । यद्वा न वयमितिच्छेदाद्वयं न ब्रह्मवादिनइत्यन्वयो बोध्यः । कुतोऽतआह ब्रह्मशब्दस्येति । 'ब्रह्म तत्त्वं तपोवेदो ब्रह्मा विप्रः प्रजापति'रिति कोशात् नपुंसकब्रह्मशब्दस्य तत्त्वादिवाचकत्वेनानेकार्थत्वस्वीकारेपि ब्रह्मवादिनइतिप्रथां कथं लभध्वमित्यतआह ब्रह्ममीमांसाऽप्रतिज्ञानाच्चेति । अयंभावः । यथाब्रह्ममीमांसाप्रघट्टकस्थब्रह्मशब्दवादाद् यूयं ब्रह्मवादिनइति प्रसिद्धिमालभध्वंतथातथा निराकारब्रह्ममीमांसाप्रघट्टकब्रह्मशब्दवादात् वयमपि ब्रह्मवादिनइति काक्षतिरितिबोध्यम् न हि तैरपि अस्माकं द्वेषस्तेषामस्मदीयत्वादित्याह तेपि त्विति ।—इतिकृत्वा—इत्यभिप्रेत्य—वेदान्ते जैमिनिसम्मतिवन्नात्रतत्सम्मतौ दोषइतिभावः ॥ १४ ॥ तद्ब्रह्मेतिब्रह्मवादिनइत्यत्र

मतमेवेदं न नोऽभिमतामिति न मन्तव्यम् किन्तु नोऽभिमतमिदं तेषामप्यभिमतमिति योज्यामिति स्वाशयमाचष्टे-

सू० ब्रह्मवादिनोप्य-
स्मदीयाः ॥१५॥

ब्रह्मवादिनो 'थातोब्रह्मजिज्ञासे' त्यारभ्य 'अनावृत्तिः शब्दादित्यन्तं' वेदान्तानामद्वये ब्रह्मणि समन्वयमाचक्षाणा व्यासमहर्षयोपि अस्मदीया अस्मदनुकूलाः। अपिशब्दात्तत्सूत्रभाष्काराः शङ्कराचार्य्याअपि स्वमतानुकूलाः सूचिताः नत्वस्मत्प्रतिपक्षास्ते तेषामप्यन्ततोनिराकारे निष्ठादर्शनात् शब्दभेदस्याभिप्रायवशेनार्थविशे-

---

ब्रह्मवादिनइतिविशेषोपादानात्स्वास्मिन अब्रह्मवादित्वशङ्कां प्राप्तां सूत्रेण प्रत्याचष्टे ब्रह्मवादिनोप्यस्मदीया इति अस्मदीयाअस्मदनुकूलाइत्यर्थः। भाष्ये व्यासमहर्षयइति। अत्रव्यासपदेन कृष्णद्वैपायनोगृह्यते 'वसिष्ठश्चाष्टमे व्यासः परिवर्त्ते भविष्यति कपिलश्चासुरिश्चैव तथा पञ्चशिखोमुनि'रित्यादौ व्यासानां वहुत्वेन स्मरणात् 'व्यसतीति व्यासः यद्वा वेदान् व्यसतीति व्यासः पूर्वत्र विपूर्वकात् असधातोर्ज्वलादित्वादण् प्रत्ययः। उत्तरत्र तु कर्मण्याणि' ति कर्त्तर्यण्प्रत्ययः 'विनापि प्रत्ययमि'ति वार्त्तिकेन वेदपदलोपे-शिष्टोव्यासशब्दः कृष्णद्वैपायनमाचष्टे 'तथा च भारतम् 'ब्रह्मणोब्राह्मणानाम् च तथा-

---

इहां "ब्रह्मवादिनः" इस कहने से संमति सूचन करी है अरुचि में तात्पर्य्य नहीं है इस आशय को सूत्र से प्रकट करे हैं ( सू० ब्रह्मवादिनोप्यस्मदीयाः ॥ १५ ॥ ) "अथातोब्रह्मजिज्ञासा" इस सूत्र से लेकर "अनावृत्तिःशब्दात्" इस सूत्रपर्यन्त चार अध्यायों से वेदान्त का समन्वय अद्वैतब्रह्म में कहने वाले श्रीव्यासमुनि और सूत्रोंपर भाष्य करने वाले श्रीशंकराचार्य इत्यादिब्रह्मवादि निराकारमीमांसकों के अनुकूल हैं ब्रह्मशब्द से उनका भी निराकार मेंही तात्पर्य प्रसिद्धहोवे है। ब्रह्मवादि हमारे लेश मात्र भी प्रतिकूल नहीं हैं ॥ १५ ॥

षसमर्पकत्वात् तस्मादत्र तेषां संमतेर्थैऽस्माकीना सम्मतिरेव नात्रारुचिरुद्भावनीयेतिभावः ॥ १५ ॥ नन्वस्तीषद्वैषम्यं ब्रह्मवादिनां निराकारमीमांसकानां च परस्परं यतस्तेज्ञानहेतुमोक्षवादिनोनिराकारमीमांसकास्तु भक्ति निमित्तकमुक्तिवादिनइति न चैतद्वैषम्यमिष्टमेवातएवास्य तदुत्तरदर्शनस्यारम्भइतिवाच्यम् भक्तिज्ञानयोरेवं सति वैषम्यापत्तेर्युक्तं चैतत् साक्षाज्ज्ञानस्य मोक्षसाधनत्वाद्भक्तेश्च ज्ञानकारणत्वात् कारणकार्य्योंभयभेदस्य च सर्वसम्मतत्वादितिचेत्तत्राह ॥

## सू० भक्तिज्ञानवैषम्यमिति चेन्नावस्थया तद्धतोपि तथाप्रसंगात् ॥ १६ ॥

भक्तिश्च ज्ञानं चेत्येतौ पदार्थौ न भिन्नौ मन्यामहे

---

नुग्रहकांक्षया विव्यासवेदान्यस्मात्सतस्माद्व्यासइतिस्मृतः' इति व्यासधातुर्वा कल्पनीयः । घञ् तु न 'अकर्त्तरिचेति' पर्य्युदासात् अर्शआद्यचिं तु साधुरिति बोध्यम् ॥ १५ ॥ आक्षेपसङ्गत्या सूत्रमवतारयति । नन्वस्तीत्यादिना ते ब्रह्मवादिनः । ज्ञानहेत्विति–ज्ञानं हेतुर्यस्मिन् मोक्षे सः ज्ञानहेतुर्मोक्षस्तं वदन्तीति विग्रहार्थः । भक्तिनिमित्तकमुक्तिवादिनइति । इदं तु अन्यमताभिप्रायेणाक्षेपमात्रमेव क्रियते निराकारमीमांसादर्शने तु पूर्वं ज्ञानं पश्चाद्भक्तिस्ततोमोक्षइत्यसकृदवोचाम इतिबोध्यम् । निराकारमीमांसाया अन्यथानुपपत्त्याऽऽभासेन वैषम्यं शङ्कते न चेत्यादिना । अस्य तदुत्तरदर्शनस्यारम्भइति । तस्मात् ब्रह्मवादिदर्शनादुत्तरस्य तस्य निराकारदर्शनस्यारम्भइत्यन्वयार्थः । भक्तिज्ञानयोरिति । भक्तेर्भुक्तिः फलम् ज्ञानस्य मोक्षः फलमिति वैषम्यमित्यपि परमताभिप्रायेणैव फलभेदेन वैषम्यमिति मन्तव्यम् । भक्तेर्ज्ञानकारणत्वं तु पुष्कलं प्रमाणमभिहितं प्रागितिस्मर्त्तव्यम् । सूत्रे फलभेदादितिहेतुर्योजनीयः । पूर्ण-

पूर्णभक्त्यन्तिमावस्थारूपत्वाद्विज्ञानस्य तादृशस्वीयान्तिमावस्थारूपविज्ञानाच्चेद् भक्तिर्भिद्येत कामन्तर्हि कौमाराद्यवस्थाभेदेनावस्थावतोपि देहादेर्भेदोऽभाणि भवता न चैवं दृश्यते ततोन भक्तिज्ञानभेदोस्ति किन्तु भक्त्येकदेशत्वेनाभेदएव ज्ञानस्य भक्त्याऽऽस्थेयइतिभावः ॥ १६ ॥

अथ भिद्यन्तां कौमाराद्यवस्थाभेदेन तद्भाजोदेहादय इति किमनिष्टमापादितं भवता तद्भेदेन तद्भेदस्येष्टत्वादित्यतआह

## सू० इष्टापत्तौप्रमाणानुपलम्भः ॥ १७ ॥

नह्यवस्थाभेदेन तद्वतोभेदोङ्गीकाराहस्तथा सति प्रमा-

---

भक्त्यन्तिमावस्थारूपत्वादिति । अत्र समासभेदेनार्थभेदोनिरूपितएव पूर्वत्रेति ततएव द्रष्टव्यः । भक्तिरिति । साधनभक्तिपक्षे भक्तिर्ज्ञानाय परिणमतेइति प्रसिद्धेर्भक्त्या सह ज्ञानस्याभेदः । कार्यकारणयोरभेदोपचारात् फलीभूतभक्तिपक्षे तु ज्ञानेन सह भक्तेरभेदइति विवेकोत्रानुसंधेयइतिदिक् ॥ १६ ॥ अवस्थया तद्वतोपि तथाप्रसंगादित्यनिष्टापत्तिमाक्षिप्य सूत्रमवतारयति अथ भिद्यन्तामित्यादिना । देहादयइति । आदिनेन्द्रियाद्यवयवागृह्यन्ते । देहादिभेदेप्रमाणाभावादेवानिष्टापादनं भवतां न भवति प्रत्युताभेदएव सोयंदेवदत्तइति प्रत्यभिज्ञानं प्रमाणं लभामहइतिसूत्रार्थः । तदुक्तं गीतासु 'देहिनोऽस्मिन् यथादेहेकौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ ' इति ॥

---

ब्रह्मवादिज्ञानसे और निराकारमीमांसक भक्ति से मोक्षमानते हैं इसप्रकारसे भेद प्रतीत होवेहै और ब्रह्मवादी भक्ति को ज्ञान का कारण मानतेहैं इसप्रकारसे भक्तिज्ञान काभीभेदप्रतीत होवे है इसप्रश्न का उत्तर सूत्र से कहे हैं (सू०भक्तिज्ञानवैष्यम्यमितिचेन्नावस्थयातद्वतोपितथाप्रसङ्गात् ॥१६॥) पूर्णभक्ति का अंतअवस्थारूपज्ञान है इसवास्ते ज्ञान से भक्तिभिन्न नहीं है अपनी अन्तअवस्था रूपज्ञान से जो कभी भक्तिभिन्न होवे तौ कुमारादि अवस्थावालेदेहादिकाभीभेद प्राप्त होगा इसवास्ते भक्तिज्ञान का भेदनहीं है किन्तु अभेदहीहै इसवास्ते किसीप्रकार का विरोध नहीं प्राप्तहोवे है ॥ १६ ॥

णस्योपदर्शनापातात् तस्य चानुपलम्भात् न च दृष्टान्तेऽवस्थयातद्गतोभेदोनात्र तु तस्या एव तद्गतोभेदोनेति वैषम्यमितिवाच्यम् तयो तद्गतोभेदोन चेत्सुतरां तस्यास्तद्गतोनेत्याशयात्। निरुपाधेर्निरुपद्रवस्य ज्ञानं न संभवति भक्तिस्तु भवितुं प्रभवति निर्गुणोपासनवदिति पूर्वमुक्तत्वाच्चेत्यलमतिपप्रश्नेन ॥ १७॥ कौमाराद्यवस्थाभेदेनावस्थावतां पदार्थानां न भेदइत्याभिसन्धानबलादास्थेयं कथमन्यथा प्रत्यभिज्ञोपपाद्येत्याधिकं क्षणभङ्गवादिमत प्रवेशेन दूषणमभिदधात्याचार्य्यः—

**सू० क्षणभंगवादप्रवेशे प्रति-
सन्धानोपरोधः ॥ १८ ॥**

यदिचावस्थाभेदेन पदार्थाभिन्नाभवन्तीति भवताभिमन्यते तदा प्रतिक्षणमृतेर्चितेः पदार्थमात्रपरिणामाभ्युपगमे क्षणभङ्गवादिनयनगरप्रवेशोभवता विहितस्त-

---

यथाएकस्मिन्नेव देहे देहिनः कौमाराद्यवस्थानुभवस्तथा देहान्तरेपीत्यर्थात् न हि देहस्यावस्थाकृतोभेदोभगवतोपि संमतइतिप्रतीयतेइतिभावः ॥ यद्यपि अवस्थाभेदे देहिनोन भेदस्तथापि अवस्थाकृतोदेहस्योत्तरावस्थायाश्चास्त्येव प्रामाणिकोभेदोऽन्यथाकृष्णकेशोग्नीनादधीतेत्यादिविधेर्वैयर्थ्यंस्यादित्यरुचेराह निरुपाधेरित्यादिना। अत्रापेक्षितातिप्रपञ्चस्त्वस्माभिरपि मुखबन्धे पुष्कलमुपवर्णितइति किंपुनराम्रेडितेनेति बोध्यम् ॥ १७ ॥ अवस्थातद्गतोर्भेदस्वीकारे क्षणभङ्गवादवादिमतप्रवेशस्तव स्यात् स्याच्च सोयं देवदत्तइत्यादिप्रत्यभिज्ञानस्यानुपपत्तिरिति दोषाभ्युच्चयसंग्राहकं सूत्रमवतारयति कौमाराद्येत्यादिना ॥ प्रमाणबलादायातः प्रवाहः केन वार्य्यते इतिन्यायेन यत्सत्तत्क्षणिकं यथा जलधर इत्यादिप्रमाणेन देहादौ क्षणिकतायाः प्रमितत्वमेवास्तीति क्षणभङ्गवादमुद्दङ्क्यप्रत्यभिज्ञाविरोधमुपपादयितुं सूत्रं तावद्गृह्णाति यदिचेत्यादिना ॥ सर्वे भावाः क्षणपरिणामिन ऋते चिच्छक्तेरिति 'न्यायेनाह तदा प्रतिक्षणमिति प-

थाससाति यं बालं दुर्बलमन्वभूवं सुकुमारावयवविन्यासवन्तन्तमेवेदानीं स्वतनयं दृढतरपुष्टावयवविन्यासवन्तमवलोक्य मोदेहम्मुहुर्मुहुरित्यादिप्रतिसंधानंनभवेत् ॥ यूनोहि तस्य सुतस्य बालाद्भिन्नत्वात् न च वाच्यं जातिनिमित्तं प्रत्यभिसंधानमिदामिति एकव्यक्तिमात्रवृत्तिधर्मे जातित्वस्य जातिवादिभिरनङ्गीकारात् ॥

---

दार्थमात्रेति भावपदार्थमात्रेत्यर्थः । भवताविहितइति भवता स्वस्यैव प्रवेशो विहितइत्यन्वयार्थः दुर्बलमिति अल्पबलवन्तमिति सुकुमारेति कोमलसूक्ष्मेत्यर्थः । दृढतरेति ‘ दृढः स्थूलबलयोरि’ति पाणिनिस्मरणात् बलवत्तरेत्यर्थः । एवं च यत्स तत्क्षणिकमिति अनुमानं सोयंबालइत्यादिप्रत्यभिज्ञानुपपत्त्या बाधितं तदुक्तम् । वाक्यकारेण ‘ कृतप्रणाशाकृतकर्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् उपेक्ष्यसाक्षात् क्षणभङ्गमिच्छन्नहोमहासाहसिकः परोसावि’ति । ननु सैवेयमोषधिरित्यादिप्रत्यभिज्ञावत् सोयंबालइत्यादिप्रत्यभिज्ञापि जातिमुपलम्भ्य सेत्स्यति इत्याशङ्क्य एकव्यक्तिवृत्तिधर्मेजातित्वस्यानङ्गीकारपराहतत्वान्नैवमित्याह न च वाच्यमिति । वाच्यमित्यस्यानङ्गीकारादित्यन्वेन सम्बन्धः ॥ अयंभावः । क्षणपरिणामतत्तत्क्षणविशिष्टत्वेन तद्व्यक्तेर्भिन्नत्वेन सर्वत्र व्यक्तेरेकैकत्वादेव गगनत्वादिवत्कुत्रापि जातिसिद्धिर्न स्यात् तदुक्तं नैयायिकवृद्धैः ‘ व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसम्बन्धोजातिबाधकसंग्रहः ’ इतिजातितद्भेदबाधकसंग्रहः इत्यर्थः । जातिवादिभिरिति नैयायिकैरित्यर्थः । क्षणभङ्गमते तु जातेरनङ्गीकारः प्रथममेव सिद्धस्तथापि परमतमवलम्ब्यापि न निस्तारइति भावः अतएव जातिवादिभिरित्युक्तम् ॥ ननु यद्यपि

---

अवस्था से देहादि का भेद मानलेंगे ऐसी इष्टापत्ति मानो तो उत्तर सुनो ( सूत्र०इष्टापत्तौप्रमाणानुपलम्भः ॥१७॥) इष्टापत्तिमानने में कोई प्रमाण नहीं है जब अवस्था करके अवस्थावाले का भेद नहीं तोअवस्था का भेद होना असम्भव है यह आशय है ॥ १७॥ जोअवस्था भेद से पदार्थों का भेदमानोगे तो दूषण कहेहैं (सू०क्षणभङ्गवादप्रवेशप्रतिसन्धानोपरोधः ॥ १८ ॥ ) अवस्थाभेद से भेदमानोगे तो क्षण २ में पदार्थों का अन्यथा २ परिणामहोने से प्रतिक्षण पदार्थों का भेद होने से क्षणभंगवादी के मत में आपका प्रवेशहोगा तब सर्वपदार्थों की सर्वानुभवसिद्ध प्रत्यभिज्ञा काविरोध प्राप्तहोगा ॥

अथावस्थाभेदेन व्यक्तिभेदमभिमन्यमानं प्रतिकोयमुपालम्भइतिचेत्तर्हि कुटकरकाद्युपाधिभेदेन गगनेपि भेदव्यवहाराद्गगनत्वमपि गगने जातिरेवेत्यभिधाने तव निर्व्रीडस्य कुत्रैकव्यक्तिमात्रवृत्तिधर्मस्य न जातित्वमिति व्यक्तं वक्तव्यं भवेत् सर्वत्रजातिसद्भावप्रसङ्गात् का हि नाम व्यक्तिर्या कथमपि न भिद्यते यद्वृत्तिधर्मस्य न तत्त्वमितिव्यक्तेरभेदोजातिबाधकइत्युक्तिःसाफल्यमश्नुवीत । उपाधिरप्येवं प्रत्याख्येयः तस्मादस्ति प्रतिसंधानमवस्थाभेदेपि तद्वतोऽभेदस्य साधकमिति न क्षणभङ्गवादप्रवेशेनापि समाधेयमेतत् तस्मान्नास्ति भक्तिभिन्नं विज्ञानं मोक्षनिमित्तमितिस्थितम् ॥ १८ ॥ क्षणभङ्गवादप्रवेशे स्वराद्धान्तविरोधोप्यापद्येत स च न युक्तइत्याह—

## सू० सिद्धान्ताविरोधाच्च ॥ १९ ॥

---

व्यक्तेरेकत्वमेव तथाप्यवस्थाभेदेन तस्याअपिभेदमादाय तद्वृत्तिधर्मस्य जातित्वं साधयामइति पुनरपि मतान्तरेण शङ्कते अथेत्यादिना तत्तत्सूर्यस्पन्दाद्युपाधिभेदेनेत्यर्थः । कोयमुपालम्भइति । एकव्यक्तिवृत्तिधर्मस्य जातित्वाभावात् प्रत्यभिज्ञानुपपत्तिरूपोपालम्भइत्यर्थः यस्या व्यक्तेरव्यवस्थया भेदस्सा किंक्षणिका न वा नाद्यः क्षणिकात्वेनैव तस्या एकत्वे सिद्धे अवस्थाया वैयर्थ्यात् पूर्वोक्तदोषानुद्धाराच्च न द्वितीयः क्षणिकत्वाभावेन स्वमतत्यागप्रसंगात् इत्यादिप्रत्याख्यानप्रकारसत्त्वेपि सुहृद्भावेन तदनुसारेणैव समाधत्ते तर्हीत्यादिना 'घटः कुटनिपा'वितिकोशात् कुटोघटः । करकं कमण्डलुरितिबोध्यम् ॥ जातिपक्षेऽभ्यूहितं दूषणमुपाधावप्यातिदिशति उपाधिरप्येवमिति । जात्युपाध्योर्भेदो न स्यादित्यपिबोध्यम् । संकोचविकाशशाल्यहेरिव नावस्थाकृतोदेहस्य भेदइत्युपसंहरति तस्मादस्तीति । प्रकृतं स्मरन्नुपसंहराति तस्मादिति । भक्तिरूपेणपरिणतमेव ज्ञानं मोक्षहेतुरिति न प्रतिज्ञाभङ्गइतिभावः ॥ १८ ॥ क्षणभङ्गवादस्वीकारे सर्वसाधारणं प्रत्यभिज्ञानानुपपत्तिरूपं दोषमभिधायेदानीं स्वसिद्धा-

अपि च नैव भक्तिभिन्नं ज्ञानमितिनिर्बन्धेन क्षणभङ्ग-वादप्रवेशोयुक्तिमान् तथा सति स्वाभ्युपगतसिद्धान्तो-भवता स्वयमेव त्यक्तः स्यात् स्वयमेव च क्षणभङ्गवाद-स्य प्रत्याख्यानात् सर्वस्य स्थिरतासाधने यत्नानुष्ठाना-च्च। अत्र च तस्यैव प्रत्याख्यातपक्षस्योपादाने सिद्धान्त-हानिप्रसङ्गोऽवश्यमेव भवेत् तन्मते प्रत्त दोषाणां स्वमते-पि प्रसंगाच्च नचैवं युक्तमभिमन्तुमभियुक्तानां तथा सति शिष्याणामनाश्वासेनाश्रद्धेयवचनोभवान्न प्रामाणिकपक्ष-स्योपदेष्टा स्यादिति जहीहि वैनाशिकसमयामिति सुहृद्-भूत्वायमाचार्य्यवर्य्योवेदान्तिवर्य्यमाचष्टे तस्मान्न ज्ञानं भक्तिभिन्नमित्यभिधातुं युक्तमितितत्त्वम्॥ १६ ॥ अथ ज्ञानस्य भक्तिभिन्नस्यानभ्युपगमे ज्ञानादेव तु कैवल्यमि-त्यादिज्ञानहेतुकमोक्षाभिधायी वेदो भवता कथय कथं सार्थकतांनीतः स्यादिति चेत्तत्राह—

---

न्तविरोधरूपं विशेषदोषमाह सूत्रकारः।' सिद्धान्तविरोधाच्चेति ॥ सूत्रं व्याचष्टे अपिचेत्यादिना ॥ तथासतीति । क्षणभङ्गवादप्रवेशस्वीकारे सति । शेषं सुबोधम् ॥ १९ ॥ मोक्षकारणीभूतभक्तिभिन्नस्वतन्त्रज्ञानानङ्गीकारे श्रुतिविरोधमाशङ्क्य 'पूर्णभक्तेर्ज्ञानत्वान्नोपरोधगन्ध' इति सूत्रमवतारयति अथ ज्ञानस्येत्यादिना यद्यपि निष्करुणत्वाल्पमहिमत्वाप्रियत्वासत्यत्वदुःखित्व-

---

जिसबालक को मैं कोमलावयववाला सुकुमारस्वरूप देखता था उसबालक को मैंअब पुष्टअवयववाला देख के प्रसन्न होता हूं इस प्रत्यभिज्ञा का विरोधहोवेगा बाल से युवा को भिन्नमानने से एकव्यक्तिमात्रवृत्तिधर्म को जाति नहोने से जातिनिमित्तिकभीप्रत्यभिज्ञा नहीं बने है घटादिउपाधिभेद से आकाश कोभी नानाहोने से आकाशत्व भी जातिमानना पड़ेगा जो उपाधिकृत भेदसे व्यक्तिभेद को लेकर जातिमानोगे तब सर्वत्रउपाधि भेद से व्यक्तिभेद सिद्ध होवे है तब सर्वत्रव्यक्ति में धर्ममात्र को जातिरूपता सिद्ध हो जावेगी तब वैसा कोईस्थल न मिलेगा जिस में एक व्यक्तिमात्रवृत्ति होने से यह धर्मजाति नहीं है वैसी

## सू० पूर्णाभक्तेर्ज्ञानत्वान्नो परोधगन्धः ॥२०॥

न वयं ज्ञानसाध्यो न मोक्ष इति ब्रूमोपि तु ज्ञानसाध्यमेव मोक्षमभ्युपेमः परं च ज्ञानं नाम नातिरिच्यते भक्तेर्ज्ञानस्य भक्त्येकदेशताया आवेदनात् पूर्णा हि भक्तिर्ज्ञानमित्युच्यते वेदे तस्मात्कैवल्याभ्युपगमे किं नाश्छिन्नं शब्दभेदस्याकिंचित्करत्वात् अन्यथा घटकलशशब्दयोर-

---

जडत्वादिज्ञानं ब्रह्मणि मनोमालिन्यकारणं करुणाबहुलाव्याहतैश्वर्य्यातिशयित सत्यत्वसुखत्वचेतनत्वाद्याश्रय आत्मेतिज्ञानात्पूर्वोक्तमनोमालिन्यमर्दनं ततःपराभक्तिः अतएव च गीयते 'तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः' इति एवं च न कोपि श्रुतिविरोधः प्रसरति इत्यसकृदवोचाम भाष्यकारोपि तत्र तत्र तथैवावोचत् । तथापि 'ब्रह्मवादिनोप्यस्मदीया' इतिप्रतिज्ञां पालयन् सूत्रकारः सुहृद्भावेन तानाहत्यैव समाधत्ते पूर्णभक्तेरित्यादिनेति । पूर्णभक्तेरितिप्रयोगस्तु दृढ भक्तिवत्साध्यइत्यादिवोध्यम् ज्ञानस्य भक्त्येकदेशतायाआवेदनादित्युक्तिबलात्पूर्णा हि भक्तिर्ज्ञानमित्यस्यायमर्थः कार्य्यः पूर्णा हि भक्तिरङ्गिनी ज्ञानं चाङ्गमित्युच्यते इति तथा च छान्दोग्ये'योवै भूमा तत्सुखमित्याद्युपक्रम्य आम्नायते'आत्मैवेदं सर्वमिति सवाएष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीडआत्ममिथुनआत्मानन्दःसस्वराड्भवतीति तत्रात्मरतिरूपायाः परिपूर्णाभक्तेः पश्यन्नितिदर्शनमप्रियत्वादिभ्रम निरासमुखेनाङ्गं भवति यथा दण्डीप्रैषानन्वाह प्राचीनावीतो दोहयति अभिजानन् जुहोति धनवान् सुखवानित्यादौ दण्डाद्यङ्गं तथादर्शनमपि तेरङ्गं मननविज्ञानयोरुक्तप्रदर्शनार्थतयान्यायप्राप्तयोरनुवादः एवमात्मक्रीडादेरतिनैयत्यादर्थ प्राप्तोनुवाद एव अन्यथा रत्युद्देशेन दर्शनादिविधौ दर्शनाद्युद्देशेन वा रत्यादिविधौ वाक्यानि भिद्येरन् तस्मात् पूर्वमीमांसायां 'शेषः परार्थत्वादि'ति न्यायादर्शन-

---

भक्तितुमारी सफल होवे इसवास्ते प्रत्यभिज्ञा के बल से व्यक्तियों की अवस्थाओं के भेदहोनेपर भी अवस्थावाली व्यक्तियों का भेद नहीं होवे है इसवास्ते क्षणभंगवादि के मत में प्रवेश करने से भी समाधान नहीं हो सके है इसवास्ते भक्तिभिन्न ज्ञान की सिद्धि नहीं बने है ॥ १८ ॥

र्थोऽपि भिद्येत किन्नाम भक्तेः पूर्णत्वमिति चेदुच्यते विजातीयप्रत्ययान्तर्य्याभावोपलक्षितैकाकारत्वमेव तत् निदिध्यासनस्यैतन्नाम तर्हीति चेन्नाभेदचिन्तनमादित आरभ्यान्तिमवृत्तिपर्यन्तं चिदभिव्यक्तिराविर्भवन्तीपूर्णाभक्तिरित्युच्यते न च सा निदिध्यासनेन्तर्भूताभवति तथाभवता-

मङ्गं भक्तिश्चाङ्गिनी । तदुक्तं भारतेपि ' यस्त्यक्त्वाप्राकृतं कर्म नित्यमात्मरतिर्मुनिः सर्वभूतात्मभूतात्मा स्याच्चेत्परतया गति 'रितिभावः । यद्वा वेदे 'तस्याभिधानाद् योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्ति 'रिति ' निष्कलं ध्यायमान ' इत्यादिवेदे इति बोध्यम् ॥ पूर्णभक्तेः स्वरूपमाह विजातीयेति विजातीयप्रत्ययव्यवधानाभावोपलक्षितभगवदेकाकारत्वमित्यर्थः । तथा च शास्त्रम् ॥ मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोम्बुधौ ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं । ' अत्राविच्छिन्नेति धारावाहिकता च दर्शिताइति । भक्तेर्निदिध्यासनान्तर्भावमाशङ्क्य निषेधति निदिध्यासनस्येत्यादिना निदिध्यासनभेदप्रदर्शनायोक्तमपि भक्तिस्वरूपमनुवदति अभेदचिन्तनमिति तदुक्तं गीतायाम् ' भजन्त्यनन्यमनसोज्ञात्वाभूतादिमव्ययम् । ' इति मत्वा भजन्ते मां बुधा भावसमन्विताः ' इति । अन्तिमवृत्तेः समभिव्यक्तिर्यस्यास्सेतिविग्रहइतिबोध्यम् । अन्तर्भूताभवतीति अन्तर्भवितुम-

क्षणभंगवादि के मत में प्रवेशकरने से ब्रह्मवादियों को अपने सिद्धान्त का विरोध भी प्राप्त होगा यह कहे हैं ( सू० सिद्धान्तविरोधाच्च ॥१९॥ ) सिद्धान्त के साथ विरोध भी होगा-अपिचभक्तिभिन्न ज्ञान को सिद्धकरने वास्ते क्षणभंगवादि के मत में प्रवेश करोगे तौ क्षणभंगवादियों का ब्रह्मसूत्रों में खण्डन करना विरुद्ध हो जावेगा और उन के मत के खंडन में जो युक्तियें आपने शारीरक में कही हैं सो तुमारे मत में भी प्राप्त होजावेंगी इसवास्ते क्षणभंगवादि के मत में मत प्रवेश करो ॥१९॥ भक्ति से भिन्नज्ञान को नमानोगे तौ ज्ञान से मोक्ष कहनेवाली श्रुतियों का विरोधहोगा इस शंकाको सूत्र से वारण करे हैं ( सू० पूर्णभक्तेर्ज्ञानत्वान्नोपरोधगन्धः ॥२०॥ ) हम यह नहीं कहते कि ज्ञान से मोक्ष नहीं होता किंतु ज्ञान से ही मोक्ष को माने हैं परंच ज्ञानभक्ति से भिन्न नहीं है किन्तु भक्ति की अंत अवस्था को ज्ञान कहे हैं तिस से मोक्षहोवेहै ।

नङ्गीकारान्निदिध्यासनाच्चिदभिव्यक्तेर्ज्ञानापरपर्य्यायायाउ रपत्तेर्भवताऽभ्युपगमाच्च तथा च भवतां भक्तेरेकदेशोमोक्ष-निदानमस्माकं पुनः पूर्णभक्तिर्मोक्षाभिव्यञ्जिकेतिमहान् भेदस्तं विचार्य्य धारय चेतसीत्याशयः । तथा च नास्माकं भक्त्यभिव्यक्तमोक्षवादिनामुपरोधोवेदविरोधस्तस्य गन्धो-लेशोपि सम्भवति पूर्णाया भक्तेरेव ज्ञानपदाभिलापात् । कथमित्थमवगम्यते इति चेद्विचारय निष्कलं ध्यायमा-नइति श्रुतेरर्थं ततः स्वयमेवावगच्छसि भक्तानामभिप्राय-मितिसमासः॥ २० ॥ इदानींदर्शनाभेदशङ्कालतामप्यु-च्छिनत्तियतिपतिः—

## सू० निराकारदर्शनैकदे शतेतरेषाम् ॥२१॥

न चास्य दर्शनस्येतरदर्शनाभेदः शक्यशङ्कोयतस्ते-

---

हेतीत्यर्थः । न च सानिदिध्यासनेन्तर्भूताभवतीति विजातीयप्रत्ययानन्तरि-तसजातीयप्रत्ययप्रवाहरूपे निदिध्यासने इत्यर्थः । द्रवीभावपूर्वकचित्तवृत्ते-र्विजातीयप्रत्ययानन्तरितभगवदेकाकारत्वं भक्तेः । तथा च वक्ष्यति सूत्रकारः भक्तिर्भगवति चित्तैकतानतेति' चित्तद्रवीभावानपेक्षया विजातीयप्रत्ययानन्त-रितसजातीयप्रत्ययप्रवाहरूपं निदिध्यासनमितिविवेकइतिभावः । वृत्तीद्धचिद-भिव्यक्तेरित्यर्थः । तथाचोक्तम् ' आहुरन्ये तु वृत्तीद्धआत्मैवाज्ञानतस्कृतम् । प्रदहेत्सूर्य्यकान्तेद्धासूर्य्यकान्तिस्तृणं यथा ' इति ॥ भक्तेर्ज्ञानपदाभिलप्यत्वे मुण्डकश्रुतिं प्रमाणयति निष्कलमिति ' ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान ' इति हि मुण्डकश्रुतिः । अत्र ज्ञायते-ऽर्थोनेनेति व्युत्पत्त्या ज्ञानं बुद्धिः तस्याः विवेकादिना नैर्मल्येन विशु-द्धसत्वः द्रष्टुं योग्यः ततः ध्यानं भक्तिं कुर्वाणस्तं निरवयवं पश्यते पूर्ण-भजनमेव ज्ञानाकारेण परिणतं सत् स्वात्मानं प्रकाशयतीति प्रकृतोपयो-ग्यर्थः ॥ २० ॥ मध्येपेक्षितमर्थमभिधाय सिंहावलोकनेन पुनरपि दार्ढ्याय

षामितरेषां दर्शनानां निराकारदर्शनैकदेशता दृश्यते कथं तेषामस्य च दर्शनस्य दर्शनाद् द्रष्टव्या ततोनास्य दर्शनस्येतरैर्दर्शनैरभेदोवाच्योभवेद् विशेषदर्शिना नापि तैर्दर्शनैरस्य दर्शनस्य गतार्थता वक्तव्या व्यक्तमस्य समग्रमोक्षतत्साधनाभिधायित्वादितरेषां चैतद् दर्शनदृष्टमोक्षतत्साधनैकदेशदर्शकत्वादितिभावः तत्र ब्रह्मदर्शनस्य तावत्साधनांशे मोक्षैकदेशदर्शकत्वमुक्तमेवासकृदिति तदेवात्र स्मर्त्तव्यमितरेषामपि सांख्ययोगन्यायादिदर्शनानां मोक्षस्वरूपांशएकदेशदर्शकत्वमित्यप्युक्तमेव तेषुदुःखनिवृत्तेर्मोक्षैकदेशरूपाया मोक्षत्वाभिधानादिति तानि दर्शनान्येतदर्शनेन गतार्थानि नचैतद्दर्शनं तैर्दर्शनैर्गतार्थम्भवति यद्यपि तेषु दर्शनेषु नानाविधचातुर्यसाधका विचारा अप्युपलभ्यन्ते तथाप्युत्तममतीनां मुमुक्षूणामत्यन्तमनपेक्षणात्तेषां विचारितत्वादेव चात्र ते विषया उपेक्षिताः सूत्रकृता सारग्राहिणेति चतुर्थेऽध्याये व्यक्तीभविष्यति तस्मादत्यादरणीयमिदं दिव्यदर्शनं मुमुक्षुभिरित्यलम् २१

निराकारमीमांसादर्शनस्यागतार्थत्वमुक्तं सम्प्रति त्वभिहि-

---

शास्त्रारम्भं समर्थयति सूत्रकारः निराकारदर्शनैकदेशतेतरेषामि' ति इतरेषां दर्शनानां निराकारदर्शनेनैव गतार्थता न तु तैर्निराकारदर्शनस्येति न निराकारमीमांसाया आरम्भोव्यर्थइत्यर्थः। तमेवार्थं विशदयन्व्याचष्टे न चास्येत्यादिना दर्शनादिति। अस्य निराकारदर्शनस्य ज्ञानादितरेषां दर्शनानामेकदेशता नाम गतार्थताद्रष्टव्येत्यन्वयार्थः। एतद्दर्शनेति। निराकारदर्शने दृष्टोनिश्चेतोयोमोक्षः सच्चिदानन्दरूपनिराकारब्रह्मप्राप्तिः। तत्साधनं च पूर्णभक्तिस्तयोरेकदेशौ दुःखनिवृत्तिर्ज्ञानं च तयोर्दर्शकत्वादितरेषां दर्शनानामित्यर्थः। स्पष्टम् ॥ २१ ॥ पूर्वत्र 'तस्या निमित्तं तन्नामानुराग' मित्यनेन भक्तेरसाधारणं निमित्तकारणमभिधायेदानीं ततोऽप्यसाधारणं कारणं सर्वसाधा-

ताया: प्रकृताया निराकारभक्तेरुपायमन्तरङ्गमभिदधाति।

## सू० भक्तिश्चेतोनिरोधात् ॥ २२ ॥

मुक्तिपर्य्यवसायिनी भगवतोभक्तिर्भगवतीचेतोनिरोध-साध्या निरुद्धचेतसोहि भगवद्भक्तालभन्ते मुक्त्यभिव्य-ञ्जिकां भक्तिं ये च क्षिप्तविक्षिप्तमूढचेतसोऽभक्तास्ते न कदापि भक्तिं लभन्ते लभन्ते तु जननजरामरणानर्थ-

---

रण्येनाह भक्तिश्चेतोनिरोधादिति चेतोवृत्तिनिरोधादपिभक्तिर्भवतीत्यर्थः। प्रथमंभगवन्नामानुरागस्ततोवाह्यवृत्तिनिरोधस्ततोभक्तिर्जायतेइतिविवेकः एवं च न पूर्वोत्तरग्रन्थयोर्विरोधइतिबोध्यम्। सूत्रं व्याचष्टे मुक्तिपर्यवसायिनीत्यादि-ना भक्तिमुक्त्योरन्वयव्यतिरेकौ तावदाह चेतोनिरोधसाध्येत्यादिना। अन्व-यमुक्त्वाव्यतिरेकमाह ये च क्षिप्तेति। चित्तस्य पञ्चभूमयो योगभाष्यकृता द-र्शिताः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयइति। तत्रासुरसम्पल्लो-कशास्त्रे देहवासनाप्रवर्त्तमानं चित्तं क्षिप्तं निद्रातन्द्रादिग्रस्तं मूढं कादाचित्क-ध्यानयुक्तं क्षिप्ताद्विशिष्टतया विक्षिप्तं तत्र क्षिप्तमूढयोर्ध्यानरूपभजनशङ्कैव ना-स्ति विक्षिप्ते तु चेतसि विक्षेपोपसर्जनीभूतो निरोधोभक्तिपक्षे न वर्त्तते निक्षे-पान्तर्गततया दहनान्तर्गतवीजवत्सद्यएव नश्यति अतोभक्तिसम्पत्त्यै चित्तनिरो-धमेव कुर्याद्भक्तइत्याशयेनाह ततश्चेतसोनिरोधइति। क्षिप्तादौ विशेषं वक्तुमाह अयमभिप्रायइति। त्रिगुणं चेतइति। सत्वरजस्तमोगुणत्रयात्मकं हि चित्तम्।

---

पूर्णभक्ति कोही वेद में ज्ञान कथन किया है इसवास्ते ज्ञान और भक्ति शब्दों के अर्थ का भेद नही है भक्ति शब्द का निदिध्यासन अर्थ नहीं है किंतु अभेद चिन्तन का आरम्भ लेके अंतवृत्तिपर्यंत चेतन की अभिव्यक्ति को पूर्णभक्ति कहें हैं इसवास्ते भक्ति से मोक्ष की अभिव्यक्तिवादि को कोई दोष नहीं है वेद में भी ज्ञान पद से पूर्णभक्ति का बोधन किया है ॥ २० ॥

(प्रश्न) अन्य दर्शनों के साथ इसदर्शन का अभेद प्रतीतहोवे है इसप्रश्न का उ-त्तर सूत्रसे कहे हैं ( सू०निराकारदर्शनैकदेशतेतरेषाम् ॥ २१ ॥) इसदर्शन का अन्यदर्शनों के साथ अभेद होने की शंका नहीं करनी ।–

शतानुरक्तिं यतस्तत्रैवासकृद्विपरिवर्त्तमाना उपलभ्यन्ते ते ततश्चेतसोनिरोधोभक्तैर्भक्तये ऽवश्यमनुष्ठेयोन्यथा भक्त्यलाभोभवेदिति भावः। अत्रायमभिप्रायः। त्रिगुणं चेतस्तेन तेन गुणेनोद्बुद्धेन तत्तद्विषयं प्रतिधावन्नालं प्रत्ययं

प्रकाशप्रवृत्तिमोहानां सत्त्वादिकार्याणां तत्रदर्शनात् प्रकाशादीनां च गुणकार्यत्वं गुणातीतलक्षणेऽवगम्यते 'प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डवे'त्यभिधानात् सांख्यशास्त्रेपि 'प्रकाशप्रवृत्तिमोहानियमार्था ' इत्युक्तम् प्रकाशोनाम नात्र सितभास्वरूपं किन्तुज्ञानं 'सत्त्वात्संजायतेज्ञान' मित्युक्तत्वात्। ज्ञानवत्सुखमपि सत्त्वकार्यं तदप्युक्तम् 'सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युते' ति समुद्रतरङ्गवन्निरंतरं परिणममानेषु गुणेषु कदाचित्कश्चिदुद्भवति इतरावभिभूयेते तदेतदुक्तम्। 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे'ति 'वाध्यवाधकतां यान्तिकल्लोलाइवसागरे' इति च तत्र तमसउद्भवे सति आसुरसंपदेति। रजसउद्भवे सति लोकादिवासनास्तिस्रोभवन्ति सत्त्वस्योद्भवे दैवीसंपदुपजायते एतदेवाभिप्रेत्योक्तम् 'सर्वद्वारेषु देहेऽस्मिन् प्रकाशउपजायते। ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत' इति। यद्यपि अन्तःकरणं त्रिगुणात्मकं भासते तथापि सत्त्वमेवास्यमनसोमुख्यमुपादानकारणम् उपादानसहकारिभूता अवयवा उपष्टम्भका रजस्तमसी तु तदुपष्टम्भके अतएव ज्ञानिनोयोगाभ्यासेन रजस्तमसोरपनीतयोः सत्त्वमेव स्वरूपं परिशिष्यते एतदेवाभिप्रेत्योक्तम् 'ज्ञस्य चित्तमाचित्तं स्यादचित्तं सत्त्वमुच्यते' इति तच्च सत्त्वं चांचल्यहेतुरजोगुणशून्यत्वादेकाग्रं भ्रान्तिकल्पितानात्मस्वरूपस्थूलपदार्थाकारहेतुतमोगुणशून्यत्वात्सूक्ष्मम् ततआत्मदर्शनयोग्यम् अतएवश्रुतिः 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रिति न खलु वायुनादोधूयमानेन प्रदीपेन मणिमुक्तादिलक्षणानि निर्धारयितुं शक्यन्ते नापि स्थूलेन खनित्रेण सूच्येव सूक्ष्मचीनपटस्यूतिः संभ-

क्योंकि निराकारदर्शन के एक देश इतरदर्शन हैं इसवास्ते यह दर्शन उन से गतार्थनहीं है और न उनदर्शनों के साथ इस का अभेद है वेदान्तदर्शन मोक्ष के साधनांश में एकदेशी है भक्ति के एकदेश को मोक्ष का साधन मानने से सांख्य योग न्यायादिदर्शनों को मोक्ष के स्वरूप में एकदेशदर्शकत्व है उन में मोक्ष का एकदेश दुःखध्वंस को मोक्ष माना है यद्यपि वेदान्तदर्शनादि में अनेक प्रकार के सगुणोपासना विचारनिरूपण किये हैं तथापि निराकारदर्शन

लभते लभते च विषयतृष्णालौल्यं तदनेन मुमुक्षुणाऽवश्यं प्रथमंरजस्तमोमय्यश्चेतसोवृत्तयोनिरोद्धव्या निरुद्धासु च तासु सत्त्वप्रधानं चेतो भगवतः सत्त्वमूर्त्तेश्चिन्तने व्याप्रियते तच्चिन्तनेन शान्तं निस्तरङ्गमहोदधिकल्पमनल्पसिद्धिसमृद्धं तन्निराकारपरमात्मैकतानतामातनोति विधूनयति च विजातीयचिन्मात्रं तच्चित्तं भक्तस्य भवति मोक्षोन्मुखमिति अत्रधर्मधर्म्यभेदाभिप्रायं चेतःपदं तथा चतद्वृत्तिनिरोधइत्यर्थोर्थादेवावगन्तव्यः तस्माद् भवति चेतोवृत्तिनिरोधान्मुक्तिभाविकाभक्तिरिति दिक् ॥ २२ ॥ भक्तेरन्तरङ्गं साधनमभिहितम् इदानीं चेतोवृत्तेरुदयेनैव

---

वति तदीदृशं सत्त्वमेव योगिषु तमोगुणसहितेन रजोगुणेनोपष्टब्धं बहुविधद्वैतसंकल्पेन चेतयमानं चित्तं भवति तच्चित्तं तमोगुणाधिक्ये सत्यासुरीसंपदमुपचिन्वत्पीनं भवति तथाह वसिष्ठः । 'अनात्मन्यात्मभावेन देहभावनया तथा पुत्रदारैः कुटुम्बैश्च चेतोगच्छति पीनता' मित्याद्यभिप्रेत्याह तेन तेन गुणेनेति । सत्त्वाभिभावकेन रजोगुणेन तमोगुणेन वा तत्तद्विषयं प्रतिधावत् सन्तोषं न लभते इत्यर्थः । प्रत्युत तेन बहुला विषयतृष्णैवानुभूयते तदुक्तं ययातिना 'न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूयएवानुवर्धते' इत्यभिप्रेत्याह लभते च विषयतृष्णालौल्यमिति । तदिति तस्मादित्यर्थः । रजस्तमोमय्यइति रजस्तमःप्रधानाइत्यर्थः । सत्त्वमूर्त्तेः सत्त्वप्रधानकमायोपाधिकसगुणमूर्त्तेरित्यर्थः । चि-

---

में केवल निर्गुणभक्ति का ही निरूपण किया है और सांख्यादि दर्शनों में अनेकप्रकार के निराकार व्यतिरिक्त विचार कहे हैं तथापि यहां मुमुक्षुगणों को अनुपयोगी होने से यहां निरूपण नहीं किये हैं किन्तु सारसंग्रह मात्र ही निराकारमीमांसा में सूत्रकार ने किया है सो चतुर्थ अध्याय में स्पष्टहोगा. इसवास्ते इसदर्शन को अति आदर से ग्रहण करना उचित है ॥ २१ ॥

अब निराकारभक्ति का अन्तरंगसाधन कहे हैं ( सू० भक्तिश्चेतोनिरोधात् ॥ २२ ॥ ) मुक्तिफल साधक जो भगवत् की भक्ति है सो चित्त के निरोध से सिद्ध होवे है ॥

संसारोपलम्भात्तस्यानिरोधएव चित्तनिरोधइत्यभिप्रायं चेतसि निधाय चेतोवृत्तिद्वैविध्यं प्रमाणाप्रमाणभेदेन प्रमाणभेदविदाचार्यश्चाचष्टे—

### सू० चेतसो वृत्ती द्वे प्रमाणाप्रमाणभेदात् ॥ २३ ॥

चेतसोनिरोधोहि तदवृत्तिनिरोधएवेत्युक्तं पुरस्तात् तत्र चेतोवृत्तिविषये विप्रतिपन्नान्वादिनोऽनुलक्ष्य तद्वृत्तेर्द्वैविध्यमनेन सूत्रेणाचार्य्यश्चचक्षे सर्वेषामेव देवातिर्यङ्मनुष्यादीनां चेतसां यावृत्तयः समुत्पद्यन्ते तासांसर्वासामेव द्वयी गतिरेका प्रमाणभूताऽप्रमाणभूताचापरा न चाभ्यां कोटिभ्यामपरा कोटिः काचिदवशिष्यतेयेनात्रापिवादिनो विवदेरन् । तदुक्तमद्भुतगीतायां अप्रमाणप्रमाणाभ्यांमनोवृत्तिद्वयं मतं वृत्तिद्वयान्न चैवास्य-वृत्त्यन्तरं इति तस्मात्सर्ववाद्यविवादास्पदं वृत्तिविभागरीतिरियमिति ॥ २३ ॥ उपदर्शितप्रमाणाप्रमाणवृत्तिकोटयोः पूर्व-

---

च्चृत्तिनिरोधाद्भगवति पूर्णा भक्तिर्भवतीत्युक्तं तत्र काश्चिच्चृत्तयइत्याकांक्षायां वृत्तिभेदप्रकाशकं सूत्रमवतारयन्वृत्तं कीर्तयति भक्तेरन्तरङ्गमित्यादिना सूत्रं व्याचष्टे चेतसइत्यादिना । प्रमाणभूतेतिप्रमाणोद्भूता प्रमेत्यर्थः । न हि चक्षुरादिप्रमाणानां वृत्तित्वं संभवतीति वोध्यम् एवमुत्तरत्रापीतिज्ञेययम् । शब्दज्ञानानुपाती वस्तुशून्योविकल्पइति विकल्पाख्यज्ञानमप्यप्रमाणकोटौ निक्षिप्याह नाऽभ्यामिति । अपरा कोटिरिति । आभ्यां तृतीया कोटिर्नास्तीत्यर्थः ॥ २३ ॥ प्रमाकरणम् । वृत्तेर्द्वैतसंपत्तये प्रथमोपस्थितत्वात् प्रमाणलक्षणसूत्रं तावदवतारयति उपदर्शितेत्यादिना । अभ्यर्हितामिति वस्तुयाथात्म्यप्रकाशकत्वेन

मुपदर्शिताम् प्रमाणकोटिमभ्यर्हितां पूर्वं लक्षयति लक्ष-णकोविदः—

## सू० प्रमाकरणं प्रमाणमिति॥ २४ ॥

प्रमायाश्चेतोवृत्तिच्छायापन्नायाश्चितेरनधिगताबाधितार्थविषयाया यदभिमानेनाहं प्रमिणोम्यमुमर्थमित्यभिमन्यते पुरुषस्तस्याः करणम् प्रमाणमिति वाक्यार्थः। सा च पुरुषच्छायापन्ना वृत्तिरेव साक्षात्प्रमाणम् इन्द्रियाणि तु परम्परया प्रमाणानि मन्तव्यानि अत्र यद्यपि

निष्कम्पप्रवृत्तिजनकत्वमेव प्रमाणकोटावभ्यर्हितत्वमित्यर्थः असाधारणधर्मोहि लक्षणमितितद्विदइत्यर्थइतिसंक्षेपः सूत्राक्षराणि व्याचष्टे प्रमायाइत्यादिना। चेतोवृत्तीत्यादि। यथा हि चितिः प्रतिबिम्बते वृत्तौ तथा चेतोवृत्तिरपि प्रतिबिम्बते चितौ समानयुक्तेरुभयोः स्वच्छत्वाविशेषाच्च तत्र चेतोवृत्तिप्रतिबिम्बयुक्ताचितिः प्रमा चित्प्रतिबिम्बयुता च वृत्तिः प्रमाणमिति विभागोबोध्यः। स्मृतिव्यावृत्त्यर्थमनधिगतेति।नन्वेवं घटोयं घटोयमितिधारावाहिकद्वितीयादिज्ञानेष्वव्याप्तिः पूर्वज्ञानविषयीकृतस्यैवार्थस्योत्तरज्ञानेनविषयीकरणादितिचेन्नधारावाहिकज्ञानस्थलेवृत्तेर्विजातीयविरोधिज्ञानोदयपर्यन्तमेकत्वस्वीकारे तत्तत्क्षणविशेषविषयत्वस्वीकारे वा दोषाभावादित्याहुरित्यन्यत्र विस्तरः।इदं रजतमित्यादिज्ञानव्यावृत्त्यर्थमबाधितेति।पुरुषच्छायेति। क्रोधादिवृत्तेरर्थप्रकाशकत्वाभावसंरक्षणाय पुरुषच्छायापन्नेति विशेषणम्। अर्थप्रकाशकज्ञानस्यैव वृत्तित्वादिति भावः।न च साधकतमं करणमित्यादिवत्प्रमीयतेर्थोनेनेति प्रमाणमिति करणार्थकल्युट्प्रत्यया-

जो निरुद्ध चित्तवान् पुरुष हैं सो भगवत्भक्ति को प्राप्तहोवे हैं और जिनका चित्त क्षिप्त विक्षिप्त मूढ़ अवस्था को प्राप्त है तिन को भक्तिका लाभ नहीं होवे है किंतु जन्म जराआदि अनर्थ को प्राप्तहोवे है चित्त का त्रिगुण स्वरूप है तिस २ गुण के अनुसार विषयों में पुरुष प्रवृत्त हुवा शान्ति को नही प्राप्त होवे है किन्तु विषयतृष्णा को ही प्राप्तहोवे हैं इसवास्ते अवश्य तृष्णा का निरोध करना आवश्यक है और तृष्णा का निरोध राजस तामस वृत्तियों के निरोध से होवे है राजस तामस वृत्तियों के निरोध होने से सत्व गुण प्रधान चित्त भगवत्के चिन्तनमें अवश्यही प्रवृत्तहोवे है सो चित्त मोक्ष के सन्मुख होवे है इससूत्र में चित्त पद धर्मि के अभेदाभिप्राय से है सो चित्त वृत्ति के निरोध से भक्ति को प्राप्त होवे है यह सूत्र का आशय है ॥ २२ ॥

प्रमाणमिति समाख्ययैव प्रमाणलक्षणं कर्तुं शक्यतेसूरिभिस्तथापि ल्युट्प्रत्यये भावकरणाद्यर्थसंदेहापगमो न भवतीतिसूत्रमिदमारब्धम्महर्षिणा ॥ किंचैवं सर्वत्र बोद्धुं शक्यत्वाल्लक्षणकथैवोच्छिद्येत । किं च समाख्यासु सर्वत्र न योगार्थबोधनियमः तथा सति घटसमाख्यया घटादिपदादपिचेष्टमानस्यैव कस्यचिदुपस्थानापत्तिः कलशस्य बोधानापत्तिश्च । किंच लक्ष्यलक्षणभेदाभिधायकपदभेदाभावे तत्र नार्थभेदोलभ्येत तन्त्रावृत्त्याद्याश्रयणे च वरं सूत्रकरणमितिभावः॥२४॥प्रमाणं लक्षितं साम्प्रतं शिष्याकांक्षया द्वितीयस्याश्चेतोवृत्तिकोटेर्लक्षणमाचष्टे—

---

न्तयौगिकप्रमाणशब्देनैव लक्ष्यलक्षणोभयं संगृहीतव्यमिति शङ्क्यं भावाधिकरणसाधनाद्यर्थकल्युडादिप्रत्ययान्तसंशयादिवारकत्वेन विशेषविवक्षितार्थबोधकत्वान्नैवमित्याह अत्र यद्यपीत्यादिना।'समाख्या यौगिकः शब्द'इति मीमांसकाः । प्रमीयतेनेनेति प्रमाणमितिपूर्वोक्तयोगेनेत्यर्थः ल्युट्प्रत्ययेइति । ल्युट्प्रत्ययान्तप्रमाणशब्दे एकदेशप्रत्ययांशेनेत्यर्थः । सर्वत्र योगार्थबोधाङ्गीकारेऽतिप्रसङ्गदोषमाह किंचैवमिति । घटसमाख्ययेति । घटचेष्टायामितिधात्वनुसारादिति भावः । ननु रूढिशब्दस्थले मास्तु समाख्यया बोधः यौगिकस्थले तु बाधकाभावेन तथैवास्त्वित्यत आह किंचेति।लक्ष्यलक्षण मात्रस्थले हि उद्देश्यविधेययोर्नियमेन भेदोपेक्षितव्योऽस्ति यथा गन्धवती पृथिवीति तथा च शब्दभेदं विना लक्ष्यलक्षणभावएवानुपपन्नः स्यात् तन्त्रेणापि वक्तुरेव तथाबोधः स्यान्नश्रोतुर्लक्षणवाक्यं तु सर्वसाधारणं वक्तव्यमस्तीत्यनुपपन्नएव शब्दैक्ये लक्ष्यलक्षणभावइतिपिण्डार्थः नार्थभेदइतिछेदः । पदभेदाभावेऽर्थभेदोनैव लभ्यतेइत्यर्थः ।'प्रसिद्धमुद्दिश्याप्रसिद्धं हि विधीयते'इति न्यायेनोद्देश्यविधेयसमर्पकपदभेदस्यावश्यकत्वादितिभावः॥ तन्त्रावृत्त्याद्याश्रयणेचेति।अत्रादिना एकशेषस्यापि संग्रहः। तत्र सकृदुच्चरितस्यैकस्यैव शब्दस्य शक्यानेकार्थप्रतिपादकत्वं तन्त्रं तच्च यत्रानेकार्थबोधोजायतामितीच्छया वक्तुः शब्दोच्चारणानुकूलाकृतिस्तत्र तंत्रेणोच्चारणमिति व्यवहारोयत्र तु न तादृगिच्छा तत्र तथाव्यवहाराभावः । इदं तन्त्रेणोच्चारणमनेकक्रियान्वयविवक्षायामेव सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् तच्च द्वेधा शब्दतन्त्रमर्थतन्त्रं च तत्र शब्दस्यपर्यायप्रवृत्त्यसहत्वे आद्यं यथाक्षाँ इत्यादौ तत्सहत्वे त्वन्त्यम् यथापटाइत्यादौ तत्राक्षा भज्यन्तां भुज्यन्तां दीव्यन्तामित्यादौ

## सू० अप्रमानिमित्तमितरत्॥२५॥

अप्रमा हि प्रमाभिन्नं भ्रमस्मृतिप्रभृतिज्ञानं तन्निमित्तं तदसाधारणकारणमितरदप्रमाणमित्यर्थः। यद्धन्तो भ्रान्ताः स्मर्त्तारश्चोच्यन्ते विशेषज्ञैः न तु प्रमातारइति तदेतदप्रमाणं न नियन्तुं शक्यते तद्धेतूनां दोषाणां संस्का-

---

रथचक्रमध्य ( आवन् ) विपीतरूपाश्च रूपान्वयिपदार्थभेदाद् घोड्डुरावृत्त्यैव बोधः। उच्चारणं तु तंत्रेण। अन्वयिपदार्थस्यैकत्वे तु एकोपस्थित्यैवान्वयोयथा अक्षान्पश्य पटान्पश्येत्यादौ तन्त्रकारणं तु शब्दानां तुल्यरूपता तदुक्तम् 'अक्षाक्षिषुयथाभिन्ना भक्षिभञ्जिदिविक्रियाः। प्रयोगकालभेदेपि प्रतिभेदं पृथक्स्थिताः।अक्षाणां तंत्रिणां तंत्रे उपायस्तुल्यरूपते'तिएवं चाक्षोभज्यतां भुज्यतां दीव्यतामित्यादावेकवचनान्तस्थलेपि तंत्रमुपपन्नमिति भावः। आवृत्तिश्च पौनः पुन्येनोचारणम्। यद्यपि आवृत्त्या उद्देश्यविधेयभावो बहुषु स्थलेषु दृश्यते तथापि आचार्य्याभिप्रेतार्थस्यावृत्त्यापि न श्रोतुर्बोधइत्यभिप्रायेण तंत्रावृत्त्याद्याश्रयणमुपेक्ष्य सूत्रकारेणविशिष्टमेव सूत्रितमिति भावः॥ २४॥ अवसरमभिप्रेत्याप्रमाणलक्षणसूत्रमवतारयितुमुक्तमनुवदति प्रमाणमिति अप्रमा--सूत्रं व्याचष्टे अप्रमाहीत्यादिना। भ्रमस्मृतिप्रभृतिज्ञानमिति अत्र। प्रभृति पदेन संशयादेर्ग्रहणम्। तन्निमित्तं--भ्रमादेर्निमित्तं। स्मर्त्तारश्चेति चकारेण संशयानाइत्यादेः

---

चित्त की वृत्ति उदय होने से संसार प्राप्त होवे है इसवास्ते चित्त की वृत्तिका निरोध ही चित्तनिरोध है इस आशय से वृत्तिका भेद कथन करेहैं(सू० चेतसो वृत्ती द्वे प्रमाणाप्रमाणभेदात् ॥ २३ ॥ प्रमाण और अप्रमाण भेद से चित्त की वृत्ति दोप्रकार की हैं देवतिर्यक् मनुष्य पक्षि आदि सर्व जीवों की चित्तवृत्ति की दो गती हैं एक प्रमाण दूसरी अप्रमाण इन दोनों प्रकार से अन्य प्रकार कोई नहीं है ॥ २३ ॥ प्रमाण वृत्तिका लक्षण करें हैं सू० प्रमाकरणं प्रमाणमिति ॥ २४ ॥)पुरुष में जो पदार्थाकार वृत्तिका प्रतिविम्ब पड़ता है सो प्रमा है जिसके अभिमान से पुरुष अपने को प्रमाता मानता है उसका करण पुरुष प्रतिविम्ब विशिष्ट चित्त की वृत्ति है सो साक्षात् प्रमाण है और इंद्रियें परम्परा से प्रमाण हैं। प्रमाण शब्द के दो अर्थ हैं एक प्रमास्वरूप एक प्रमा का करण इसवास्ते यह सूत्र रचा है कि प्रमाण शब्द का दूसरा अर्थ लियाजावे प्रथम नहीं लियाजावे॥ २४॥

राणां चानन्त्यादिति न तद्विभागोभवितुमर्हति ॥ २५ ॥

इति शब्दोनिर्दिष्टः प्रपूर्वसूत्रे तस्य प्रकारार्थता व्याख्येया प्रमाणेषु तेन निर्द्दिष्टं तत्प्रकारभेदं सर्वसम्मतानुभवबलात् प्रमाणप्रकारकोविद आचार्यः प्रपञ्चयति—

## सू० प्रमाणानिषड़नुभवबलात् २६

तानि च प्रमाकरणतया लक्षितानि प्रमाणानि षडेव न न्यूनान्यधिकानिवाऽऽस्थेयानि कुतोनुभवबलात्सर्ववादिविवादानास्पदानुभवबलादितिवाक्यार्थः । अयमा-

---

संग्रहइतिबोध्यम् । सूचीकटाहन्यायेनाप्रमाणविभागं प्रथममेव निषेधति तदेतदित्यादिना ॥ २५ ॥ प्रमाणकरणं प्रमाणमितिसूत्रेण सङ्गमयन् प्रमाणविभागसूत्रमवतारयति इतिशब्दोनिर्दिष्टइत्यादिना । प्रपूर्वसूत्रेइति । प्रमाकरणं प्रमाणमितीत्यस्मिन्सूत्रेइत्यर्थः चतुर्विंशसूत्रेइतितूचितमितिबोध्यम् । तस्य । इतिशब्दस्य । प्रकारोऽत्रभेदएव तमेवाह प्रकारभेदमिति । प्रमाणानि षडितिप्रमाणविभागसूत्रं व्याचष्टे तानिचेत्यादिना । सर्वं वाक्यं सावधारणं भवतीति न्यायेन षट्त्वं सावधारयति प्रमाणानिषडेवेति । प्रत्यक्षमेव प्रमाणमितिचार्वाकाः । अनुमानमपीति काणादबौद्धाः । उपमानमपीति नैयायिकैकदेशिनः । शब्दोपीति नैयायिकाः । अर्थापत्तिरपीति प्राभाकराः । अनुपलब्धिरपीतिभाट्टवेदान्तिनः । सं-

---

प्रमाण के लक्षणके अनन्तर अप्रमाणवृत्ति का लक्षण करे हैं ( सू०अप्रमानिमित्तमितरत् ॥ २५ ॥ ) प्रमासे भिन्न भ्रमस्मृति आदि को अप्रमा कहे हैं उसका कारण अप्रमाण है जिस भ्रमके होने से पुरुष भ्रांत कहाते हैं औरस्मृति के सम्बन्ध से स्मर्ता कहाते हैं परंच उनको प्रमाता नहीं कहाजाताहै सो अप्रमाण दोष संस्कारादिरूप अनेकप्रकार का है उस का अनियतस्वरूप होने से विभाग नहीं करसकते ॥२५॥ अब प्रमाणों का विभाग दिखावे हैं : ( सू० प्रमाणानिषडनुभवबलात् ।२६।) यद्यपि अनेक वादि परस्पर प्रमाण संख्या में विवाद करते हैं परंच अनुभवमार्ग के न आरूढ होने से वादियों का विवादहै अनुभवके अनुसारदेखनेसे छै ही प्रमाण हैं न्यून अधिक नहीं है ।

---

१ व्याख्यानुसारेण अत्र त्रयोविंशसूत्रात्प्रपूर्वस्मिन्सूत्र इत्यर्थः । प्रशब्दः पूर्वो यस्येत्यर्थो वा ।

शयः । यद्यपि वादिभिरेकद्वित्र्यादिभेदेन प्रमाणसंख्यायां विवादो विधीयते तथापि न वयं तत्र विवदामहे यतःषण्णां प्रमाणानां साधकस्य षड्विधानुभवस्यानुभावका वयं कथं तैरनुभवमनारूढैरभक्तैर्विवदामहे मुधा कोसौ षड्विधोऽनुभवः षड्विधप्रमाणसाधकइतिचेत् प्रत्यक्ष्णोमि अनुमिनोमि उपमिनोमि शाब्दयामि कल्पयामि उपलभे इत्यादि विविधानुभवबलात् षडेव प्रमाणान्यभ्युपगम्यान्यन्यथा विनिगमनाविरहेण सर्वेषामप्रमाणतापत्तौ प्रमाणकथैवोच्छिद्येत मूलाविलोपात् न च सा प्रमाणमार्गमारोहेदिति कृतमनुभवप्रमाणबलमनवलम्ब्यदुर्बलप्रमाणावलम्बनेनेतिकृतबुद्धयएवाविदांकुर्वन्तु । अत्रबहवोविप्रतिपत्तयोभवन्ति यद्यपि तथापि तासां स्वरूपाणि निरासश्च कृतमेव ब्रह्ममीमांसायां तत्ततएवावसेयमलं

---

भवैतिह्येअपिइतिपौराणिकाः । चेष्टापीति तान्त्रिकाः इत्यादिप्रमाणवादभेदमाशङ्क्य अनुभवबलात् षडेव प्रमाणानीति सिद्धान्तमाह यद्यपीत्यादिना । चेष्टासम्भवयोरनुमानेन्तर्भावः ऐतिह्यस्य तु सति प्रमाणेमूलेशब्देन्तर्भावः । मूलेऽसतित्वप्रमाणमेवेति कृत्वा प्रमाणस्य षड्विधत्वं सूपपन्नमेवेतिभावः । प्रमाणविषये व्यवस्थापकश्रुतिस्मृत्योरौदासीन्यादाह अनुभावकावयमिति । पूर्वप्रतिज्ञातं । षड्विधानुभवभेदं पृच्छति कोसाविति । प्रत्यक्ष्णोमीति । अक्षूव्याप्तौ । इत्यस्य लटि रूपमिदमितिबोध्यम् । प्रत्यक्षेण घटंविषयीकरोमीत्यादिक्रमेणार्थः। इत्यादिविविधेति । अत्रादिपदंनभाष्यस्थमन्यथा प्रमाणानि षडेवेतिप्रतिज्ञाभङ्गप्रसंगस्यात् अथवा प्रत्यक्ष्णोमीत्यादौ प्रत्येकं पर्य्यायार्थमादिपदं योज्यं यथा प्रत्यक्षयामीत्यादीतिचिन्तनीयम् । शते पञ्चाशत्संभावयामीत्यादेर्यथायथमनुमानादावन्तर्भावमभिप्रेत्याह षडेव प्रमाणान्यभ्युपगम्यानीति । अन्यथा—विलक्षणप्रमाणभेदकानुभवानङ्गीकारे।सा उच्छिन्नमूला प्रमाणकथा । न चार्थापत्तेरपि व्यतिरेक्यनुमानेन्तर्भावएवास्तु एवमन्यत्रापीति शङ्क्यमन्यत्र पुष्कलं दत्तोत्त-

---

१ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामितिसमाहारैकशेषौ ।

कृतकरणेनेति नेह तत्प्रतन्यत इतिदिक् ॥ २६ ॥ अथा-
वगतः प्रमाणादिरूपवृत्तिप्रकारः केन पुनः क्रमेण चेतो-
वृत्तिनिरोधोविधेयइत्याकांक्षायां तन्निरोधक्रममाह—

## सू० अप्रमाणनिरोधक्र-
## मेण निरोधः॥२७॥

प्रमाणाप्रमाणभेदभिन्ने वृत्ती द्वे पूर्वमुपदर्शिते तयो-
रप्रमाणवृत्तिभेदस्य सर्वथानर्थकरस्य पूर्वंनिरोधोमुमुक्षु-
भिरनुष्ठेयस्तन्निरोधादनुक्रमेण परमार्थप्रतिकूललौकिक-
प्रमाणभावभाक्प्रमाणवृत्तिभेदस्यापि निरोधोऽवश्यमनु-
ष्ठेयोन्यथा लौकिकप्रमाणचतुरचित्तस्य बाह्यवृत्तिप्रवाहे
पतितस्य न शान्तिसुखलवलाभोपि भवेदिति। तस्यापि

---

रत्वादत्र न विवदितव्यं भक्तैः सहेत्याह अत्र बहवइति । नेहतत्प्रतन्यते इति।तत्-
खण्डनमण्डनं नेह प्रवितन्यते विस्तरभयादित्यर्थः॥२६ प्रासङ्गिकं वृत्तिभेदं तल्लक्षणं
चाभिधाय पुनः सिंहावलोकनन्यायेन चेतोवृत्तिनिरोधक्रममेवाह अप्रमाणानि
रोधक्रमेणनिरोधइति।अप्रमाणवृत्तीनामत्यन्तदुःखप्रदत्वेन तन्निरोधपूर्वकएव
प्रमाणवृत्तिनिरोधः कर्त्तव्यइतिसूत्रार्थः । तथैवव्याख्याति प्रमाणेत्यादिना ।
अप्रमाणवृत्तेरिति संशयविपर्य्ययादिवृत्तेरित्यर्थः । प्रमाणवृत्तिभेदस्येति । प्र-
त्यक्षादिप्रमाणजन्यवृत्तिभेदस्येत्यर्थः । लौकिकप्रमाणेन चञ्चलीकृतस्य चित्त-
स्येत्यर्थः । बाह्यवृत्तिप्रवाहइति स्रक्चन्दनवनितादिबाह्यविषयविषयकचञ्चल-

---

(शंका) छै प्रकार का अनुभव कौनसा है। (समाधान) प्रत्यक्षणोमि (मैं प्रत्य
क्ष जानता हूं,१) अनुमिनोमि (मैं अनुमान करता हूँ२) उपमिनोमि (मैं उपमा
न करता हूँ३) शाब्दयामि (मैंशब्दसे जानता हूँ४) कल्पयामि (मैं कल्पना
करताहूँ५) उपलभे (मैं उपलब्धि करताहूँ६)यह छैप्रकार के अनुभव है छैप्रकार
के प्रमाणों को सिद्धकरे हैं इनका विस्तार करने में ग्रन्थवृद्धिहोवे है इसवास्ते
इहां शास्त्रार्थ का विस्तार नहीं किया ॥ २६ ॥ वृत्तिका भेद प्रतीतहुआ है
अब किस क्रम से उसका निरोध होवे है इस आकांक्षा को शांत करने

निरोद्धव्यतामुपदिशति हिततमसमाधिसुखसम्पत्तये सूत्र कृदितिदिक् ॥२७॥ चेतसोनिरोधे निमित्तं वक्तव्यमपरथा सर्वएव प्राणभृतोनिरुद्धचेतसोऽनिरुद्धचेतसोवा भविष्यन्ति न केचन निरुद्धचेतसः केचनानिरुद्धचेतस इति चेत्तत्राह--

## सू० तन्निरोधस्तृष्णा-निरोधात् ॥२८॥

तस्य चेतसोवृत्तिविशेषस्य प्रमाणाप्रमाणभेदाभिन्नस्योच्चावचप्राणभृन्मात्रेणानुभूयमानस्याकीटपतङ्गेभ्यआचदेवर्षिमानुषेभ्योनर्थगर्तावहस्य निरोधः उपशमः तृष्णायाः प्रतिप्राणभृद्दावदहनमिव दुःखसंतापहेतोर्विषयहवि-

---

चित्तवृत्तिप्रवाहे परिणामितया पतितस्य मग्नस्य चित्तस्य न शान्तिसुखलेशोपि भवेदित्यर्थः। तस्यापीति प्रमाणजन्यवृत्तिभेदस्यापीत्यर्थः ॥ २७ ॥ पूर्वत्र प्रमाणाप्रमाणजन्यसामान्यवृत्तिमात्रनिरोधोभिहितइदानीं तत्रापि विशेषदुःखप्रदतृष्णाख्यवृत्तिविशेषनिरोधाभिधायकं सूत्रमवतारयति चेतसोनिरोधइत्यादिना। तृष्णाख्यवृत्तेर्निरोधादन्यवृत्तीनांनिरोधसुकरएव भवतीति सूत्रार्थः। तमेवार्थं प्रतन्वन्सूत्रं व्याचष्टे तस्येत्यादिना। उच्चावचप्राणिभेदमेवाह आकीटेत्यादिना आकारोभिव्याप्त्यर्थः। 'आङीषदभिव्याप्ता' वित्यभिहितत्वात् दावदहनमिवेति 'दवदावौवनारण्यवह्नी'इतिकोषाद् दावोवनम्। करिबृंहितन्यायेन दावाख्योदहनोदावदहनइतिवा सर्वप्राणिभ्योदावदहनवद् दुःखप्रदायास्तृष्णायाइतिपूर्वेणान्वयः। अतश्चित्तशान्त्यर्थं तत्त्यजनमेववरमितिभावः। तदुक्तंवासिष्ठे 'अन्तःशीतलतायां तु लब्धायां शीतलं जगत् अन्तस्तृष्णोपत-

---

के वास्ते सूत्रकहे हैं सू० अप्रमाणनिरोधक्रमेण निरोधः ॥ २७ ॥ अप्रमाण के निरोधक्रम से निरोध होवे है। प्रमाण अप्रमाणरूप जो दो वृत्ति पूर्व दिखाई हैं उन में प्रथम अप्रमाण वृत्ति का निरोध करना चाहिये जिस के संबन्ध से पुरुष भ्रान्त कहाता है।

र्लाभेवृद्धिभाजोवृत्तिविशेषस्वरूपायाश्चेतश्चाञ्चल्यनभस्व-त्सहकारिण्याविषयस्पृहाभिख्याया निरोधाद्भवति शतधा चेतसोनिरोधे प्रयतमानस्यापि समभिहिततृष्णानिरोध-मन्तरा न भवति चेतोनिरोधगन्धोपीति भावः। इम-मेव तृष्णानिरोधं वैराग्यशब्दभाजं भणन्ति योगिनः

---

सानां दावदाहभयं जगदि'ति विषयहविरिति यथाग्निर्हविषावर्द्धतेतथातृष्णापि विषयप्राप्त्याधिकं विवर्द्धतेइत्यर्थः। तदुक्तं मनुनापि 'न जातु कामः कामाना-मुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूयएव विवर्द्धते' इतिचित्तस्य चा-ञ्चल्यं तदेव नभस्वान्पवनः सहकारी यस्यास्तस्यास्तृष्णयाइनिपूर्वेणान्वयः। चित्तचाञ्चल्यं वासिष्ठे उक्तम् 'चेतश्चञ्चलया वृत्त्या चिन्तानिचयचञ्चुरं धृतिं वध्नाति नैकत्र पञ्जरे केसरी यथा' इति॥ परित्यज्य क्षणमपि हृदये याति न स्थितिम् मनोमननक्षुब्धं दिशो दशविधावति' इत्यादि। गीतायां च 'चञ्च-लं हि मनः कृष्ण प्रमाथि बलवद्दृढमि'ति। चित्तचाञ्चल्याचृष्णापि चञ्चुरतां धत्ते तदुक्तम् 'पदं करोत्यलंघ्येपि तृप्तापि फलमीहते चिरं तिष्ठति नैकत्र तृ-ष्णा चपलमर्कटी क्षणमायाति पातालं क्षणं याति नभस्थलम् क्षणंभ्रमतिदिक्-कुञ्जे तृष्णा हृत्पद्मषट्पदी' इत्यादि। यस्ययदपेक्षितं तस्य ततोप्यधिकप्रार्थनं तृष्णा तथा च पुरुषाणां भिन्नरुचित्वात्तदभिमतान्वेषणे न व्यग्रचित्तस्य लोक-वासना वर्द्धते सा च भक्तिविरोधिनी तथा च स्मृतिः। 'लोकवासनयाजन्तोः शास्त्रवासनयापिच देहवासनया ज्ञानं यथावन्नैव जायते' इति इत्याद्यभिप्रेत्याह विषयस्पृहाभिख्याया निरोधाद्भवतीति स्पृहईप्सायां चुरादावदन्तः तस्माद्घञ् अन्वयमुक्त्वाव्यतिरेकमप्याह शतधा चेतसइत्यादिना।योगिनोपि स्वकीयान्करो-ति इममेवेति।वैराग्यशब्दभाजमिति।वैराग्यं द्विविधं परापरभेदात् यतमानव्यतिरे-कैकेन्द्रियवशीकारभेदेन परं चतुर्विधम्। तत्राद्यं त्रयमर्थात्सूत्रयन् साक्षाच्चतुर्थं सूत्रयति भगवान् पतंजलिः 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वै-राग्यमिति स्रक्चन्दनवनितापुत्रमित्रक्षेत्रधनादयोदृष्टाः वेदोक्ताः स्वर्गादयआ-नुश्रविकाः। तत्रोभयत्र सत्यामपि तृष्णायां विवेकतारतम्येन यतमानादिवै-

---

अप्रमाण निरोध से अनन्तर लौकिक प्रत्यक्षादि प्रमाणों का भी निरोध करना उचित है नहीं तो लौकिक प्रमाणों में चतुरचित्त को शान्तिसुख का लेशमात्र भी न प्राप्त होगा तब समाधिसुख की सिद्धि न होगी इसवास्ते प्रमाणों का भी निरोध करना उचित है॥ २७॥ अब चित्तवृत्ति के निरोधका साधन निरू-

ब्रह्मवादिनश्च वेदोपि निर्वेदमायादितीतिनिर्वेदपदेन तृष्णाक्षयमादर्त्तव्यमावेदयतीति बोध्यम् ॥ २८ ॥ अथ यदि तृष्णानिरोधमात्रं चित्तनिरोधे निमित्तं तर्हि तन्निरोधाभ्यासेऽप्रयतमानस्यापि तृष्णानिरोधमात्रात्स्याच्चेतोनि-

---

राग्यत्रयं भवति अस्मिन्जगति किं सारं किमसारमिति गुरुशास्त्राभ्यांज्ञास्यामीत्युद्योगेयतमानं स्वचित्ते पूर्वं विद्यमानदोषाणां मध्ये अभ्यस्यमानेन विवेकेन एतावन्तः पक्का एतावन्तोवशिष्टाइति विवेचनं व्यतिरेकः। दृष्टानुश्रविकविषयप्रवृत्तेः दुःखात्मत्वबोधेन तां प्रवृत्तिं परित्यज्य मनश्चौत्सुक्यमात्रेण तृष्णावस्थापने एकेन्द्रियत्वं वितृष्णत्वं वशीकारः तादिममपरम् वैराग्यमष्टाङ्गयोगप्रवर्त्तकत्वेन संप्रज्ञातस्यान्तरङ्गम् असंप्रज्ञातस्य वहिरङ्गं तस्यान्तरङ्गं परं वैराग्यं सूत्रयति 'तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति' सम्प्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कारउत्पद्यते तस्माच्च साक्षात्कारतारतम्येन योगमेतसमाधेस्तारतम्यं निराकारदर्शने तु भक्तेस्तारतम्यमिति विवेकइतिबोध्यम्। आर्हतबौधवैशेषिकनैयायिकशैववैष्णवसांख्यशाक्तयोगवेदान्तादिमोक्षशास्त्रेषु प्रतिपाद्यप्रमेयस्यानेकविधत्वेपि मोक्षसाधनीभूततृष्णाक्षयरूपवैराग्यादीनामेकविधत्वात् न ते निरकारदर्शने मोक्षसाधने विवदितुमर्हन्तीत्याशयेनाह ब्रह्मवादिनश्चेति चकारोनुक्तसमुच्चयार्थइतिवोध्यम्। तृष्णाक्षयेवैराग्यमित्यत्र श्रुतिंप्रमाणयति निर्वेदमायादितीति ॥ २८ ॥ चित्तवृत्तिनिरोधे तृष्णानिरोधं कारणत्वेनोक्त्वा इदानीम् 'अभ्यासेन च कौन्तेय वैराग्येण च गृह्यते' 'अभ्यासवैराग्याभ्यां तन्निरोध'इति स्मृतिसूत्रसिद्धमभ्यासमपि तत्कारणत्वेनानुवदन् 'अभ्यासोपितदङ्गमि'तिसूत्रमवतारयति अथ यदीतिचेतोनिरोधाभ्यासेऽप्रयतमानस्यापि पुरुषस्य यदि तृष्णानिरोधमात्रं चित्तनिरोधेनिमित्तंस्यात्तर्ह्यभ्यासस्य वैयर्थ्यमापद्येतेत्यन्वयः। यद्यपि स्मृतिसूत्रयोरभ्यासस्य प्रथमोपादानं तथापि पाठक्रमादर्थक्रमोवलीयानितिन्यायेनात्र वैरा-

---

पण करें हैं (सू० तन्निरोधस्तृष्णानिरोधात् ॥२८॥) चित्तका निरोध तृष्णा के निरोध से होवे है चित्त की वृत्तियों का निरोध तृष्णा के निरोध विना होवे नहीं केवल तृष्णा ही चित्त को चंचल कररही है इस की शान्तिसे अवश्य ही चित्त शान्त होजावे है इस वास्ते चित्तके निरोधार्थ तृष्णाका निरोध कर्तव्य है।

रोधइति वैयर्थ्यमभ्यासस्यापद्येत न चास्तु तथेतिशक्यते वक्तुमदृष्टत्वात् तथासति मूर्छादिषु सर्वे स्वतःसिद्धतृष्णानिरोधभाजश्चित्तनिरोधभाजोजीवाभवेयुरिति किंच'भ्यासेन च कौन्तेय वैराग्येणचगृह्यत 'इति भगवद्गीताप्युपरुद्ध्येता'भ्यासवैराग्याभ्यां तन्निरोध 'इति योगसूत्रं चोपरुद्ध्येतानुभवश्च न शरणीकृतोभवेदिति चेत्तत्राह—

## सू० अभ्यासोपि तदङ्गम् ॥ २९ ॥

अभ्यासः स्थितौ यत्नानुष्ठानमपि भवति तस्य तृष्णानिरोधस्याङ्गं सहकारीत्यर्थः अयमाशयः नाभ्यासमनभ्युपेत्य तृष्णानिरोधमात्राच्चेतोनिरोधं वयं साधयामोयेनो-

---

ग्यमेव प्रथमं सूत्रितं सूत्रे तु अजाद्यदन्तमितिसूत्रेणाभ्यासस्य पूर्वनिपातइति बोध्यम् । अभ्यासस्य वैयर्थ्यमाशङ्कते नचेति । ननु दाहादौ पार्णतार्णादिवन्हिवदभ्यासस्य स्वातन्त्र्येणैव कारणत्वमस्तु न तु दण्डचक्रादिवत्समुच्चितमितिशङ्कितुराशयः अभ्यासवैराग्याभ्यां तन्निरोधइत्यत्र साहित्यश्रुतेः अभ्यासेन च कौन्तेय वैराग्येण च गृह्यते 'इत्यत्रसाहित्यार्थकचकारद्वयश्रुतेः सुषुप्त्यादौ निरोधत्वव्यवहारप्रसङ्गाच्च वैराग्याभ्यासयोर्दण्डादिवत्साहित्येनैव कारणत्वमित्याशयेनोत्तरयति अदृष्टत्वादिति वैराग्याभ्यासयोः स्वातन्त्र्येण तार्णपार्णादिवन्हिवत्कारणत्वस्यादृष्टचरत्वादित्यर्थः । अदृष्टत्वे बीजमप्याह तथासतीति । तुष्यतुदुर्जनइतिन्यायेन मूर्छादौ निरोधत्वस्वीकारेप्याह किंचेति । सूत्रं व्याचष्टे अभ्यासइति । अन्तरङ्गाङ्गानामारादेवोपकारकत्वमित्याह तस्य तृष्णानिरोधस्याङ्गमिति अभ्यासस्याङ्गत्वमेवोपपादयन्नाह अयमाशयइति । न ह्यङ्गं विनाङ्गी निष्पद्यतेइतिभावः । चित्तवृत्तिनिरोधेक्रमसमुच्चयएव युक्तस्तदेतद्भगवान् वसिष्ठ आह 'उपविश्योपविश्यैव चित्तज्ञेन मुहुर्मुहुः न शक्यते मनोजेतुं विना युक्तिमनिन्दिताम् अंकुशेन विनामत्तो यथा दुष्टमतङ्गजः अभ्यासविद्याधिगमः साधुसङ्गम एव च वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल सतीषु युक्तिष्वेतासु हठान्नियमयन्ति ये चेतस्ते दीपमुत्सृज्य विनिघ्नन्तितमोञ्जनै ' रितिक्रमनिग्रहे चाध्यात्मविद्याधि-

प्रदर्शितदिशादोषलेशभाजोभवेम किंत्वभ्यासवैराग्ययोरुभयोरपि चेतोनिरोधनिदानत्वमंगीकुर्मस्तथा सत्यपि

गमएकउपायः स हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनश्च परमार्थसत्यपरमानन्दस्य प्रकाशत्वं बोधयति यथा च सत्ये तन्मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयोजनाभावे प्रयोजनवति च परमार्थसत्यपरमानन्दरूपे दृग्वस्तुनि स्वप्रकाशत्वेन स्वागोचरत्वं बुद्ध्वा निरिन्धनाग्निवत् स्वयमेवोपशाम्यति यस्तु बोधितमपि तत्त्वं न सम्यग् बुध्यते योवा विस्मरति तयोः साधुसंगमएवोपायः साधवोहि पुनः पुनर्बोधयन्ति स्मारयन्ति यस्तु विद्यामदादिदुर्वासनयापीड्यमानो न साधूननुवर्तितुमुत्सहते तस्य पूर्वोक्तविवेकेन वासनापरित्यागएवोपायः यस्तु वासनानामतिप्राबल्यात्तास्त्यक्तुं न शक्नोति तस्य प्राणस्पन्दनिरोधएवोपायः प्राणस्पन्दवासनयोश्चित्तप्रेरकत्वात्तयोर्निरोधे चित्तशान्तिरुपपद्यते तदेतत्सएवाह 'द्वेबीजे चित्तवृक्षस्य प्राणस्पन्दनवासने एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया आसनाशनयोगेन प्राणस्पन्दो निरुध्यते असंगव्यवहारित्वाद्भवभावनवर्जनात् शरीरनाशदर्शित्वाद्वासना न प्रवर्त्तते वासनासंपरित्यागाच्चित्तं गच्छत्यचित्ततां प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव यद्भावनं वस्तुनोन्तर्वस्तुत्वेन रसेन च यदा न भाव्यते किंचिद्धेयोपादेयरूपि यत् स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते अवासनत्वात्सततं यदा न मनुते मनः अमनस्ता तदोदेति परमात्मपदप्रदे' ति अत्र द्वावेवोपायौ पर्यवसितौ प्राणस्पन्दनिरोधार्थमभ्यासः वासनापरित्यागार्थं च वैराग्यमिति साधुसंगमाध्यात्मविद्याधिगमौ त्वभ्यासवैराग्योपपादकतयान्यथासिद्धौ तयोरेवान्तर्भवतः अतएव भगवता ' अभ्यासेन तु वैराग्येणचेति द्वयमेवोक्तम् अतएव भगवान् पतञ्जलिरसूत्रयत् 'अभ्यासवैराग्याभ्यां तन्निरोध ' इति तासां प्रागुक्तानां प्रमाणविपर्य्ययविकल्पनिद्रास्मृतिरूपेण पञ्चविधानामनन्तानामासुरत्वेन क्लिष्टानां देवत्वेनाक्लिष्टानामपि वृत्तीनां सर्वासामपि निरोधेनिरिन्धनाग्निवदुपशमाख्यः परिणामोभ्यासेन वैराग्येण च समुच्चितेन भवति तदुक्तं योगभाष्ये ' चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहतिपापायच तत्र या कैवल्यप्राग्भाराविवेकनिम्ना सा कल्याणवहा या त्वविवेकविषयनिम्ना संसारप्राग्भारा सा पापवहा तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन च कल्याणस्रोतउद्घाट्यते इत्युभयाधीनश्चित्तवृत्ति-

साधनतायां वैराग्यं मुख्यमाश्रयामोऽभ्यासं तु तदङ्गमिति। वैपरीत्यं कुतोनेतिचेन्न यतोवैराग्यभाजोभवत्येव चेतसः स्थितायैत्नानुष्ठानं न त्वेवमभ्यासभाजोपि वैराग्यलाभः सुलभोभवति दृश्यन्ते हि शतशोयतमानाअपि तात्स्थितौ वैराग्यालाभेन चेतोनिरोधमलभमाना लभमानाअपि लेशतस्तां तृष्णाकर्मनाशाप्रवाहे वहमानास्ततोन वैपरीत्यं नापि वैराग्याभ्यासयोः समप्रधानता एतदेवाभिप्रेत्य सूत्रद्वयेयत्नोऽन्यथा योगशास्त्रवदेकमेवोभयसाधनबोधकं सूत्रं कुतोन प्रणीतं स्यात्। अतएवभगवद्गीतायामभ्यासवैराग्यपदयोर्न द्वन्द्वसमासोदर्शितः योगिभिर्दर्शितोपि नविवक्षितोऽभिहितहेतोः उक्तंचाद्भुतगीतायां साहाय्येनास्य वैराग्यं भक्तिभावं प्रसूयतेइतितस्मात्सिद्धमेतदभ्यासोवैराग्यस्याङ्गमितिइति ॥ २९ ॥ अथ भव-

निरोध'इति 'तीव्रवेगोपेतं नदीप्रवाहं सेतुबन्धेनन निवार्य्यकुल्याप्रणयनेन क्षेत्राभिमुखं तिर्य्यक्प्रवाहान्तरमुत्पाद्यते तथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य्य समाध्यभ्यासेन प्रशान्तवाहिता संपाद्यते इति द्वारभेदात् समुच्चयएव एकद्वारत्वे हि व्रीहियववद्विकल्पः स्यादिति संक्षेपः ॥ शङ्करानन्दोक्तमभ्यासस्य मुख्यत्वं खण्डयन्नाहवैराग्यं मुख्यमिति। अभ्याससहकृतमित्यर्थः। तदङ्गमितिवैराग्यसहकारिणमभ्यासमित्यर्थः। वैपरीत्यं शङ्कते—वैपरीत्यमिति-अभ्यासस्य वैराग्यमेव सहकारि अस्तु विनिगमनाविरहादितिशङ्कितुराशयः। पूर्वोक्तान्वयव्यतिरेकावेवविनिगमकावित्याह न यतो वैराग्यभाजइति यत्नानुष्ठानमिति यतनस्य मन्त्रेष्टदेवध्यानादेरनुष्ठानमभ्यासइत्यर्थः। अन्वयमुक्त्वा व्यतिरेकमाह नत्वेवमभ्यासभाजोपीति। वैराग्यालाभेनेति वैराग्यराहित्यरूपदोषेणेत्यर्थः। अभ्यासोङ्गमिति वैराग्यस्याभ्यासः सहकारीत्यर्थः निगदव्या-

इस तृष्णानिरोध का ही वैराग्य शब्द से व्यवहार होवे है, वेद में निर्वेद नाम भी तृष्णानिरोध का है ॥ २८ ॥ तृष्णा निरोधमात्र से चित्तका निरोधमानोगे तो सुषुप्ति मूर्छादि अवस्था में स्वतःसिद्ध तृष्णानिरोध से चित्त का निरोध

स्वभ्याससहकृततृष्णानिरोधाच्चित्तनिरोधस्ततश्चभक्ति- लाभोमोक्षलाभकरो यदि तृष्णानिरोधः सुलभोभवेत्स एव तु दुर्लभोविषयवासनानामनादिदृढतरभ्रममूलाना- मतिदृढतया दुरुच्छेद्यत्वेन वैराग्यस्यैव दुर्लभत्वात् । न च दोषदर्शनेन विषयेषु वैराग्यमुत्पत्स्यतइति वाच्यम् । तस्यापि वैराग्यवद्दुर्लभत्वात् जातस्यापि कथंचित्तत्क्षणं शोभनाध्यासेनानादिना तिरस्करणात् तस्य प्रत्यक्षसा- क्षिकस्य तनूकरणस्य तनुभूतामशक्यत्वात्सुशक्यत्वे विष- यभोगान्ते सर्वेषां वैरस्यभानात् सर्वेपि विरक्ताभवेयुरतो ब्रवीति—

## सू० नामानुकीर्त्तनातृ- ष्णानिरोधः॥३०॥

भवन्तु तावदवासना विषयप्रवर्त्तननिपुणाः शोभना- ध्यासाश्च विषयेषु भगवन्नामविमुखानां दृढतरबद्धभगभ-

---

ख्यातंभाष्यमन्यत् ॥२९॥ तृष्णानिरोधेभ्यासस्यांगत्वमभिधाय द्विर्बद्धं सुबद्धं भवतीपुरःसरं 'नामानुकीर्त्तनात्तृष्णानिरोध' इति सूत्रमवतारयति अथ भवत्वित्यादिना दुर्लभइति । दुर्घटइत्यर्थः । सूत्रं व्याचष्टे भवन्तु तावदित्या-

---

होना चाहिये तब विना यत्नसे मुक्ति होनी चाहिये इस शंका का समाधान करें हैं ( सू० अभ्यासोपि तदङ्गम् ॥२९॥ ) चित्त की स्थिति में यत्नका अनुष्ठानरूप अभ्यास भी तृष्णानिरोध का सहकारी है । चित्त के निरोध में तृष्णानिरोध मुख्य हेतु है और अभ्यास सहकारीमात्र है सो गौण है तृष्णा निरोध विना अनेकवार अभ्यास करनेसे भी चित्तनिरोध नहीं होता और तृष्णानिरोध से अवश्य ही साधनाभ्यास होजावे है इस वास्ते तृष्णानिरोध मुख्य मानना उचित है अभ्यास मुख्य नहीं है ॥

न्नामानुरागाभक्तप्रवरास्तु भगवन्नामकीर्त्तनप्रभवभगवत्प्रसादबलमवलम्ब्य वासनासहस्रमपि समूलमुन्मूलयन्ति निर्वासनाश्च ते भवन्ति विगतविषयतृष्णाइति किं दुर्लभं भगवद्भक्तानां भगवन्नामानुकीर्त्तनतत्पराणामितिभावः। अत्रानुशब्देन नामकीर्त्तनं गुरुमुखश्रवणादेवानुसमनुष्ठातव्यं सफलतायै वेदानुवचनादिवदिति सूच्यते, अयंभावः। तनुभृतां स्वयमशक्यमपि गुरुप्रसादावाप्तयुक्त्या नामकीर्त्तनलब्धपरमेश्वरप्रसादेन शक्यं वासनादिसहस्रमप्युच्छेत्तुमिति तस्मादवश्यं भवतिभक्तानां भगवन्नामानुकीर्त्तनात्तृष्णानिरोधइतिशिवम्।३०। अथावगतं भगवन्नामानुकीर्त्तनात्तृष्णानिरोधस्तस्माच्चित्तनिरोधस्ततश्च भक्तिर्भवति मोक्षावहेति तथापि तु भक्तेः स्वरूपमुप-

---

दिना भगवन्नामविमुखानां विषयप्रवर्त्तननिपुणवासना भवन्तु तावदित्यन्वयः अग्रे स्पष्टं सर्वम् नामकीर्त्तने पूर्वं पुष्कलं प्रमाणमभिहितमितिबोध्यम्॥ ३०॥ पूर्वत्रोपजीव्यत्वेन परवादनिराकरणपूर्वकं भक्तेरुपकरणमुपवर्ण्येदानीमुपजीविकां भक्तिं सूत्रयति सूत्रकारः भक्तिर्भगवतिचित्तैकताननेति। तदेतत्सूत्रं वृत्तकथनपुरःसरमवतारयति अथज्ञातमित्यादिना। अथेत्यस्य यद्यपीत्यर्थः।

---

और तृष्णानिरोध के बिना अभ्यासमात्र से कदाचित् चित्तनिरोध होभीजावे तौभी तृष्णारूप कर्मनदी के प्रवाहमें पुरुष गिरते दीखते हैं इसवास्ते तृष्णा निरोध मन के निरोध में मुख्य साधन है॥ २९॥ (शङ्का) तृष्णाका निरोध दुर्लभ है क्योंकि अनादिकाल से विषयवासना का प्रवाह चलाआता है सो अवश्य ही तृष्णा को उत्पादन करेगा और जो कहोकि विषयों में दोषदृष्टि से वैराग्य उदय होगा तौ सोभी बनेनहीं काहेते विषयों में भोगनाध्यास अनादिकाल से चलाआता है वह दोषदृष्टि को नहीं होनेदेगा॥

दर्शयन्तद्विना न नोनिश्चयं चेतो बध्नाति मुक्तेर्भक्तिभाव्यत्वे साधकस्वरूपस्याज्ञानात्ततइदमुच्यते—

## सू० भक्तिर्भगवति चित्तैकतानता ॥ ३१ ॥

सत्यं भक्तिस्वरूपनिश्चयमन्तरानिश्चयोमुक्तेर्भक्तिभाव्यत्वस्येति तथापि न भक्तेः स्वरूपमतितिरोहितं भक्तानां तथाहि प्रथमं भगवति षडैश्वर्यसम्पन्नेऽनन्तक-

---

ज्ञातमित्यस्य मोक्षावहेति ' इति परेणान्वयः । भक्तेः स्वरूपमिति । भक्तेः स्वरूपलक्षणमनुवर्णनीयमित्यर्थः एवं च भक्तिनिरूपणस्यावसरोपि समागतइति सूचितमितिबोध्यम् । भक्तिभाव्यत्वे इति भक्तिनिष्ठसाधनतानिरूपितमुक्तिनिष्ठसाध्यत्वविषये । चेतोनिश्चयं न बध्नातीतिसोपस्कारोन्वयार्थः । सूत्रं व्याचष्टे सत्यमित्यादिना सत्यमित्यस्यापि यद्यपीत्यर्थः । भक्तेः स्वरूपमतितिरोहितं भक्तानामिति । भजनं भक्तिः भजसेवायामस्मात् क्तिन्प्रत्ययः । तदुक्तंगारुडे । ' भजइत्येषवै धातुः सेवायां परिकीर्त्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी 'तिभगवतीति षड्विधैश्वर्य्यसंपन्ने भगवति तथोक्तं विष्णुपुराणे ' ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णांभगइतीङ्गना ॥ ' इति एतादृशं समग्रमैश्वर्य्यादिकं नित्यमप्रतिबन्धेन यत्रवर्त्तते सभगवान् नित्ययोगे मतुप् तथोक्तं तत्रैव ' उत्पत्तिं च विनाशं च भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च सवाच्यो भगवानिति ' इति । तत्र भूतानामिति प्रत्येकं संबध्यते उत्पत्तिविनाशशब्दौ तत्कारणस्याप्युपलक्षकौ आगतिगती आगामिन्यौ संपद्विपदाविति प्रकृतिखण्डेप्युक्तम् । समृद्धिबुद्धिसंपत्तियशसां वचनं भगः तेन शक्तिर्भगवती भगरूपा च सा सदा तया युक्तः सदात्मा च भगवांस्तेन कथ्यते ' इति ॥ अनन्तकल्याणगुणगणसीम्नीति गुणा आनन्दादयः ' बृहतोह्यस्मिन्गुणा ' इतिश्रुतेः ' आनन्दं ब्रह्मणोविद्वानितिश्रुतेः । मय्यनन्त-

---

सामान्य से विषयों में दोषदृष्टि भोगान्त में सर्वको होवे है तब सर्व ही मुक्त होने चाहियें इस शङ्का का समाधान करें हैं ( सू०नामानुकीर्तनात्तृष्णानिरोधः ॥३०॥ ). विषयों की वासना और सुन्दरता का भान दोनों परमेश्वर की भक्ति से विमुख पुरुषों में होवे हैं और जिन पुरुषों ने परमेश्वर के नाम में

ल्याणगुणगणसीम्नि भूभारापहारणकारणधृतानन्ताऽवता-
रेऽसारसंसारसारे संसारधर्मविवार्जिते सर्वमुनिमानसावि-
रामेऽकाममनोऽभिरामे श्रीरामे स्वकीयचित्तस्यैकताननतां
विधाय विक्षेपसहस्रमजस्रं प्रतिघस्रं विधूय अभिजात-
मणिनीकाशं चित्तप्रकाशं प्राप्य तद्गुणानुगुणिनि तस्मि-
न्नेव प्रविलाप्य निर्गुणनिष्कलामलसकलकल्पनाविनि-

गुणेऽनन्तइति भागवताच्च । यद्वा अनन्ताये कल्याणगुणा बलानन्दादयस्ते-षां गणे गणने प्रकाशने सीम्नीत्यर्थः । तथा च श्रुतिः बलमानन्दओजश्च स-होज्ञानमनाकुलम् स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्धिभोरि'ति । भूभारा-पहारणेति भूभारापहारार्थं धृता अनन्ताअवतारा येनेति विग्रहः । तदुक्तं गर्ग-संहितादौ 'गोसाधुदेवताविप्रवेदानां रक्षणाय वै तनुं धत्ते हरिः साक्षाद्भगवा-नात्मलीलया' इति यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थान-मधर्मस्य तदात्मानं सृजाम्यहम्' तद्वैभगवतोरूपं विशुद्धं सत्त्वमूर्जितम् एतन्ना-मावताराणां निधानं बीजमव्यय 'मित्यादिस्मृतेः । उपासकानां कार्य्या-र्थे ब्रह्मणोरूपकल्पने'त्यादिश्रुतेश्च ॥ अवतारा बहवोविष्णोर्लीलानुकारिण इ-त्यादिपुराणाच्च भगवतोवतारबहुत्वमितिबोध्यम् । सर्वमुनिमानसविरामइति स-र्वमुनिमानसानां विरामो विशेषेण रमणं यत्र स तस्मिन् श्रीरामे इत्यन्वयः । तदुक्तम् भाग् 'रमन्तेयोगिनोनन्ते नित्यानन्दे चिदात्मनिइति रामपदेनेदं परं-ब्रह्माभिधीयते' इत्यादि यद्वा सर्वेषां मुनीनां मानसेविरमतेइतिविग्रहः । अ-स्मिन् पक्षे ज्वलादित्वाण्णप्रत्ययइति बोध्यम् अकाममनोभिरामे । पुंसोया वि-षयापेक्षा सकामइतिभण्यते इत्युक्तेर्विषयाभिलाषरहितानां सात्त्विकभक्तानांम-नोहरे । एवं भूते श्रीरामे निर्गुणभक्तिसंपादनाय एकतानतां भक्तिं विधाये-

दृढप्रेम करा है वह पुरुष वासनागण को विनाश करके तृष्णारहित दीखते हैं भगवत् के नामकीर्त्तन से भगवत् की कृपाके बलकरके उस अनादिवासना को त्यागकै विगततृष्णा वैराग्यवान् भगवत् भक्तजन लोकवेद प्रसिद्ध हैं इस वास्ते भगवत्के नामके कीर्त्तन श्रवणादि से तृष्णा का निरोध होवे है ॥ ३० ॥ भक्तिके स्वरूप को सूत्र करके वर्णन करे हैं (सू० भक्तिर्भगवतिं चित्तै-कतानता ॥ ३१ ॥ ) भगवत् के स्वरूप में चित्त की वृत्ति की एकाकारता को भक्ति कहे हैं ॥

मुक्तनित्यमुक्तश्रुत्युक्तशुद्धसच्चिदानन्दसर्वात्मप्रत्यगात्मस्वभावमनुलवंध्यायन्नखण्डैकरसवृत्तिसन्तानं विजातीयवृत्तितिरस्कृतिरहितं स्वहितं प्रेमाभिख्यं भावं भक्तिनामानमासाद्य कृतकृत्यमात्मानं मन्यमानो न मन्यते ब्रह्मलोकादिभोगोपयोगमिति जीवन्मुक्तिं लभमानोभक्तोवर्त्तमानोपि व्यवहारभूमौ कथमिव न भक्तेर्महिमानमश्नुवीतोपदिशेच्च दयालुरिति भक्तिमहिमविज्ञानायोपासनी-

---

त्यर्थः। अजस्रंनिरन्तरम्। प्रतिघस्रं प्रतिदिनम्। अभिजातमणिनीकाशमिति शाणोल्लिखिताभिनवनीलमणितुल्यं चित्ते प्रकाशं सगुणभक्तिफलं ज्ञानं प्राप्येत्यर्थः। तस्यैव भगवतएव गुणान् आनन्दादिगुणान् तस्मिन् गुणिनि गुणोपलक्षिते शुद्धे ब्रह्मण्येव प्रविलाप्य गुणत्वेन गुणानां लयंचिन्तयित्वा आनन्दादिस्वरूपत्वेन ब्रह्मणोनिश्चयं कृत्वा ततोब्रह्मलोकादिभोगोपयोगं भक्तिं योगं न मन्यते कृतकृत्यत्वादितिखण्डशोर्थः। यदुक्तं साम्यसालोक्यसामीप्यं सार्ष्टिं सायुज्यमेव वा ददाम्यपि न गृह्णन्ति भक्ता मत्सेवनं विने'ति। गुणविधूननस्य फलमाह निर्गुणेति सत्त्वादिगुणरहितः। सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः सशुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदत्वि'ति विष्णुपुराणात् शुद्धेति असंकीर्णेत्यर्थः। अनुलवं निरन्तरम्। विजातीयवृत्तितिरस्कृतिरहितमिति विजातीयवृत्तिकर्तृकतिरस्काररहितमित्यर्थः। भक्तिनामानं भावं परमप्रेमाणमित्यर्थः। निर्गुणभक्तिपक्षे 'आनन्दं ब्रह्मणोविद्वान्न बिभेतिकुतश्चने'त्यादौ ब्रह्मणइत्यादिषष्ठी तु राहोः शिरइत्यादिवदभेदेएव पर्य्यवस्यतीतिबोध्यम्॥ कथमिवनभक्तेर्महिमानमश्नुवीतोपदिशेच्चेति किन्नभक्तिमहत्त्वं गृह्णाति स्वयमन्येभ्यउपदिशति चेत्यर्थः। उपदेशे हेतुगर्भितं भक्तस्य विशेषणमाह दयालुरितीति। भक्तवरइति सात्विकभक्तइत्यर्थः। भक्ता हि त्रिविधास्सात्विकराजसतामसभेदात् तदुक्तं ब्राह्मे भक्तिर्विभिद्यते मत्तस्त्रिविधा गुणभेदतः। स्वभावोयस्य यस्तेन तस्य भक्तिर्विभिद्यते॥ यस्तु हिंसां समुद्दिश्य दम्भमात्सर्य्यमेव वा। भेददृष्टिश्च संदम्भीभक्तोमे तामसः स्मृतः॥फलाभिसन्धिर्भोगार्थीधनकामो यशस्तथा। अर्चादौ भेदबुद्ध्या मां पूजयेत् स तु राजसः॥ परस्मिन्नर्पितं यस्तु कर्मनिर्हरणाय वा। कर्त्तव्यमिति वा कुर्य्याद्भेदबुद्ध्या ससात्विक ' इति स-

योभक्तवरोऽवरैर्भक्तैरित्याशयोभक्तवर्य्यस्याचार्य्यस्यभगवतइतिदिक्॥३१॥ अथ कथं मिथ्याभूतायाश्चित्तैकतानताया भक्तेरवितथयामुक्तेर्लाभोन च भक्तिरप्यवितथेति भवता भणितुमपि शक्यं द्वैतवादप्रसंगात् मिथ्यातः सत्यसिद्धाभ्युपगमे त्वदृष्टत्वान्नविश्वासोऽस्माकीनइतिचेत्तत्रोच्यते अद्वैतवादिना—

## सू० न च सामिथ्याऽमिथ्याविषयत्वात् ॥ ३२ ॥

किंमियं भक्तिः स्वरूपतोमिथ्येत्यभिधीयतेभवता विषयतोवानाद्योवक्ष्यमाणसमाधेर्नान्त्योभक्तेर्विषयस्य भगवतो

---

एवोपासनीयइत्यर्थः तदुक्तम् ॥ न मद्भक्ता विनश्यन्ति मद्भक्ता वीतकल्मषाः । आदावेतत्प्रतिज्ञातं नमे भक्तः प्रणश्यति ॥ योवा निन्दति तं मूढो देवदेवं स निन्दति । योहि तं पूजयेद्भक्त्या स पूजयति मां सदा ' इति । ननु पूर्वोक्ता भक्तिर्मिथ्या सत्या वा उभयथापि न संभवति वक्ष्यमाणदोषादित्याक्षेपेण **न च सामिथ्याऽमिथ्याविषयत्वादितिसूत्रमवतारयति** अथकथमित्यादिना सत्यत्वपक्षमाशङ्कयाह न च भक्तिरिति द्वैतवादप्रसंगादिति ' एकमेवाद्वितीयं ब्रह्म'त्यादिश्रुतिविरोधादित्यर्थः ननु पूर्वोक्तद्वैतभिया मिथ्याभूतभक्तेः सकाशात्सत्यं प्रयोजनं सिध्यत्वित्याशङ्क्य दृष्टान्ताभावान्नैवमित्याह मिथ्यातइति । दृष्टान्ताभावे मिथ्यातः सत्यस्य सिद्धौ नास्माकीनोविश्वासइत्यर्थः । अद्वैतवादिनेति । निराकाराद्वैतवादिनेत्यर्थः । त्रयोन्येहि अद्वैतवादिनः प्रथन्ते विशिष्टाद्वैतवादिनः केवलाद्वैतवादिनश्चेति तत्र श्रीगुरुनानकदेवस्तु निराकाराद्वैतवादी चतुर्थइति बोध्यम् । पूर्वोक्तप्रथमविकल्पपक्षे सा भक्तिः स्वरूपतो विषयतोवा मिथ्याइत्याशङ्क्य तत्र द्वितीयपक्षमादाय सूत्रं व्याचष्टे किमियं भक्तिरिति । भक्तेर्यच्चित्तैकतानतारूपं स्वरूपं तदेव मिथ्यावाधितमित्यर्थः । विषयतोवेति वाधितविषया वा भक्तिरित्यर्थः वक्ष्यमाणसमाधेरिति । ' स्वरूपतश्चोद्बोधेपि समानमि'तिसूत्रेणेतिशेषः । मिथ्यात्वाभावादिति । सत्यत्वा-

मिथ्यात्वाभावादन्यथा शून्यवादापत्तेर्जगदान्ध्यप्रसङ्गःवि-
ज्ञायते हीदं ज्ञानेष्वपि मिथ्यार्थविषयकत्वमेव मिथ्यात्व-
न्तेन चावितथार्थासिद्धिः । मरुमरीचिसलिलेन पाना-
वगाहनाचमनादिकार्यदर्शनात्तत्रामिथ्यात्वं चामिथ्यार्थ-
विषयकतयैव तेन चपानावगाहनादिकार्यस्य गाङ्गादितो-
येषु सिद्धिः तथा चाहुः अज्ञाताबाधितार्थविषयकं ज्ञान-
म्प्रमेति वाधितार्थविषयोवोधो भ्रमइति च तथा च प्रकृते
भक्तेरवाधितस्वभावभागवततत्त्वविषयकत्वात्प्रमास्वभा-
वतैवेति न मोक्षासाधकत्वशङ्कापिशाचिका पदम दधाति

---

दित्यर्थः । एतेन तुच्छेशशशृङ्गादौ मिथ्याभावेपि न दोषइतिबोध्यम् । ज्ञानेषु ॥ इदं विज्ञायते प्रतिज्ञायते इदं पदार्थमाह मिथ्यार्थविषयकत्वमेव मिथ्यात्वमिति । प्रतिपन्नोपाधौ सत्त्वेन प्रतीतियोग्याज्ञाताबाधितार्थभिन्नविषयकत्वं मिथ्यात्वमित्यर्थः । एतेन तुच्छादौ नाव्याप्तिरितिभावः । तेन च मिथ्याज्ञानेन च । अवितथार्थासिद्धिरिति । यथार्थार्थप्राप्तिरित्यर्थः । भ्रमाभिन्नज्ञानस्य बाधितार्थविषयत्वे दृष्टान्तेन हेतुमाह मरुमरीचीति मरुस्थलेतरुणतरणिप्रसरणशीलकिरणगणसंपर्केण प्रतीयमानमृगतृष्णाख्यजलेनेत्यर्थः तत्रज्ञानेषु अमिथ्यात्वं यथार्थत्वम् स्वोक्तेर्थे वेदान्तिनामपि सम्वादमाह तथाचाहुरिति भूमिकां प्रसाध्यसूत्रस्य तात्पर्य्यमुपोद्बलयति तथाचेत्यादिना अवाधितेति अवाधितभागवताद्वयस्वरूपेत्यर्थः । अतएव भेदग्राहकमित्याद्यग्रिमग्रन्थेन नास्या-

---

प्रथम सगुण स्वरूप परमात्मा का चिन्तन करके विशेय समूह के विनाश करके अनन्तर उसके गुणोंको उसके स्वरूप में लय चिन्तन करके निर्गुण निर्मल सत् चित् आनन्द स्वरूप परमात्मा मैंहूं ऐसा निरंतर चिन्तनकरे और विजातीय वृत्तिका त्यागकरे सजतीय वृत्तिके प्रवाहका विस्तारकरे और व्यवहार कालमेंभी चेतन स्वरूप अतिरिक्त पदार्थ कोई न देखे तब वह एक अखंड सत् चित् आनन्द स्वरूपको विषय करनेवाली वृत्ति प्रवाहभक्ति है ॥ ३० ॥ जो चित्त की वृत्ति स्वरूप ही भक्ति मानोगे तो वृत्तिको मिथ्या होने से सत्य मुक्ति की सिद्धि न होनीचाहिये मिथ्या से सत्य की सिद्धिहोवे है इस कथन में हमारा विश्वास नहीं है और द्वैतवाद की प्राप्तिहोने से भक्तिको सत्य नहीं मानसकते इस शंकाका समाधानकरे हैं ( सू० नचसामिथ्याऽमिथ्याविषयत्वात् ॥३२॥) भक्ति मिथ्या नहीं है अमिथ्या विषयकहोने से क्या

अथ कथंभक्तिविषयस्याबाध्यत्वमितिचेद्बाधकानिरूपणात् तत्त्वन्नच प्रत्यक्षं भेदग्राहकमेव बाधकमितिकिमपरान्वेषणेनेतिभ्रमितव्यम् चन्द्रप्रादेशिकत्वादिप्रत्यक्षवद्भेदप्रत्यक्षस्याप्रामाण्यशङ्काकलङ्कितस्याबाधकत्वात् । गृहीतप्रामाण्यस्यज्ञानस्यविरोधिनोबाधकत्वादन्यथाभ्रमाविरोधाद्बाधबुद्धेरनुदयापत्तिः-यथा च तत्रागमश्चन्द्रमसोऽधिकपरिमाणप्रमापकोभवति भवति तथा प्रकृतेपि 'नेहनानास्ति किं चन नात्र का चन भिदास्ति'। 'मृत्योः समृ-

संगतिरिति बोध्यम् । इति हेतौ यथापिशाचिका भूमौपादं न दधातीति प्रसिद्धिः देवयोनित्वात्तथात्रापीतिभावः । उत्सूत्रमाशङ्कते कथमित्यादिना । समाधत्ते बाधकानिरूपणादिति ॥ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरितिप्रसिद्धौ लक्षणप्रमाणे वस्तुसाधके तयोरभावएव वस्त्वसाधकोवक्तव्यस्तत्र तावत्प्रत्यक्षस्य बाधकत्वमाशङ्क्य मल्लनिवर्हणन्यायेन निषेधति न च प्रत्यक्षमित्यादिना । किमपरान्वेषणेनेति । प्रत्यक्षप्रमाणस्य ज्येष्ठत्वात्किमपरेषामनुमानादीनामन्वेषणेनेत्यर्थः । चन्द्रप्रादेशिकत्वादिति । चन्द्रनिष्ठप्रदेशपरिमितत्वादिप्रत्यक्षवदित्यर्थः यथादूरत्वादिदोषवशाच्चन्द्रेप्रादेशिकत्वं भ्रमसिद्धं तथा प्रकृतेपीतिभावः अत्रादिना रथचक्राकारत्वादेर्ग्रहणम् 'प्रदेशोदेशमात्रेस्यात्तर्जन्यङ्गुष्ठसंमिते' इतिमेदिनीकोशात् । तिर्यक्प्रसृततर्जनीसहिताङ्गुष्ठसंमितं मानं प्रदेशइतिबोध्यम् । चन्द्रतारकादिपरिमाणे व्यभिचाराज्ज्ञात्या न प्रत्यक्षस्य प्रामाण्यमित्याह भेदप्रत्यक्षस्येति । अप्रामाण्यदोषदूषितस्य प्रत्यक्षस्याबाधकत्वादित्यर्थः । तत्र प्रत्यक्षागमयोर्विरोधे यथाचन्द्रमसोऽधिकपरिमाणप्रमापक आगमोऽस्ति तथा प्रकृतेपि भेदविषयेपि भेदबाधप्रमापकआगमोभवतीतिवर्त्तुलार्थः । अयं हि चन्द्रमण्डलप्रमापकआगमोभवति 'यदहस्तरणेर्मण्डलं प्रतपतस्तद्विस्तारतोयोजनायुतमाचक्षते द्वादशसहस्रं सोमस्ये'ति । भेदबाधिकाः । काठकादिश्रुतीरुदाहरति नेह नानास्तीति । मनसैवेदमाप्तव्यं नेहनानास्ति किं चन मृत्योः स मृत्युं गच्छति यइह नानेव पश्यति' इति । प्रागेकत्वविज्ञानादाचार्यागमनसंस्कृतेन मनसा ब्रह्मैदमेकरसमाप्तव्यमात्मैव नान्यदस्तीति । आप्तेश्चनानात्वप्रत्युपस्थापिकाविद्याया निवृत्तत्वादिह ब्रह्मणि नाना नास्ति किं-

१ प्राबल्यमित्यर्थे तात्पर्यम् ।

त्युं गच्छति यइह नानेव पश्यती ' त्यादिवेदोभेदापवादहेतुः अनुमानादिकं चागमविरोधे सत्याभासीभूतं न भवति भक्तिविषयाभेदबाधक्षमम्। अन्यथानरशिरःकपालशुचित्वानुमानमपिशुचित्वसाधनायसमर्थम्भवत्क-

---

चनाणुमात्रमपि यस्तु पुनरविद्यातिमिरदृष्टिं न मुञ्चति नानेव पश्यति स मृत्योर्मृत्युं मरणान्मरणंपुनःपुनर्जन्ममरणभावमाप्नोति प्रतिपद्यतेएव स्वल्पमपि भेदमध्यारोपयन् तस्मात्तथा न पश्येत् विज्ञानैकरसं नैरन्तर्येणाकाशवत्परिपूर्णं ब्रह्मैवाहमस्मीति पश्येदितिवाक्यार्थः। अत्र ब्रह्मणि कश्चिदपि भेदोनास्तीति द्वितीयश्रुतेरर्थः। आसीदेकमेवाद्वितीयम्। अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न स वेद यथापशुः। नैव तत्र का चन भिदास्ति। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः। उपदेशादयं वादोज्ञाते द्वैतं न विद्यतेइत्यादिश्रुतिस्मृतीनामादिपदेन संग्रहः। उक्तन्यायमन्यत्राप्यातिदिशति आगमविरोधेसति आभासीभूतमानुमानादिकं भक्तिविषयकाभेदनिश्चयबाधनक्षमं न भवतीत्यन्वयः। आदिपदेनोपमानादिकं संगृह्यते। अन्यथेति। सत्यपि विरोधेऽनुमानादेः प्राबल्यस्वीकारेइत्यर्थः। नरेति मृतनरेत्यर्थः। मृतनरशिरःकपालं शुचिभवितुमर्हतिप्राण्यङ्गत्वात् शङ्खादिवदित्याद्यनुमानस्य। ' मानुषास्थिशवं विष्ठा रेतोमूत्रार्तवं वसा स्वेदोश्रुदूषिकाश्लेष्ममलं चामेध्यमुच्यते' इत्याद्यागमेन बाधइत्यर्थः। कथं भवितेति। भवदीयेन न्यायसांख्यवेदान्तादिदर्शने कथं कथितं त्वं कथयेत्यर्थः। ननु प्रत्यक्षं यद्यागमेन बाध्यं स्याच्चदा जैमिनिना 'तस्माद्भू-

---

तुम भक्तिको स्वरूप से मिथ्याकहते हो वा विषय से मिथ्याकहते हो प्रथम पक्षका उत्तर आगेकहेंगे—भक्तिका विषय आत्मा सत्य स्वरूप है इसवास्ते दूसरा पक्षभी नहीं बनसके है जो भक्तिका विषय मिथ्याहोवे तो शून्यवाद की प्राप्तिहोजावेगी—ज्ञानमें भी मिथ्यार्थको विषय करने सेही मिथ्यात्वहोवे है यथार्थ विषयक ज्ञान यथार्थहोवे है वैसे भक्तिको यथार्थ परमात्मा के स्वरूपको विषय करने से यथार्थता सिद्ध है बाधक के न होने से भक्तिका विषय अबाधित है भेदको ग्रहण करनेवाला प्रत्यक्ष भ्रमशंका का विषयहोने से भक्तिका बाधक नहीं है जिसज्ञान में प्रमाणता गृहीतहोवे सोही ज्ञान बाधकहोवे है नहीं तो रजतज्ञान रूपबाधक के सद्भावहोने से नेदंरजतं इसज्ञान की उत्पत्तिही नहोवेगी इसवास्ते भ्रमज्ञान बाधक नहीं है—चन्द्रमाका प्रदेश परिमाण ग्राहक प्रत्यक्ष जैसे अधिक

थयकथमपार्थकथितंभवताइत्यादिकं युक्तिवृन्दं भेदप्रत्यक्षादेरभेदभक्त्यबाधकत्वे बोद्धव्यम्। भेदागमोपि प्रत्यक्षादिप्रसिद्धमविद्याविद्यमानं भेदमनुवदन्नाभेदभक्तौ प्रभवति विषयं वाधितुमिति अनेनैव न्यायेन प्रत्यक्षादेरवि-

---

मएवाग्नेर्दिवा ददृशे नार्चि' रित्याद्यर्थवादस्यादितिर्द्यौरित्यादिमन्त्रस्य च दृष्टविरोधेनाप्रामाण्येप्राप्ते 'गुणवादस्तु गुणादन्विप्रतिषेधःस्या' दित्यादिना गौणार्थता नोच्येत 'तत्सिद्धिजातिसारूप्यप्रशंसाभूतलिङ्गसमवाया'इतितत्सिद्धिपेटिकायां यजमानः प्रस्तरइत्यादेर्गौणार्थता नोच्येत त्वया वेदान्तिनापि प्रत्यक्षाविरोधाय तत्त्वं पदयोर्लक्षणानोच्येत श्रुतिविरोधे प्रत्यक्षस्यैवप्रमाण्यासंभवात् न च तात्पर्य्यलिङ्गानामुपक्रमादीनामत्र सत्त्वान्नाद्वैतश्रुतीनाममुख्यार्थत्वमिति वाच्यम् यजमानः प्रस्तरइत्यादावप्यपूर्वत्वाद्येकैकलिङ्गस्यतात्पर्यग्राहकस्यविद्यमानत्वात् एकैकलिङ्गस्यतात्पर्यनिर्णायकत्वे लिङ्गान्तरमनुवादकमेव त्वन्मतेप्रत्यक्षसिद्धे भेदे श्रुतिरिव किंवाहुल्येनेतिचेन्न वाक्यशेषप्रमाणान्तरसंवादार्थक्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेवैतद्विरुद्धग्राहिणोधूमएवाग्नेर्दिवाददृशे दितिर्द्यौर्यजमानः प्रस्तरइत्यादेस्तद्विरोधेनामुख्यार्थत्वेप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन मुख्यार्थत्वोपपत्तेः प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धं तच्च नाद्वैतागमेनबाध्यतेबाध्यते तु तात्त्विकं प्रामाण्यं तत्तु परीक्षया न सिद्धमेवातो न विरोधः धूमएवाग्नेरित्यादेस्तु मुख्यार्थत्वे प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत अतोविरोधात्तत्रामुख्यार्थत्वमितिविवेकः तथा चोक्तं वाचस्पतिमिश्रैः प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थमद्वैतवाक्यं त्वनन्यशेषत्वान्मुख्यार्थमेव उक्तं हि शावरभाष्ये 'न विधौ परः शब्दार्थ'इति। विधौ विधायकेऽज्ञातज्ञापके वाक्ये परः प्रतीयमानादन्यः शब्दार्थस्तात्पर्य्यविषयोनेति भाष्यार्थ इतिबोध्यम् । किं चापच्छेदन्यायेनाप्यागमस्य प्राबल्यम् यथा हि पौर्वापर्य्ये पूर्वदौर्वल्यं प्रकृतिवदित्यधिकरणे उद्गात्रपच्छेदनिमित्ताऽदक्षिणयागेन परेण प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणयागस्य पूर्वसिद्धनिमित्तकस्य बाधइतिस्थितम् । तथोदीच्यागमेन पूर्वस्थप्रत्यक्षस्य बाधः । अत्र बाधशब्देन प्रयोगान्तरेनिक्षेपउच्यते । तदुक्तं । शावरभाष्यटुपटीकायाम् । 'तस्य प्रयोगान्तरे निक्षेपइति' इति संक्षेपइत्याशयेनाह इत्यादिकमित्यादि नन्वस्त्वागमस्य प्रत्यक्षादिबाधकत्वम् परं तु 'द्वा सुपर्णा सयुजा' इत्यादिभेदबो-

द्याविद्यमानभेदविषयत्वाद्भक्तेश्च पारमार्थिकाभेदविषयत्वाद्भिन्नविषयभावेन न विरोधगन्धोपि प्रदर्शयितुं शक्यते न च भेदः पारमार्थिकोऽभेदस्त्वविद्याविद्यमानइत्येव कुतोनास्थीयते इति वाच्यं भेदस्य निन्दानिषेधश्रवणादपारमार्थिकत्वप्रत्ययान्नहि पारमार्थिकोसौ निन्दानिषेधयोग्यतामश्नुवीत अभेदस्य च वस्तुस्वभावतया पारमार्थिकत्वप्रत्ययात् तस्मादाविद्यकोभेदोऽभेदस्तु पारमार्थिकोनिन्दानिषेधादिश्रुतेरित्याद्यग्रे स्वयमेवाचार्य्योवर्णयिष्यति ततोनेह बहु प्रतन्यते॥३२॥किं च भक्तेः फलविचारणयापि न मिथ्यात्वमास्थेयं भक्तेरित्युच्यते—

## सू० अमिथ्याफलत्वाच्च ॥ ३३ ॥

इदमपि विचारमर्हति यन्मिथ्याफलं साधनं तन्मि-

---

धकागमस्याभेदबोधकागमापेक्षया प्राबल्यमस्त्वित्यत आह भेदागमोपीति । अनेनैव न्यायेनेति प्रत्यक्षादिसिद्धभेदानुवादकत्वन्यायेनेत्यर्थः । तथा च भेदाभेदबोधकप्रमाणयोर्भिन्नविषयकत्वेन न बाध्यबाधकभावोस्तीतिभावः । समानविषयकत्वे तु अभेदबोधकागमस्यैव प्राबल्यम् तदुक्तं खण्डनकृद्भिः । पारमार्थिकमद्वैतं प्रविश्यशरणं श्रुतिः विरोधादुपजीव्येन न बिभेति कदा चनेति तदुक्तमानन्दबोधाचार्य्यैरपि तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम् पूर्वस्य बाधकं नायं सर्पइत्यादि वाक्यवदिति ननु यथा "अग्निर्हिमस्य भेषजमि"तिश्रुतिः प्रमाणान्तरगृहीतहिमनिवारणशक्त्यनुवादिका तथानुमितिसिद्धाभेदग्राहकत्वे सत्यद्वैतश्रुतिरेवानुवादिका स्यादित्याशङ्क्ते न च भेदइति । मृत्योस्स मृत्युमाप्नोति यइह नानेव पश्यतीत्यादिभेदनिन्दाश्रवणादभेदबोधिका श्रुतिरेव प्रत्यक्षादिसिद्धभेदानुवादिकेति तत्त्वमित्यन्यत्र विस्तरः ॥ ३२ ॥ अमिथ्याफलत्वाच्च' भक्तेः विषयस्यसत्यत्वप्रदर्शनेन सार्थक्यमुपपाद्य फलसत्यत्वप्रदर्शनेनापि सार्थक्यमुपपादयन्तत्र हेतुसूत्रमवतारयति किं च भक्तेरित्यादिना ।

थ्येवार्थासाधकत्वान्मिथ्येत्यास्थीयते परीक्षकैरियं च भ-गवतोभक्तिर्भगवती चिन्तामणिरिव चिन्तितं मुमुक्षोर्मो-क्षमावहन्ती न मिथ्याफलावहा येन फलतोपि मिथ्यात्व-कथाभागूभवेदिति नास्या मिथ्यात्वं कथमपि कथनीयं मुमुक्षुभिरिति दिक् भक्तिफलस्य कथममिथ्यात्वमध्यव-सितमितिचेत्।किंविषया।मिथ्यात्वकथा विस्मृता ते येनैवं पृच्छस्यश्लीलं नात्र विषयफलभेदोवस्तुतः कर्मादिवत् किन्तु तदेव भक्तिविषयीभूतमात्मतत्त्वं निराकारं निरा-

---

फलविचारणयापीति फले सत्यत्वमिथ्यात्वविचारेणापि भक्तैर्भक्तौ सार्थक्यमा-स्थेयमित्याह गुरुनानकः'अमिथ्याफलत्वाच्चे'तिसूत्रेणेत्यर्थः श्रीनिराकारसच्चि-दानन्दाभिव्यक्तिरूपफलवत्त्वान्नभक्तेर्वैयर्थ्यमितिसूत्रार्थः तदिदं सूत्रमनुव्याचष्टे इदमपीत्यादिना यदिति साधनमित्यनेनान्वितमिदम् मिथ्यात्वं कथमपीति न कथमपि भक्तेर्वैयर्थ्यमित्यर्थः । भजतिसोऽमृतोभवतीत्यादिश्रुतेः 'दुर्लभोदु-र्घटश्चैव युष्माकं सुमनोरथः मयानुमोदितःसम्यक्सत्योभवितुमर्हति स्त्रियोवा पुरुषा वापि भक्तिभावेनकेशवं हृदिकृत्वा गतिं यान्ति श्रुतीनां नात्र संशयः' आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन मामुपेत्य तु कौन्तेय पुनर्जन्म न वि-द्यते' इत्यादिस्मृतेश्च प्रामाण्यात् न भक्तेर्वैयर्थ्यमितिदिक् पदार्थः अश्लील-

---

परिमाणग्राहिशब्द प्रमाण के विरोध से अप्रमाण होने से अधिक परिमाण ज्ञानका अबाधक है वैसे 'नेहनानास्तिकिंचन' इत्यादि वेदप्रमाण के विरोध होने से भेदग्राही प्रत्यक्ष अभेद भक्तिका अबाधक हैं और भेदग्राहक अनुमान भी आगम विरोध से अप्रमाण है इसी से अभेद भक्ति का बाधक नहीं है– और भेदको विषय करनेवाला आगम भी अविद्याकृत भेदको विषय करने से अभेद भक्तिका बाधक नहीं है इसवास्ते भेदग्राहि सर्व प्रमाणोंको अविद्या कृतभेद विषयक होनेसे और भक्तिको वास्तव अभेद विषयक होने से भिन्न विषय में बाध्यबाधक भावका अभाव होने से कोई भी भेद ग्राही प्रमाण अभेद भक्तिके बाधन में समर्थ नहीं है भेद का वेद में निषेध किया है और भेद दर्शी की निन्दाकरी है इसवास्ते भेद सत्य नहीं है सत्यवस्तुका निषेध नहीं होवे है और सत्यदर्शी की निन्दाकहीं नहीं होवे है और अभेद आत्मा का स्वरूपहोने से सत्य है उसको असत्य कहने की शंका नहीं बने है–और

वरणाभिव्यक्तिमच्चैतन्यं स्वाभिन्नं मोक्षपदाभिलप्यमनुमन्यामहे ततोयायुक्तयउक्ताविषयस्यामिथ्यात्वसाधिकास्ताएवात्रानुसंधातव्याइतिव्यक्तममिथ्यात्वंताभिः फलस्यापि सेत्स्यतीत्यनवद्यम्॥ ३३ ॥पुरा विकल्पितकल्पयोरागकल्पं निराकुरुते—

## सू० स्वरूपश्चेद्बाधेपि समानम् ३४

अथ भक्तिस्वरूपं विचार्यमाणमन्तःकरणपरिणामरूपं परिचीयते न च तदमिथ्येत्यास्थातुमुत्सहामहे द्वैतवादापातात् न च तस्याः स्वरूपतोमिथ्याभूतायाअपि परमार्थमोक्षाभिव्यञ्जकत्वं मन्यते मानसमास्माकीनम् । मिथ्यास्वरूपात्सत्यफलादृष्टेरितिचेत् स्यादेतदेवं यदि कस्य चिदेवैवं स्यान्नैव मेकस्यैवावलोक्यतेमतेऽपि तु

मिति । लज्जादिसंपादकं ग्राम्यभाषणमश्लीलमित्यर्थः कर्मादिवदिति । आदिना उपासनाया ग्रहणम् यथाकर्मादीनामदृष्टविशेषोविषयः स्वर्गादिविशेषः फलम् तथा पूर्णाभक्तेर्न फलविषययोर्भेदइतिभावः । भक्तिविषयीभूतमात्मतत्त्वमेव मोक्षपदाभिलप्यं फलमनुमन्यामहे इत्यन्वयार्थः । अथ विषयतः फलतश्च भक्तेः सार्थक्यमुपपाद्येदानीं पूर्वं प्रतिज्ञातं स्वरूपतोपि भक्तेर्न मिथ्यात्वमित्येतत्प्रतिपादकं सूत्रमवतारयति पुरेत्यादिना प्रतिवन्दीविधया सूत्रं व्याचष्टे अथ भक्तिस्वरूपमित्यादिनाविचार्यमाणंपरीक्ष्यमाणं भक्तिस्वरूपंकिमन्तःकरणस्यपरिणामभूतं परिचीयते संपिपादयिषितं न हि तदमिथ्या स्थापयितुमुत्सहामहे येन

अभेदका निषेध कहीं नहीं किया और अभेददर्शी की निन्दाभी कहीं नहीं की इससेभी अभेद सत्य है ॥ ३२ ॥ किंचभक्ति के फल के विचारने सेभी भक्ति यथार्थ प्रतीतहोवे है वैसाकहे हैं ( सू० अमिथ्याफलत्वाच्च ३३) अमिथ्या फलका साधनहोने सेभी भक्ति अमिथ्या है जो मिथ्या फलका साधनहोवे है सोभी मिथ्या पदार्थ के वत् अर्थका असाधक होने से मिथ्या कहाजाता है। भगवत् की भक्ति तो चिन्तामणि के वत् मुमुक्षुको चिन्तित फल

समानमेतत्सर्वेषां वादिनां ज्ञानस्याप्यन्तःकरणवृत्तिरूपत्वान्मोक्षासाधकत्वप्रसंगात् स्वरूपतोमिथ्यात्वस्याविशेषात् न वयं बोधेद्धवृत्तिप्रमावादिनः किन्तु वृत्तीद्धबोधप्रमावादिनः तथा च बोधरूपस्यात्मनोमिथ्यात्वाभावान्न समानता निराकारमीमांसकैरितिचेद् बोधविशेषणेपि वृत्तौ दृष्टिर्दीयताम् विशेषणस्य वृत्तेर्मिथ्यात्वे तद्विशिष्टेऽमिथ्यात्वस्य भवता वक्तुमशक्यत्वात् । स्वयमनभ्युपगमाच्च । प्रकृतेपि तादृशस्यैव निरावरणवृत्तिवृन्दाभिव्यक्तचिदात्मनएव भक्तिपदाभिलप्यत्वाभ्युपगमे वाधकाभावाच्चेति–

द्वैतवादआपतेदित्यर्थः । आस्माकीनंमनस्तस्याभक्तेः परमार्थमोक्षावाहकत्वं न हि मन्यतेइत्यन्वयः । आशङ्कते मिथ्यास्वरूपादिति मिथ्यास्वरूपकात्साधनादित्यर्थः । प्रतिवन्धासमाधत्ते समानमेतदित्यादिना । विषयप्रकाशकान्तःकरण परिणामविशेषोहिवृत्तिर्ज्ञानम् । तच्च मिथ्यैव निराकारब्रह्मभिन्नत्वात् । सर्वेषामिति वेदान्तवादिनामेवविशेषणम् । वेदान्तवादस्यसाधनादिविषयेऽनेकविधत्वात् । अतएवाग्रेवृत्तेर्विशेषणमन्तःकरणं संगच्छते अन्यथा नैयायिकादिमते ज्ञानस्यात्मगुणत्वादसंगतं स्यादितिवोध्यम् । प्रतिवन्धुद्धारं वेदान्तिनः आशङ्कन्ते न वयमित्यारभ्यचेदित्यन्तम् विशेषणवृत्तिधर्मस्यविशिष्टवृत्तित्वनियमादितिन्यायेन प्रतिवन्दीं यथावस्थां स्थापयन् समाधत्ते बोधविशेषणेपीति । बोधविशेषणीभूतायां वृत्तावपि दृष्टिर्दीयतामित्यर्थः । विशेषणस्य विशेषणभूताया वृत्तेर्मिथ्यात्वस्वीकारे वृत्तीद्धे विशिष्टेपि अमिथ्यात्वस्य अभ्युपगन्तुमशक्यत्वात् पूर्वोक्तन्यायादित्यन्वयार्थः प्रकृतेपीति भक्तेर्मिथ्यात्वसत्यत्वविचारेपीत्यर्थः । उभयोः पक्षयोर्मतयोर्मध्ये दूषणपरिहारौ समानौ समानावेव साधकवाधकयोस्तुल्यत्वादित्यर्थः । तदुक्तं वौद्धाधिकारे 'यत्रोभयोः समोदोषः परि-

की प्राप्तकरती है सो अमिथ्या मोक्षका साधन होनेसेभी अमिथ्या है । (शंका) भक्तिका फल कैसे जानाजावे कि अमिथ्या है । (समाधान) जैसेभक्ति के विषयको अमिथ्या सिद्धकरा है वैसे फलकोभी अमिथ्या जानलेना यहां विषयका और फलका कर्मस्थल के वत् भेद नहीं है किन्तु वोही आत्मा अज्ञात विषय है और निरावरण ज्ञातहुआ फल है । इस वास्ते वाधक के अभाव से जैसे भक्तिका विषय अमिथ्या है वैसेभक्तिका फलभी अमिथ्या है ॥ ३३ ॥

समानावुभयोः पक्षयोर्दूषणपरिहाराविति नैकात्रोपाल-म्भो वक्तुंशक्य इत्यलम् ॥ ३४ ॥ अथैतावता प्रबन्धेन भक्तेर्मोक्षोभवतीत्यभिहितं भवता तत्रचाशङ्कापङ्कल-ङ्कोपिक्षालितः समाधानगाङ्गप्रवाहैस्तथापि भक्तिपक्षरक्ष-णेभेदरक्षण।पातेनाद्वैतरक्षणं न कृतं भवेत्ततश्च भेदरक्ष-कत्वाद्धेयएव भक्तिपक्षइत्यतोऽभिधीयते—

सू० भक्तेर्भेदइति चेन्ना-भेदभक्तेः ॥ ३५ ॥

भक्तेर्मोक्षाभिव्यञ्जिकायाअङ्गीकारोन साधीयान् ।

हारोपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारिणे ' इति यत्तु सत्यं प्रत्यसत्यस्य न जनकतेति तन्मौढ्यात् न हि सत्यं प्रतिजनकं ब्रूमः किन्तु व्यञ्जकं न च तदप्यदृष्टम् अज्ञाननाशरूपाभिव्यक्तिमात्रस्य शुक्त्याद्युप-हित चिद्रूपे सत्यएव जायमानस्य शुक्त्यादिसाक्षात्काररूपासत्येनैवो-त्पत्तेः प्रातिभासकस्य व्यावहारिकसुखजनकत्वस्य च दर्शनात् मणिप्रति-बिम्बेमणिबुद्ध्या समीपवर्त्तिमणिलाभवदित्याद्यलमर्थं इत्यन्यत्रविस्तरः । भक्तेर्भेदइतीति भक्तेः सत्यत्वमिथ्यात्वविचारप्रसंगेन प्राप्तौ भेदाभेदावपि विचारयन् भेदपक्षमाक्षिप्याभेदसाधने प्रवृत्तं सूत्रं वृत्तकथनपुरःसरमवतारयति अथैतावतेत्यादिना । भक्तेरिति । भक्तिसकाशात् । अभिव्यज्यमानत्वेनमोक्षः प्रतिपादितइत्यर्थः । ननु भक्तिर्भजनीयादभिन्नाभिन्नावा नाद्यः अभिन्नाया-मोक्षासाधकत्वापत्तेः द्वितीयं तु पक्षं सूत्रेणैवाक्षिप्यसमाधास्यन् तत्सूत्रं व्या-चष्टे भक्तेरित्यादिना । भेदोहि किं पारमार्थिकः आहोस्विद्व्यावहारिकः । प्रातिभासिकोवा आरोपितोवा नाद्यत्रयमस्माभिरनङ्गीकारेणैव परास्तत्वात् अरोपितस्तु भेदोनाद्वैतविरोधीतिसमाधत्ते यतइत्यादिना । न वयं भेदभक्तिवा-

भक्ति स्वरूप से मिथ्या है इस शंका का समाधान करे हैं ( सू० स्वरूप-तश्चेद्बोधेपिसमानम् ॥ ३४ ॥ स्वरूप से भक्तिको मिथ्याकहो तौ ज्ञान मेंभी समान दोषहोगा—जो कभी भक्तिको अंतःकरण का वृत्तिस्वरूप होने से स्वरूप तो मिथ्याहोने से मोक्ष स्वरूप सत्य फल की साधकता नहीं होसकेगी

यतोभेदं विना भक्तेरात्मलाभासंभवेन भेदवादोऽभ्युपगतोभगवताभवेदितिचेन्न यतोन वयं भेदभक्तिवादिनः उपासनवादिनइव किन्तु भेदमसन्तमेवारोप्य भक्तिमनुतिष्ठता भेदप्रविलापनपुरःसराभेदनिष्ठारूपभक्तिर्लभ्यतइत्यभेदभक्तिवादिनस्ततोन भेदवादप्रसंगाविभीषिकोन्मेषः श्रवणादिषु सर्वत्र सर्वैरेवारोपितभेदाभ्युपगमात् सत्यभेदस्य च निराकारमीमांसकैर्निषेधनादेवोपालम्भस्यान-

---

दिनइति न वयं प्राकृता भक्ताः किन्तुभागवतोत्तमाइत्यर्थः। भक्ता हि त्रिविधाः सन्ति प्राकृतमध्यमोत्तमभेदात् तथाहि। 'अर्चायामेव हरेः पूजां यः श्रद्धयेहते न तद्भक्तेषु चान्येषु सभक्तः प्राकृतः स्मृतः ' इति। ईश्वरे तदधीने च वालिशेषु द्विषत्सु च प्रेममैत्रीकृपोपेक्षायः करोति समध्यमः सर्वभूतेषुयः पश्येद्भगवद्भावमात्मनः। भूतानिभगवत्यात्मन्येष भागवतोत्तमः ' इतिउत्तमभागवतोऽपि त्रिविधः। तत्राद्यः प्रपञ्चसत्यत्वभानसहितोयथा 'खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन्। सरित्समुद्रांश्च हरेः शरीरं यत्किञ्चभूतंप्रणमेदनन्यः ' इत्याद्यनेन प्राकृतोभागवतोत्तमः, द्वितीयः प्रपञ्चमिथ्यात्वभानसहितोयथा 'तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् त्वय्येव नित्यसुखबोधतनावनन्ते मायात्तउद्यदपि यत्सदिवावभाति' इत्यनेन मध्यमोभागवतोत्तमतरः, तृतीयः प्रकारद्वयेनापि प्रपञ्चभानरहितः सन् सर्वं विष्णुमयं जगत्पश्यति यथा। बृहन्नारदीये 'अहमेव परोविष्णुर्मत्तः सर्वमिदं जगत् इति यः सततं पश्येत्तं विद्यादुत्तमोत्तममि'ति। भगवद्भक्तिरसायने तु इदं लक्षणमुक्तम्। ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मेशनैर्हरिः प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः आनन्दसम्प्लवे लीनोनापश्यमुभयंमुने' इतिवोध्यमिति संक्षेपः। उपासनवादिनइति सगुणदेवतोद्देशेन सगुणोपासनतत्पराइत्यर्थः। तदुक्तं यथा ' भक्तियोगोद्विधा राजन सगुणश्चैवनिर्गुणः सगुणः स्याद्बहुविधोर्निर्गुणश्चैकलक्षणः भा-

---

ऐसी शंका करो तो ज्ञानकोभी अंतःकरण का परिणाम स्वरूप होनेसे मिथ्या स्वरूप से मोक्षफल की सिद्धि न होगी यह दोष ज्ञानवादी के मतमेंभी प्राप्तहोगा जो कभी तुमवृत्ति अभिव्यक्त चेतनको ज्ञानकहो वोसत्य है तो हमभी वृत्तिसमूह अभिव्यक्त चेतनकोही भक्ति मानेंगे विशेषणांशवृत्ति दोनों के मत में मिथ्या है विशेष्यांश चेतन दोनोंके मतमें सत्य है इस वास्ते एक मतमें दोष नहीं आवे है

वकाशात् नचज्ञानादविशेषोभक्तौस्यात्तथासतीतिवाच्य-मूबहुधादत्तोत्तरत्वात्तथाचाद्वैतवादिनएववयम् परं च पूर्णभक्तिभाव्यमुक्तिवादिनइति विशेषदर्शिनस्ततएव चदर्शनभेदोयमारब्धोगुरुणेति दिक् ॥३५॥ स्यादेतदुपक्रमएवाभेदभक्तिरनुष्ठेया भेदाभावात्तथाचोपासनाकाण्ड-

---

वोविभिद्यतेपुंसां गुणमार्गेण देहिनामि'त्यादिना। ननु उपासने न वस्तुतत्त्वमपेक्षितमितिन्यायेनातद्ब्रह्मादिबुद्धिवदतस्मिन्नपितत्त्वदृष्टिः क्रियतामितिचेन्न एतत्सर्वंभविष्यति मया प्रोक्तं विधे तव स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथे'ति गोपालतापन्यां पूर्वोक्ताशङ्कानिवृत्त्यर्थं स्वरूपपदोपादानादित्याहुः। तर्हि यूयं के भक्ताइति पृच्छति किन्तितिउत्तरयति। भेदमसन्तमेवेत्यादिना गीतोक्तेषु चतुर्षु भक्तेषु मध्ये ज्ञानिनोऽभेदवादिनोवयं भक्ताइतिभावः तदुक्तंगीतासु 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आर्तोजिज्ञासुरर्थार्थीज्ञानी च भरतर्षभ तेषां ज्ञानी नित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहि ज्ञानिनोऽत्यर्थमहं सच मम प्रियः उदाराः सर्वएवैते ज्ञानी त्वात्मैव मे मतम् आस्थितः सहि युक्तात्मा मामेवानुत्तमां गति'मिति ननु यदि यूयं ज्ञानिभक्ताभवथ तदाभवतां भक्तेर्ज्ञानात्कोभेदइत्याशङ्कते नचेति। दत्तोत्तरं तत्र स्मारयन् हेतुमाह बहुधादत्तोत्तरत्वादिति। 'ज्ञानप्रसादेनविशुद्धसत्व' इति श्रुतिमुदाहृत्य सप्तमादिसूत्रभाष्ये दत्तोत्तरत्वादित्यर्थः। भूयश्चान्तेविश्वमायानिवृत्तिरितिश्रुतिरप्यत्रोदाहार्य्या। ध्यानादिन्द्रियवृत्तीनां परमात्मनियोजनात् ध्यानपरिपाकरूपेऽन्ते सति तत्त्वसाक्षत्कारजन्यभगवत्प्रसादाद् विश्वमायानिवृत्तिरित्यर्थइति बोध्यम् भाव्येति भक्त्यभिव्यङ्ग्येत्यर्थः। अनुषङ्गात् शास्त्रारम्भमपि समर्थयति ततएवचदर्शनभेदोयमारब्धइति। न च काम्यफलाभावेस्वतोऽपुरुषार्थेभजने प्रवृत्त्यनुपपत्तिरितिवाच्यम्। भक्तेर्नान्तरीयसुखधारारूपेण परिणतमनोवृत्तिरूपत्वेन स्वतएव पुरुषार्थत्वात् यत्तु संसारदुःखमिश्रितत्वेन मुक्त्यपेक्षयापकृष्टत्वं परं प्रामाणिकं तस्याइति केन चिदुक्तं तन्न युक्तम्। 'अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी जरयत्याशु या कोशं निगीर्णमनलोयथा।' इत्यादि स्मृति विरोधादित्यादिर्दिगर्थोऽवसेयइति संक्षेपः ॥ ३६ ॥ सोपान ॥ भक्तिप्रसङ्गात्सोपानारोहणन्यायेन सूत्रितं तत्क्रममवतारयन् शङ्कते स्यादेतदित्यादिना। उपक्रमए-

मकाण्डताण्डवितं भवताऽभाणीतिचेन्नैवमित्यभिदधाति

## सू० सोपानारोहवत्तदारोहः क्रमात् ॥ ३६ ॥

न वयमुपक्रमएवाभेदभक्तिमनुष्ठातव्यमुपदिशामो-येन तथा दोषभाजोभवेम किन्तु सोपानारूढएवमहाराजं दिदृक्षुर्भजते सम्राजं न चानारूढसोपानसन्ततिर्भजते कदापि तामिति भवितव्यं भक्तेः प्रागवश्यं भेदोपासनया। सापि भक्तेः प्रागवस्था वेदैकदेशोपासनाकाण्डबोधिता स-प्रमाणेति न तत्रानादरं विदध्मोयेन पूर्वोपदर्शितदिशा दो-षलेशमप्युपलभेमहि । अत्रायं ब्रह्मनिराकारमीमांसक-

वेति । आदावेवयदीत्यर्थः । तथाचेति । तर्हीत्यर्थः । अकाण्डताण्डवितमिति । अनवसरनृत्यतुल्यं किं भवतोपासनाकाण्डमभाणीत्यन्वयार्थः । तर्हि वैयर्थ्यं स्यादुपासनाकाण्डस्येति यावत् । सूत्रं व्याचष्टे न वयमित्यादिना। सौत्रं दृष्टा-न्तमुपवर्णयति किन्त्वित्यादिना । सोपानारूढइति। सोपानपंक्तिद्वारा प्रासाद-मारूढइत्यर्थः । भक्तेः प्राक् । निर्गुणभक्तेः प्राक् साधनीभूतसगुणोपासनया भवितव्यमित्यर्थः । सापि सगुणभक्तिरपि सप्रमाणा यतोनिर्गुणभक्तेः प्रागव-स्थायामेव उपासनाकाण्डप्रतिपाद्या इति हेतोर्न तत्रानादरं विदध्मइत्यन्वयोप-

॥ ३४ ॥ भक्ति पक्षमानने से भेद पक्षकी रक्षाप्राप्तहोगी इसशंका का समाधान करे हैं ( सू० भक्तेर्भेदइतिचेन्नाभेदभक्तेः ॥ ३५ ॥ ) भक्ति मानने से भेद प्राप्तहोगा ऐसा मतकहो अभेद भक्तिका अंगीकार करने से हम भेद भक्ति वादि नहीं हैं किंतु प्रथमावस्था में असत्य भेदका आरोप करके नामकी-र्त्तनादि भेदभक्ति करके अनन्तर अभेदभक्ति को अंगीकार करे हैं और भेद का अपवाद करे हैं वेदान्ति भी श्रवणादि की सिद्धि वास्ते भेदका आरोपमाने हैं और भेदको सत्य हमभी नहीं मानते इसवास्ते हमारे मतमें कोई दोष नहीं है हमपूर्ण भक्ति से मोक्षमानते हैं और वेदान्ति भक्ति का एक देशज्ञान से मोक्ष मानते हैं इतना विशेष है इसीवास्ते दर्शन का आरम्भ महर्षि श्रीगुरुजीने किया है

योभेंदोयत्तन्मते परोपासनाया मानसैकाग्रता फलम् वयन्तु ब्रूमो न मानसैकाग्रतामन्तरोपासनासिद्धिरिति भगवन्नामानुकीर्त्तनलब्धजनितृष्णानिरोधजमानसैकाग्रताया भवतिभक्तेः पूर्वावस्थोपासनेति ततोनोपासनाकाण्डमकाण्डताण्डवितामितिभावः ॥ ३६ ॥ स्यादेतद्भेदभक्तेः सिद्धये भेदोयद्यभ्युपगम्यते तर्हि वास्तवएव सवैशेषिकादिवत्कुतोनाभ्युपेयते इति चेत्तत्राह—

## सू० नभेदस्तत्थ्यस्तन्निराकरणात् ॥ ३७ ॥

भेदोभेदभक्तेः सिद्धयेऽभ्युपगतोपि नैतावता सवास्तवोभवितुमर्हति कुतस्तस्य भेदमात्रस्य निराकारणाद्वेदे निषेधनात् न हि वास्तवं कदापि निषेधार्हम्भवितुमर्हति तथात्वे च श्रुतयः पुरोपदर्शिताएव श्रुत्यन्तराणि स्वय-

---

स्कारार्थः । उपासानाफले मतभेदमाविष्करोति । अत्रायमिति । वयं त्विति । निराकाराद्वैतवादिनोवयं त्वित्यर्थः । ईश्वरप्रणिधानाद्वेत्यादिशास्त्रप्रामाण्यात्सगुणोपासनया चित्तैकाग्रतां कृत्वा पश्चान्निर्गुणोपासनायामधिकारीभवतीति नास्माकं ब्रह्ममीमांसकैः सह विरोधइति सर्वप्रकरणस्य भावः ॥ ३६ ॥ ननु यदुक्तमभेदभक्तेर्भेदभक्तिः साधनमिति तन्न भेदभक्तिगर्भस्थोभेदोयदि पारमार्थिकोभवेत्तदाऽभेदभक्तिरेवनोदियाद्विरोधादित्याक्षिप्य समाधानपरं सूत्रमवतारयति स्यादेतदित्यादिना । आदिपदेन सर्वेषां पारमार्थिकभेदवादिनां संग्रहः । न भेदस्तत्थ्य इति सूत्रं व्याचष्टे न भेदइत्यादिना । व्यवहारदशायां काल्पनिकभेदस्तु सम्मतोऽस्माकमपि न हि ससत्योनिषेधायोगादिति भावः । सामान्यतः सत्यत्वेनिषेधायोग्यतामाह न हि वास्तवमिति । वास्तवं वस्तु कदापि बाधार्हं नास्ति अन्यथा घटादीनामपि बाधितत्वं प्रसज्जेदित्यर्थः । तथात्वे । भेदस्य निषेधने । पुरोपदर्शिता इति । न च सामिथ्येतिसूत्रभाष्ये

मेव वेदेऽवलोक्यानीत्यलम् ॥ ३७ ॥ कुतश्च न भेदः सन्निति चेत्तत्राभिधीयते—

## सू० तद्दर्शिनोनिन्दाश्रुतेश्च ॥३८॥

'अथयोऽन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न स वेद यथापशुरि'ति ।' उदरमन्तरं कुरुतेऽथ तस्य भयं भवती' त्यादिश्रुतिसहस्रेण भेददर्शिनोनिन्दाऽभिधानान्न भेदः सन्नित्यर्थः । न हि तत्थ्यदर्शिनः क्वापि निन्द्यन्ते

---

उपदर्शिता इतिवोध्यम् । वेदेऽवलोकितव्या या श्रुतयः सन्ति तास्तत्रैवादिपदेनास्माभिः संगृहीताइति बोध्यम् । युक्तिभिर्भेदखण्डनैरलंविस्तरभयादित्याहअलमिति ॥ ३७ ॥ उत्सूत्रमाशङ्क्यातोपिनभेदः सत्योभवितुमर्हतीति समाधानार्थं गृह्णाति कुतश्चनेति । सूत्राभिप्रेतनिन्दाश्रुतिं तावत्पठति अथयोन्यामिति । सूत्रे भेददर्शिनां चकारेण भयाभिधानं समुच्चीयते इति तात्पर्येण तद्विषयांश्रुतिमुदाहरति उदरमन्तरमिति । ' यदाह्येवैष एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवतीति ' श्रुतिपाठः । ' अथ सोऽभयं गतोभवती ' त्यत्र पूर्वत्र अथेति ज्ञानफलमुक्त्वाऽभेदज्ञानाभावे दोषमाह श्रुतिः यदाहीति । यद्यस्मिन्नानन्दमये ब्रह्मणि अल्पमप्यन्तरमतादात्म्यस्वरूपं भेदं पश्यति तदा

---

॥ ३५ ॥ प्रथम सेही अभेदभक्ति क्यों नहीं करते इस प्रश्नका उत्तर कहे हैं ( सू० सोपानारोहवत्तदारोहः क्रमात् ॥ ३६ ॥ जैसे मकान के ऊपर बैठे महाराजा के दर्शनार्थ पुरुष सीडी को चडकेही क्रमसे दर्शन करे हैं वैसे भेदभक्तिरूप सीडीपर चडकेही अभेद भक्ति में पुरुष आरूढहोवे है इसी वास्ते वेदमें उपासना काण्डकहा है जो कभी भेदभक्ति प्रथम न मानेंतौ उपासना काण्ड व्यर्थहोगा चित्तकी एकाग्रता से उपासना रूपभक्ति की पूर्व अवस्था सिद्धहोवे है ॥ ३६ ॥ अभेदभक्ति की सिद्धिवास्ते जो भेदको मानतेहो तौ वास्तव भेद क्यों नहीं मानते इसशंका का उत्तर कहे हैं ( सू० नभेदस्तथ्यस्तन्निराकरणात् ॥ ३७ ॥ ) अभेद भक्ति की सिद्धि कल्पित भेद से होवे है सत्य भेद से अभेद भक्ति सिद्धही नहीं होवे है और भेदका वेदमें निषेध किया है इसेवास्त भेद सत्य नहीं है सत्यका कहीं निषेध नहीं होता ॥ ३७ ॥